जं किज्जइ खणभंगुरिण देहह इत्तिउ सारु ॥ ३२ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जो संतावइ अणुदियहं छव्विहजीवनिकाउ ।
नरयनिबंधणकम्मरउ बलि किज्जउ सो काउ ॥ ३३ ॥

[दण्ड दमवि म] णु वसि करहु धरि संजमि अप्पाणु ।
मोह महाबलु निज्जिणिहिं जिम पावहि निरवाणु ॥ ३४ ॥

समणह भूसण गयवसण संजममंजरि एह ।
[सिरि] महेसरसूरि गुरु कण्णि कुणंत सुणेह ॥ ३५ ॥

## पू.आ.श्री मानतुंगसूरिविरचितम्

# ॥ जयन्तीप्रकरणम् ॥

नमिय नमिरामरेसरसिरसेहरमणिमऊहविच्छुरियं ।
वीरचरणारविन्दं जयन्तियापगरणं वोच्छं ॥ १ ॥

पुच्छइ कहावसाणे गुरुयत्तं कह कुणन्ति जिण जीवा ? ।
वीरो भणइ जयन्ती अट्ठारस पावट्ठाणेहिं ॥ २ ॥

पाणिवह मुसावाए अदत्त मेहुण परिग्गहे ।
कोहे माणे माया लोभे पिज्जे दोसे य कलहे य ॥ ३ ॥

अब्भक्खाण अरइ पेसुण्णे तह परपरिवाए ।
मायामोसे मिच्छादंसणसल्ले य अट्ठारे ॥ ४ ॥
भंते भव्वत्तं किं सभावओ ? वावि होइ परिणामा ?
साहावियं जयन्ति ! भवत्तं नेय परिणामा ॥ ५ ॥

भवसिद्धिया भंते ! जइ सिज्झिस्संति तो भवे लोओ ।
भवसिद्धिएहि रहिओ, न भवइ स जयंति ! नायाओ ॥ ६ ॥

सयलागासपएसा सेढिपरमाणुमित्तखंडेहिं ।
समए समए हीरइ अणंतउस्सप्पिणीकालं ॥ ७ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नो चेव अवहिया जह एवं भव्वावि नेव निट्ठन्ति।
नवि सिज्झिहिंति तो भण किण्णु भव्वत्तणं ? ॥ ८ ॥

जइ होऊणं भव्वा वि केइ सिद्धिं न चेव गच्छन्ति।
एवं तेऽवि अभव्वा को व विसेसो भवे तेसिं ? ॥ ९ ॥

भण्णइ भव्वो जोग्गो दारुदलियत्ति वावि पज्जाया।
जोग्गो वि पुण न सिज्जइ कोइ रूक्खाइदिट्ठन्ता ॥ १० ॥

पडिमाईणं जोग्गा बहवो गोसीसचन्दणदुमाई।
संति अजोग्गा वि इहं अण्णे एरण्डभिण्डाइ ॥ ११ ॥

न य पुण पडिमुप्पायणसंपत्ती होइ सव्वजोगाणं।
तेसिं पि असम्पत्ती न य तेसिमजोग्गया होइ ॥ १२ ॥

किं पुण जा संपत्ती सा नियमा होइ जोग्गरूक्खाणं।
न य होइ अजोग्गाणं एमेव य भव्वसिज्झणया ॥ १३ ॥

अहवा पडुच्चकालं न सव्वभव्वाण होइ वोच्छित्ती।
जं तीयणागयाओ अद्धाओ दो वि तुल्लाओ ॥ १४ ॥

तत्थाऽइइअद्धाए सिद्धो एगो अणंतभागो सिं।
कामं तावइउ च्चिय सिज्झिही अणागयद्धाए ॥ १५ ॥

ते दो अणन्त भागा होउं समुच्चियअणन्तभागो सिं।
एवं पि सव्वभव्वाण सिद्धिगमणं न निद्दिट्ठं ॥ १६ ॥

जागरिया सुत्तत्तं किं साहु ? जिण जयन्ति ! जागरिया।
धम्मीणमहम्मीणं सुत्तत्तं साहु निद्दिट्ठं ॥ १७ ॥

पाणाणं भूयाणं सत्ताणं तह जयंति ! जीवाणं।
दुक्खणसोयणपरियावणाईसुं जेण वट्टंति ॥ १८ ॥

निच्चं अहम्मकम्मा अहम्मवित्ती अहम्मआयारा।
अहमम्मि रज्जमाणा सत्ता सुत्ता उ ते सेया ॥ १९ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ २० ॥

एयव्विवरीया पुण सज्झायपरा जियंदिया धीरा ।
धम्मम्मि रज्जमाणा ते साहू जागरा पवरा ॥ २१ ॥

दुब्बलियत्तं ? साहु बलियत्तं ? जिण जयंति ! पावाणं ।
दुब्बलियत्तं सेओ सद्धम्माणं तु बलियत्तं ॥ २२ ॥

दक्खत्तं आलसियत्तमुत्तमं जिण जयंति ! आलस्सं ।
पाविट्ठदुट्ठचिट्ठे सिट्ठं सड्ढे लोए दक्खत्तं ॥ २३ ॥

पुण पुच्छेइ जयन्ती भंते सोइन्दियस्स वसगो किं ? ।
बंधइ चिणइ उवचिणइ जयंति ! सिय सत्त सिय अट्ठ ॥ २४ ॥

कम्मपगडीओ दढं बन्धइ पकरेइ चिणइ उवचिणइ ।
लोयणघोणारसणाफरिसणवसगावि एमेव ॥ २५ ॥

एवं विणिच्छियट्ठा पहट्ठतुट्ठाऽभिवन्दिउं वीरं ।
सामण्णमऽसामण्णं देवाणन्द व्व काऊणं ॥ २६ ॥

निद्दलियघाइकम्मा केवलमुप्पाडिऊण य जयन्ती ।
भवघाइकम्महरणा सिवमयलमणुत्तरे पत्ता ॥ २७ ॥

भगवइबारसमसया बियउद्देसाउ पगरणं एयं ।
सपरोभयसरणत्थं उद्धरियं माणसूरिहिं ॥ २८ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पू.आ.श्रीजिनभद्रसूरिविरचिता

# ॥ पञ्चवर्गपरिहारनाममाला ॥

नत्वा पञ्चेषु-पञ्चास्य-शरभं रभसाज्जिनम् ।
अपञ्चवर्गवर्णात्मशब्दान् कतिपयान् ब्रुवे ॥ १ ॥

यो वर्गव्यञ्जनान्तः स्यात् स श्लोकार्द्धान्तगो ध्वनिः ।
अवर्गकाव्ये कर्त्तव्यो वर्णमध्ये न तद् यतः ॥ २ ॥

अर्हण्णविषयोऽरोषोऽरिहा संवरवैरिहा ।
सुरासुरेशसंसेव्यः शिवावासो जिनेश्वरे ॥ ३ ॥

स्वर्गेऽव्ययं स्वरावासाऽऽश्रयाऽऽलयाः सुरात् परः ।
देवेऽसुरारिः स्वाहाशी बर्हिरास्योऽव्ययालयः ॥ ४ ॥

अविस्रसः सुरश्चार्के सहस्रांशुर्हरी रविः ।
सूरः सूर्यो हेलिर्हंसोऽहरीशो वासरेश्वरः ॥ ५ ॥

अंशुः सरोरुहसुहृद् रश्मावंशुर्वसुश्च रुक् ।
उस्रश्चन्द्रे शर्वरीशः शिशिरांशुः शशी हरिः ॥ ६ ॥

सरोरुहारिरङ्गारे रसासूरार इत्यपि ।
बुधे च शार्वरीशिः स्यात् शशिसूश्च बृहस्पतौ ॥ ७ ॥
सुरसूरिस्तथा सूरिः शुक्रे चासुरपूर्वकः
शनौ च रविसूः सौरिः सैंहिकेये च शश्यरिः ॥ ८ ॥

रविवैरी च राहुः स्यात् केतावहि विलेशयौ ।
अश्लेषासूरगस्त्ये चौर्वशेयश्चाश्रयाशसूः ॥ ९ ॥

दिनेऽहर्वासरौ प्रातर्वासरास्य-मुषस्तथा ।
सन्ध्यायां सबलिः सायं रजन्यां शर्वरी उषा ॥ १० ॥

शशिशरीरेश्वरी च मार्गशीर्षे सहः सहाः ।
पौषे सहस्यं शंसन्ति शीते च शिशिरं मतम् ॥ ११ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सुरभाविष्य आषाढे वाहा(र्दा)वसर-वर्षिकौ ।
....................................... ॥ १२ ॥

क्षये विलय-संहारौ खे विहायो वियत् तथा ।
वायु-स्वर्वासि-वार्वाहाश्रयो मेघे तु संवरात् ॥ १३ ॥

वार्वारिसलिलेभ्यश्च वाहः स्याद् वेगवर्षिणि ।
आसारो वर्षणे वर्षं दिश्याशा-हरितौ स्मृते । ॥ १४ ॥

इन्द्रे सुरेश्वरः स्वाराड् हर्यश्वो वासवो वृषा ।
वार्वाहवाहः शैलारिर्बलहा हरिरिष्यते ॥ १५ ॥

देववृक्षे साल-रसारुहौ स्वःसुरपूर्वकौ ।
कुलिशे च स्वरुर्देव्यां सुर-स्वरबलादयः ॥ १६ ॥

गीर्वाणगायनो हाहा हूहूः पण्याङ्गनासु च ।
स्वः-सुरादिपरा वेश्या उर्वश्याद्या यमे हरिः ॥ १७ ॥

लुलायवाहः सूरसूः वरुणे सलिलेश्वरः ।
वारीश्वराऽऽ-श्रयश्चापि कुबेरे स्वेश्वरो विलः ॥ १८ ॥

ऐल ईशवयस्यश्चे हावसुर्द्रविणे वसु ।
स्वं राः सारं विरूपाक्षे शैलवासी-श-शायिनः ॥ १९ ॥

शर्वो वार्वाहवाहश्चाऽऽशावासा ईश ईश्वरः ।
शूली लुलायवाहारिः स्याद् विहायःशिरोरुहः ॥ २० ॥

असुरारिः शिवेशश्च संवरारिहरो हरः ।
शिवो हीर उमायां च सिंहावासा शिवेश्वरा ॥ २१ ॥

आर्या सौरिस्वसा स्कन्दे शिवा-शरा-ऽऽश्रयाशसूः ।
बर्हिवाहो विधौ हंसवाहो विश्वात् सृडीश्वरौ ॥ २२ ॥

वसुश्रवाः सारससूर्विष्णौ वारिशयो हरिः ।
वारीशशायी श्रीशोऽहिवैरिवाहः सुरारिहा । ॥ २३ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शौरिर्विश्वेश्वरो राहु-वलिवैरी हलायुधे ।
हली वलः सीरशयो लक्ष्म्यां वारीशसूर्वला ॥ २४ ॥

या सा सरोरुहावासा श्रीः शरीरेश्वरी हरेः ।
कामे श्रेयोऽसुहृत् श्रीसूः संवरारिश्च तत्सुते ॥ २५ ॥

उषेशो गरुडे शौरिवाहो वि-वयईश्वरः ।
अहिवैरी दानवे स्यात् सुरारि-रसुरो गिरि ॥ २६ ॥

वाग् वचने च व्याहारो नामन्याऽऽह्वाऽऽह्वयौ स्मृतौ ।
आकारणे हवो ग्राम्येऽश्लीलं मङ्गलशंसने ॥ २७ ॥

आशीः प्रशंसने शंसा विवादे व्यवहारवाक् ।
कीर्तौ यशोऽथ स्वीकारे चाऽऽश्रवो नर्त्तने भवेत् ॥ २८ ॥

लास्यं वंशादिके ज्ञेयं शुषिरं हसने हसः ।
हासो हास्यं च कोपे रुट् रुषा रोषोऽक्षिवारिणि ॥ २९ ॥

अस्रमस्रु च लज्जायां ह्रीर्निद्रायां च संलयः ।
संवेशो हृत्प्रसत्तौ च हर्षोऽन्यगुणदूषणे ॥ ३० ॥

असूया तर्क ऊहः स्यात् शक्तौ वीर्यं क्लमे भवेत् ।
आयासोऽपि च तन्द्रायामालस्यं मानवे तु विट् ॥ ३१ ॥

डिम्भे बालः शिशुः शावः शिशुत्वे बाल्य-शैशवे ।
नटे शैलालि-शैलूषौ जरायां विस्रसा मृते ॥ ३२ ॥

यशः शेषो वधे हिंसा जडे बालश्च बालिशः ।
आशंसितरि चाशंसुर्दरिद्रोऽस्वोऽवसुः क्रुधि(अक्षान्तौ) ॥ ३३ ॥

ईर्ष्या रोषण इर्ष्यालुः स्यादसौम्यस्वरेऽस्वरम् ।
मन्दे अलस आलस्य इभ्ये च श्लील ईश्वरः ॥ ३४ ॥

प्रभावीश्वर ईशः स्यादर्यो मूके तु लोहलः ।
हिंस्रे शरारुः सुभटे शूरो वीरोऽथ दक्षिणे ॥ ३५ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सरलः कर्मशीले स्यादायः (?) सत्यार्य उच्यते ।
शिखरिण्यां रसालाऽऽज्ये हविष्यं हविरिष्यते ॥ ३६ ॥

ह्योगोदोहोद्भवे हैयं शुण्ठ्यां विश्वाऽथ काञ्जिके ।
सौवीरं राजिकायामसुरी मनोरथे वशः ॥ ३७ ॥

आशंसे हाऽदने लेहाऽऽहारावुपचितेंऽसलः ।
वली च त्र्यूषणे व्योषं विक्लवे विह्वलो मतः ॥ ३८ ॥

सभायां तु सदः संसद् वचनस्थित आश्रवः ।
वश्यः प्रणेये चाऽर्चायामर्हा च स्यादहंकृतौ ॥ ३९ ॥

अहंयुः संशयितरि संशयालुरुपस्करे ।
वेषवारोऽथ निद्रालौ शयालुरनुगामिनि ॥ ४० ॥

सहायोऽथ जवे रंहो रयश्च पथिकव्रजे ।
हारिः पथ्यदने प्रोक्तं शम्बलं हि क्षमे सहः ॥ ४१ ॥

खेलिन्यां शारि-शारौ च कुले वंशः स्त्रियां विशा ।
वरारोहाऽबला बाला योषा योषिद् निषेवणे ॥ ४२ ॥

शुश्रूषा वरिवस्या च सेवा प्रियतमे वरः ।
प्रियायां च शरीरेशी सख्यामालिर्वयस्यया ॥ ४३ ॥

स्त्रीगुणे हावो हेला च विलासो लीलया सह ।
पाणिग्रहे विवाहः स्याद् गणिकायां तु वेश्यया ॥ ४४ ॥

वारयोषाऽथ सुरते संवेशो रहसा सह ।
व्यवायश्च भागिनेये स्वस्रीयः पतिभार्ययोः ॥ ४५ ॥

पित्रोः श्वश्रूश्वशुरौ चात्मीये स्वीयः स्व इत्यपि ।
भग्न्यां स्वसा बान्धवे स्वो दयितायाः सहोदरे ॥ ४६ ॥

श्यालो भार्याभगिन्यां च श्याला हाली मृते शवः ।
काये वेरं शरीरं चाङ्गेऽवयवोऽथ मूर्द्धनि ॥ ४७ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शिरः शीर्षं कचे बालः शीर्षसूक्ष्म शिरोरुहः ।
शुद्धकेशे शिरस्यः स्याद् मुखे चाऽऽस्यं श्रुतौ श्रवः ॥ ४८ ॥

स्कन्धे बाहुशिरोंऽसश्च भुजे बाहुश्च बाहया ।
हस्ते शयो रसज्ञायां लोला वक्षसि चाप्युरः ॥ ४९ ॥

स्तनयोरुरोरुहौ च शुक्रे वीर्यं बलं पदे ।
अंह्रिर्मूत्रे स्रवो योनौ स्याद् वरावयवो वलिः ॥ ५० ॥

सृणीकायां तु लाला स्यादास्यासवश्च सक्थनि ।
ऊरुर्नितम्बे आरोहो रक्ते विस्रमसृक् नृपे ॥ ५१ ॥

रसावासव उर्वीशो राट् च सर्वसहेश्वरः ।
युधिष्ठिरे च शल्यारि-रर्जुने वासविः स्मृतः ॥ ५२ ॥

कर्णे सौरिः शातवाहे हालः सशयनासने ।
औशीरं शयने शय्याऽलक्ते यावोऽवतंसके ॥ ५३ ॥

शिरःस्रगंशुके वासः कटके वलयो भवेत् ।
मुक्तालतायां हारः स्याद् मञ्जीरे हंस इष्यते ॥ ५४ ॥

स्थूलशाटे वराशिः स्यात् सूपकारे तु वल्लवः ।
षण्ढे वर्षवरः शत्रावरिर्वैर्यपि चासुहृत् ॥ ५५ ॥

विरोधे वैरं मित्रे च वयस्यः सवयाः सुहृत् ।
पौरुषे शौर्यं नेपथ्ये वेषो दण्डे तु साहसम् ॥ ५६ ॥

सर्जरसे रालः स्यात् सर्वरसः सुरभिचूर्णके वासः ।
वरधूपे श्रीवासः पार्थिवभागे बलिः सैन्ये ॥ ५७ ॥

शिविरं बलं विविक्ते रहश्च वंशोद्भवे वंश्यः ।
गुह्ये रहस्य-मश्वारोहेऽश्वारोऽश्ववारोऽपि ॥ ५८ ॥

सहस्रेण समं योद्धा स साहस्र सहस्र्यपि ।
चापे शरास इष्वासो बाहुत्राणे तु बाहुलम् ॥ ५९ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चक्रेऽरिः करवालेऽसि शिलीमुखे त्विषुः शरः ।
शरीररुहवाहश्च तूणीरे तु शराश्रयः ॥ ६० ॥

तोमरे सर्वला ज्ञेया शङ्कौ शल्यं त्रिशीर्षके ।
शूलं लक्ष्ये शरव्यं च स्थाम्नि शौर्यं बलं सहः ॥ ६१ ॥

सुहृत्कटक आसारो रणे संयद्-युदाहवाः ।
विप्रे रसासुरो यज्ञे सवो वर्हि-र्द्विजाधमे ॥ ६२ ॥

वीरहा देवदेये च हव्यं नैवेद्यके बलिः ।
वृत्ते शीलं क्षत्रिये तु बाहुसू-र्वाहवोऽपि च ॥ ६३ ॥

वैश्येषु विश उरव्या आर्याः शुद्रेंऽह्रिसूस्तथा ।
वृषभः कर्षके सीरी हली लाङ्गलके हलम् ॥ ६४ ॥

सीरो मद्ये सुरा हाला हारहूर मिराऽऽसवः ।
गोपाले वल्लवो रज्जौ शुंवं शुल्वं च पामरे ॥ ६५ ॥

वर्वरः कल्यपाले च वारिवासः पुलिन्दके ।
शवरो युग्ये वाह्यं स्याद् वह्यं वाहोऽपि कथ्यते ॥ ६६ ॥

भुवि सर्वंसहो-र्वी-ला सलिलेशाम्बरा रसा ।
विश्वाऽथ सर्वसस्यायां धरायामुर्वरा मता ॥ ६७ ॥

इरिणे तूषरं देशे विषयो जिनमन्दिरे ।
विहारो भवने शाला वास आलय आश्रयः ॥ ६८ ॥

पुरे वेश्याश्रयो वेशः पक्वणे शबरालयः ।
खरकुट्यां तु शिल्पा (?) स्याद्-मण्डपे तु विशाश्रयः ॥ ६९ ॥

देहल्यामुम्बरः स्तम्भाद्यधःकाष्ठे शिलाऽभिधा ।
कोणेऽश्रिः कपाटेऽररमररिश्च धराधरे ॥ ७० ॥

अहार्य-शैलौ तद्भेदे सुवेलः कनकाचले ।
स्व-शैलो हि सुराहार्यः पाषाणे तु शिला स्मृता ॥ ७१ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

..............................................।
उज्जयिन्यां विशाला स्यात् सरोबन्धे तु संवरः ॥ ७२ ॥

आलि-रुञ्छे शिलः क्षेत्रभेदे व्रैहेयमुच्यते ।
यव्यं हल्यं च शालेयं प्राकारे साल इष्यते ॥ ७३ ॥

स्थाल्यामुषाऽथ वार्द्धान्यां चाऽऽलूर्भ्राष्ट्रेऽम्बरीषवाक् ।
वर्द्धमाने शरावश्च तीक्ष्णे लोहमयस्तथा ॥ ७४ ॥

शैलसारं शिलासरं ताम्रे शुल्वं भुजङ्गमे ।
सीसं रूप्ये शशी हंसः त्रपुणि स्याच्च सिंहलम् ॥ ७५ ॥

सुवर्णे रा वसुः कांस्ये सुरवैर्याह्वमभ्रके ।
वारिवाहाम्बराह्वाः स्युः पारदे च रसोऽञ्जने ॥ ७६ ॥

सौवीरं पित्तलायां चाऽऽरो रीरी रीरिरित्यपि ।
शुल्वारिर्गन्धके ज्ञेय-स्ताले चाऽऽलं मणौ वसु ॥ ७७ ॥

वज्रे हीरः स्वरुः शंवः सूर्यकान्ते रवेः शिला ।
आश्रयाशशिला चन्द्रकान्ते शशिशिला जले ॥ ७८ ॥

सलिलं संवरं वारि वारिवाहरसो रसः ।
वारम्बु हिमेऽवश्यायोऽनच्छे त्वाविलमम्बुधौ ॥ ७९ ॥

वारीशो वारिराशिश्च सरस्वान् सलिलालयः ।
महातरङ्गे तूल्लोलो लहरी तोयवर्द्धने ॥ ८० ॥

वेला तडागे सरसी सरो नद्यां वहा सरित् ।
गङ्गायां स्वर्वहा श्रीशांह्रिसूः सुरसरिद् मता ॥ ८१ ॥

कालिन्द्यां सूर्यसू-स्श्चवैरिवाहस्वसाऽपि च ।
नर्मदायां तु रेवा स्यात् शशिसूश्च नदे वहः ॥ ८२ ॥

स्थानके त्वालवालः स्या-दावालो निर्झरे सरिः ।
उपकूपजलाधारे-त्वाहावः प्रस्रवे स्रवः ॥ ८३ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रवाहे वाहो वह्नौ च हव्यवाड् हव्यवाहवाक् ।
हव्याशो हविराशश्च हव्याशी हविराश्यपि ॥ ८४ ॥

वायुसुहृदाऽऽश्रयाशो बर्हिः स्वाहावरो वसुर्बहुलः ।
वाडववह्नौ चौर्वः स्फुलिङ्गके हव्यवाहलवः ॥ ८५ ॥

धूमे च वायुवाहः स्याद् वाते श्वासश्च वायुना ।
वृक्षे रसारुहः साल इलासू-र्वसु-रङ्कुरे ॥ ८६ ॥

रोहोऽथ स्कन्धशाखायां साला शाला च पल्लवे ।
वर्हं परागे तु रसः फले सस्यमुदाहृतम् ॥ ८७ ॥

बीजकोश्यां शिंबि-शिंबे पिप्पले श्रीरसारुहः ।
हर्यावासो वटे स्वेशाश्रयो बह्वंह्रिराम्रके ॥ ८८ ॥

रसालः श्रीफले बिल्वः सर्जके साल उच्यते ।
वीरणीमूले तूशीरं वेणौ वंशः प्रकीर्तितः ॥ ८९ ॥

कृतमाले वृष (?) स्तुम्ब्यामलाबू-राटरूषके ।
वासा श्लेष्मातके शेलुरामलक्यां शिवाध्वनिः ॥ ९० ॥

द्राक्षायां हारहूरा स्याद् वाले ह्रीवेरमम्बुजे ।
सरोऽम्बु सरसी-वारि-वारादिभ्यश्च रुड्-रुहौ ॥ ९१ ॥

सहस्रबर्हं नील्यां तु शैवालं शैवलं तथा ।
शेवालं शेवलं धान्ये सस्य-मश्वप्रिये यवः ॥ ९२ ॥

कलमप्रमुखे शालिर्मुद्गे तु हरितो हरिः ।
माषे वृष्यो वली सीत्ये व्रीहिस्तस्मिंश्च पाटले ॥ ९३ ॥

आशुः स्यात् कणिशे सस्यशीर्षं गोधूमके पुनः ।
........................वलश्च शितशिम्बिके ॥ ९४ ॥

वल्लं रक्तफलायां तु बिम्बी स्यात् चिर्भिटीषु च ।
एर्वारुः काकमाच्यां तु वायसी क्ष्वेडके विषः ॥ ९५ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रसस्तस्य विशेषे स्तो हालाहल-हलाहलौ ।
इक्षौ रसालो दर्भे च बर्हि-मुञ्जे शरःस्मृतः ॥ ९६ ॥

दूर्वायां च रुहा घासे यवसं च जलौकसि ।
शिली मर्कटके लालास्रावो वै वृश्चिके त्वलिः ॥ ९७ ॥

भृङ्गे रसांह्री रोलम्बोऽलिरली वृषभे वृषः ।
गव्युस्रो-षा कुर्कुरे श्वा महिषे वाहवैरिणा ॥ ९८ ॥

हरिवाहो लुलायोऽपि करभे शिशुनामभृत् ।
शलः खरे च वालेयं इडिक्के शिशुवाहवाक् ॥ ९९ ॥

कोले वराहः सिंहे च हरिर्दुष्टमतङ्गजे ।
व्यालो हिंस्रे पशौ व्यालो हस्तिन्यां कथ्यते वशा ॥ १०० ॥

गजबन्धक्षितौ वारि घोटकेऽश्वो हयो हरिः ।
वाहोऽर्वा वाडवायां चाऽश्वाऽश्वे पीयूषवर्णके ॥ १०१ ॥

सेराहः पीतदेहे च हरियश्चित्रिताङ्गके ।
हलाहः कृष्णजङ्घेषत्पाण्डुकायिन्युराहवाक् ॥ १०२ ॥

कृष्णजानौ मनाग्पीते चोलाहः शुभ्रकेसरे ।
पाण्डुपुच्छे वोल्लाहो वेगसरे च वेसरः ॥ १०३ ॥

सृगाले हूरवः क्रोष्ट्यां शिवा स्याद् वानरे हरिः ।
मृगभेदे भवेदृश्यो रोहिषः संवरोऽपि च ॥ १०४ ॥

शल्यके शललः शल्य-स्तच्छलाकाभिधा शलम् ।
शललं मूषिकारातौ विलालो मृदुलोमके ॥ १०५ ॥

शश आखौ वृषः सर्पे विषवाहो विलेशयः ।
अहृस्वलोलो व्यालोऽहिर्वाय्वाश्याऽऽशीविषोऽपि च ॥ १०६ ॥

शालूराररिहीशे चाशीविषाश्यलगर्दके ।
वार्व्यालोऽजगरे च स्याद् वाहसः शयुरित्यपि ॥ १०७ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अनन्तेऽहीश शेषौ स्तः सहस्रशिरसा सह ।
भुजङ्गमस्य दंष्ट्राया-माशीः स्याद् नकुलेऽहिहा ॥ १०८ ॥

व्यालवैरी विहङ्गे च स्युर्वयो वि विहायसः ।
पक्षे शरीररुहकं मयूरे व्यालवैरिणा ॥ १०९ ॥

वारिवाहसुहृद् बर्ही पिच्छे बर्हं तदीयके ।
काके च वायसो वल्याहारो वल्याशिना सह ॥ ११० ॥

हंसस्य दयिता हंसी वरला वारलाऽपि च ।
सारसस्य तु सारस्याऽऽट्यां शरारिः शुके भवेत् ॥ १११ ॥

सस्याशी दर्दुरे शालु-शालूर हरयास्तिमौ ।
विशारः संवरो नक्रे चाऽऽलास्यो वार्वराहवाक् ॥ ११२ ॥

उद्रे वारिविलालः स्याद् वसी ग्राहेऽवहारकः ।
पाताले च वलि-व्यालपरा विश्वाश्रयालयाः ॥ ११३ ॥

रन्ध्रे विवरं शुषिरं शुषिर्विलं जगत्यपि ।
विश्वं प्राणे शिवो ज्ञेयः श्वसिते श्वास आहरः ॥ ११४ ॥

सन्देहे संशयो दोषे त्वास्रवो मानसे च हृत् ।
पापेंऽहः सहजे शीलं धर्मे श्रेयो वृषः शुभे ॥ ११५ ॥

विधावयस्तुषारे च शिशिरस्त्विन्द्रियार्थके ।
विषयोऽक्षे च विषयि शब्दे च स्वर आरवः ॥ ११६ ॥

रवः संराव आरावो विरावस्तुरगध्वनौ ।
हेषा ह्रेषाऽथाभिप्राये चाशयो लवणे सरः ॥ ११७ ॥

कषाये तुवर (?) श्वामगन्धे विस्रं च पिङ्गले ।
श्यावो हरिर्नीलपीते हरितो हरिरित्यपि ॥ ११८ ॥

कर्बुरे शबलो व्राते विसर-व्यूह-राशयः
वारोऽपि तुरगस्तोमेऽश्वीय-माश्वं च पुष्कले ॥ ११९ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

बहुलं बहु पङ्क्तौ त्वावलिरालिः कणे लवः ।
लेशः पृथौ विशालं स्यादुरु बृहत् समुच्छ्रये ॥ १२० ॥

आरोहो वामने ह्रस्वो विस्तारो व्यास उत्तमे ।
वरं वर्यं समीपे स्यात् सवेशोऽथ मनोहरे ॥ १२१ ॥

हारि सान्द्रे वहलं श्रेष्ठे श्रेयान् परिक्रमे ।
विहार ईर्या शयने विशायोऽथावमानने ॥ १२२ ॥

अवहेलं समस्ते स्तो विश्वाऽशेषौ स्वनिर्गमे ।
व्ययो विघ्ने व्यवायः स्यात् प्रस्तावेऽवसरः क्षणे ॥ १२३ ॥

वेला वारौ वि'भूषायां श्रीर्भागेंऽशो वृतौ वरः ।
कुटिलेऽराल माटोपे चावेशो लवने लवः ॥ १२४ ॥

व्यक्तौ विशेषः स्पर्द्धायां संहर्षः शिखरे शिरः ।
शीर्षं मूलेंऽह्रिरुदरेरेखायां वलिरस्थिरे ॥ १२५ ॥

लोलो वामाङ्के सव्य-मृजौ सरल उच्यते ।
अवष्टम्भेऽवलम्बः स्यादालम्बः कालविस्तरे ॥ १२६ ॥

विलम्बः परिरम्भे च संश्लेषः स्याद् निरन्तरे ।
अविरलं भवेद् मोक्षे शिवं श्रेयोऽव्ययं तथा ॥ १२७ ॥

विश्वशीर्षं विश्वहर्ष रसा स्यादव्ययालयः ।
भव्ये स्वश्रेयसं श्रेयः शिवं च श्वोवसीयसम् ॥ १२८ ॥

अथाऽव्ययानि भण्यन्ते स्वर्गे स्व-र्निकटे हिरुक् ।
रजन्यां रजनीप्रान्ते चोषा सम्बोधने तु रे ॥ १२९ ॥

अरे अयि च हे है च हंहो देवहविर्हुतौ ।
श्रौषट् वौषट् वषट् स्वाहा प्रकाशे त्वावि-रल्पके ॥ १३० ॥

ईषद् वितर्कणे त्वाहो निश्चयेऽवश्यमिष्यते ।
सत्वरे चाशु सहसा स्राग् बाह्ये बहिरेष्यति ॥ १३१ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दिने श्वोऽतीतेऽह्नि ह्यः स्याद्वरेऽर्वाग् दिनात्यये ।
सायं नित्यं भवेत् शश्वदनुमतौ निगद्यते ॥ १३२ ॥

ओ मां च विषादे हाऽहह चित्रे तु ही अहो ।
उपमानार्थमिव वा पूर्णेह्रेश्च वै ह हि ॥ १३३ ॥

सूरि श्रीजिनवल्लभान्वयवियद्राजीविनीजीविता-
धीश श्रीजिनदत्तसूरिचरणद्वन्द्वारविन्दालिनः ।
शिष्यः पूज्यजिनप्रियस्य सुगुरोर्वर्गाक्षरैरुज्झिता-
मेनां श्रीजिनभद्रसूरिकविराट् चक्रेऽभिधानावलीम् ॥ १३४ ॥

वाचनाचार्यश्रीसाधुसुन्दरगणिविरचितः

# ॥ शब्दरत्नाकरः ॥

## । प्रथमः काण्डः ।

ध्यात्वाऽर्हतो गुरून् प्राज्ञान् वाग्देवीमपि भक्तितः ।
शब्दरत्नाकरं कुर्वे शब्दभेदार्थसंग्रहम् ॥ १ ॥

अर्हद्देवनृतिर्यञ्चो नैरयाः साङ्ककाः समाः ।
अव्ययाश्च क्रमोऽत्रायं लक्ष्यतां सुखलब्धये ॥ २ ॥

भवेज्जिनेऽर्हन्नर्हन्तः सार्वः सर्वीय इत्यपि ।
तीर्थङ्करस्तीर्थकरः परमेष्ठी ठकारयुक् ॥ ३ ॥

वृषभर्षभौ नाभेये, शंभवे संभवोऽपि च ।
एकादशजिने श्रेयान्, श्रेयांसो, द्वादशार्हति ॥ ४ ॥

वसुपूज्य-वासुपूज्यावनन्तोऽनन्तजिद् मतः ।
विंशे जिने मुनिस्तद्वद् मुनिसुव्रत-सुव्रतौ ॥ ५ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अरिष्टनेमौ नेमिश्च नेमी नन्तोऽपि कथ्यते ।
श्रीपार्श्वः पार्श्वनाथश्च, वामेये, चरमेऽर्हति ॥ ६ ॥

महावीरः स वीरश्च, तुर्याहन्तस्य वप्तरि ।
दन्त्यादिः संवरः, कुन्थुबप्पे शूरश्च सुरयुक् ॥ ७ ॥

मरुदेवा मरुदेव्यप्याद्यार्हन्मातरि स्मृता ।
तालव्यमध्या त्रिशला, पञ्चमार्हदुपासके ॥ ८ ॥

त्र्युकारस्तुम्बुरुश्चक्रेश्वर्यामप्रतिचक्रिका ।
अजिताऽजितबलायां, सुतारा तु सुतारका ॥ ९ ॥

निमीश्वरोऽर्हद्विशेषे द्वीकारोऽथ कृतार्घके ।
तुर्यहल्, शूरदेवस्तु दन्त्यतालव्यसादिमः ॥ १० ॥

संवरो दन्त्यसादिः स्यात्, भद्रकृद् भद्र उच्यते ।
मोक्षे श्रेयः शिवं तालव्यादी, निःश्रेयसं पुनः ॥ ११ ॥

मध्यतालव्ययुक्, साधौ साधन्तः साधयन्तकः ।
रिष्यृषी यति-यतिनौ श्रमण-श्रवणौ तथा ॥ १२ ॥

मुनिस्वे तप-तपसी अदन्त-सान्तके स्मृते ।
प्रायश्चित्तं प्रायश्चित्तिः पापसंशोधके तपे ॥ १३ ॥

शिष्यः शिक्षु-शैक्षो तालव्याद्याश्छात्रे च तद्विदि ।
व्रतादाने परिव्रज्या प्रव्रज्याऽप्यभिधीयते ॥ १४ ॥

क्षपणे नग्न-नग्नाटौ श्रमणः श्रवणोऽपि च ।
क्षेमे मद्रं भद्र-भन्द्रे प्रशस्तं शस्तमित्यपि ॥ १५ ॥

भावुकं भविकं भव्यं शिवं च श्वोवसीयसम् ।
श्रेयः स्वःश्रेयसं तालव्यादयः, कुशलं पुनः ॥ १६ ॥

मध्यतालव्यकं प्रोक्तं, सुभं तालव्य-दन्त्ययुक् ।
मङ्गल्यमपि माङ्गल्यं मङ्गलं च तथा स्मृतम् ॥ १७ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

## । द्वितीय: काण्ड: ।

स्वर्गे स्वस्त्रिदिवोऽस्त्री द्युर्दीदिवर्दिदिवर्दिविः ।
द्यो-दिवौ दिवमित्युक्तं त्रिविष्टप-त्रिपिष्टपे ॥ १ ॥

तात्तातो विषस्तविशं विहेलिम-विशेलिमौ ।
सुरे दिवोका दिवौकास्तौ विहङ्गेऽपि, दैवतः ॥ २ ॥

देवताऽऽदित्याऽऽदितेयौ, सुधाऽभिनवदुग्धयोः ।
पीयूषमपि पेयूषं, व्यन्तरा वानमन्तराः ॥ ३ ॥

असंयुक्ततकारः स्याद् वेतालो व्यन्तरान्तरे ।
मार्तण्डि-मार्ताण्डौ मार्तण्डोऽर्क एतश ऐतशः ॥ ४ ॥

तुविर्भुविश्च द्वौ सान्तौ तपनस्तापनो भगः ।
भर्गो हरिर्हरिद्भानु-भानू पेरुश्च पारुवत् ॥ ५ ॥

भासन्तो भासयन्तोऽगो नगवत् तरु-शैलयोः ।
भुजगेऽप्यंशुराशुश्च महिरो मिहिरस्तथा ॥ ६ ॥

मुहिरो मुदिरस्तद्वद् मुचिरः सहुरिस्तथा ।
मुहुरिः सृणि-सरणी अव्यवी स्योन-स्यूनकौ ॥ ७ ॥

प्रद्योतनो द्योतनश्च वृषाकपि-कपी अरुः ।
अरूषो रुषज-रूषौ दिवि-द्युभ्यां परो मणिः ॥ ८ ॥

सूरस्तालव्यदन्त्यादिस्तालव्यादिः शुचिर्वृकः ।
कोद्रिरिन्द्रोऽप्यरुः सान्तः किरणे द्युद्-द्युती रुचिः ॥ ९ ॥

रोची रुक् शुचियुक् शोचिर्भा-भासौ भाः प्रभा विभा ।
त्विट्-त्विषी प्रश्नि-पृष्णी च धृष्णिरभीश्वभीषुकौ ॥ १० ॥

रोचिः शोचिरिसन्तौ द्वौ, मयूखो ह्याद्यवर्ग्यखः ।
प्रकाशे द्योत उद्द्योतः, सान्तोऽदन्तो महो महः ॥ ११ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

धाम नान्तमदन्तं च, ताविषं तविषं तथा ।
बलेऽप्यथो विधौ राजा राजराजश्च चन्दिरः ॥ १२ ॥

चन्द्र-चन्दौ चन्द्रमसाऽमा विकुस्र-विकस्रकौ ।
विक्रस्रः सोम-सोमानौ यज्ञपेयरसेऽपि च ॥ १३ ॥

लाञ्छने लक्ष्मणं लक्ष्म, लक्षणं, चन्दिरातपे ।
चन्द्रिका चन्द्रिमाऽपि स्यात्, मण्डले मण्डली मता ॥ १४ ॥

नक्षत्रे तारका तारा निरिकाराऽत्र तारका ।
अश्वयुज्याश्वकिनी चाश्विनी स्युः कृत्यका बहौ ॥ १५ ॥

बहुलाश्च मृगशीर्षे मृगमार्गौ मृगाच्छिरः ।
मृगशिराऽपि शीर्षस्थास्तारकास्तस्य त्विल्वलाः ॥ १६ ॥

इन्वका मित्रदेवायामनुराधाऽनुराधिका ।
तृतीयवर्गद्वितीययुग् ज्येष्ठा मूल आश्रयः ॥ १७ ॥

तालव्यदन्त्ययोराप्यामषाढा ह्रस्वपूर्विका ।
श्रविष्ठा च धनिष्ठापि त्रिकवर्गद्वितीययुक् ॥ १८ ॥

तद्वत्प्रोष्ठपदा लग्नत्रिभागे तु दृकाणवत् ।
द्रिक-द्रेक्काण-दृक्काणाः, बुधे चान्द्रमसायनिः ॥ १९ ॥

चान्द्रमसायनश्चापि गुरौ गीर्पति-गीःपती ।
गी≍पति-गीष्पती रेफ-विसर्गगजकुम्भषाः ॥ २० ॥

चतुर्ष्वेषु च वाग् वाग्मी प्रख्या आख्याः प्रचक्षसा ।
सकारान्तास्त्रयोऽमी स्युः, शुक्रे काव्य-कवी भृगुः ॥ २१ ॥

भार्गवेऽप्यर्कपुत्रे तु शनैश्चर-शनी-शनैः ।
अव्ययं, सौरि-सौरौ द्वौ, दन्त्य-तालव्यपूर्वकौ ॥ २२ ॥

राहौ स्वर्भाणु-स्वर्भानू तमास्तमस्तमोऽपि च ।
द्वौ सान्तौ तृतीयोऽदन्तो, ध्रुव उत्तानपादकः ॥ २३ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

औत्तानपादिः, कौम्भौ तु, मैत्रावरुणि-वारुणी ।
मैत्रावरुण आग्नेय अग्निमारुत इत्यपि ॥ २४ ॥

अगस्त्येऽगस्तिरेकोक्त्या शशि-भास्करयोः पुनः ।
पुष्पदन्तौ पुष्पवन्तावुपलिङ्गमुपद्रवे ॥ २५ ॥

उपालिङ्गं रिष्य-ऽरिष्टे माङ्गल्ये चाप्यनेहसि ।
कालेऽतिथोऽतिथः कालविशेषे सुषमा तथा ॥ २६ ॥

दुःषमा षोऽत्र मूर्धन्यः, काष्ठा त्वष्टादश स्मृताः ।
निमेषाष्ठाग्रगो वर्णोऽत्र घट्यां नाडि-नाडिके ॥ २७ ॥

नाडी-नाली-नालिकाश्च, दिने तु दिवसो दिवम् ।
दिवा प्रतिदिवा नान्तौ द्युरस्त्र्यव्ययमप्यहः ॥ २८ ॥

अह्नयहे ङ्यन्त-टाबन्तावहः सन्तोऽथ वासरः ।
वाश्रश्च दन्त्य-तालव्यमध्यौ घस्रश्च हस्रयुक् ॥ २९ ॥

दिवाव्ययं सप्तम्यर्थे, व्युष्टे कल्यं सकाल्यकम् ।
उषः प्रत्युषसी सान्तौ प्रत्यूषोऽपि प्रगेऽव्ययम् ॥ ३० ॥

प्राह्णे पूर्वेद्युरेतौ च गोस-गोसर्गकौ समौ ।
मध्याह्ने तु दिवामध्यं मध्यं मध्यंदिनं तथा ॥ ३१ ॥

दिनावसाने सायोऽस्त्री सायं स्याद् मान्तमव्ययम् ।
पितृप्रस्वां सन्धा सन्ध्या सन्धिश्चापि विभावरौ ॥ ३२ ॥

विभावरी निशा निट् च निशीथश्च निशीथिनी ।
निशीथ्या वासुरा मध्यदन्त्य-तालव्ययुक्, तमिः ॥ ३३ ॥

तमी तमा तामसी च वसतिर्वासतेय्यपि ।
शार्वरी सर्वरी दन्त्यतालव्यादिरुषा उषः ॥ ३४ ॥

उसास्त्रयोऽमी सान्ता स्युरुषा दोषाऽप्यनव्यये ।
अव्यये च तथाऽऽदन्तौ, रजनी रजनिः स्मृता ॥ ३५ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्रियामा यामिनी यामा याम्या रात्री च रात्रियुक् ।
नक्ता नक्तं तथा नक्तं मान्तमव्ययमप्यथो ॥ ३६ ॥

ज्योत्स्नायुक्तक्षपायां तु, ज्योत्स्नी ज्योत्स्नापि, दर्शनिट् ।
तमिस्रा दन्तसंयोगा द्युः पक्षी निड्द्वयावृतः ॥ ३७ ॥

ध्वान्ते तमं तमोऽदन्तौ, तमसं तमसस्तमः ।
सान्तं, तमिस्रा तमिस्रं, सदन्त्यौ, तिमिरं तथा ॥ ३८ ॥

सन्तमसा-ऽवतमसे अन्धातमसमन्धतः ।
तमसं चाऽन्धकारान्धे भूच्छायमनृलिङ्गकम् ॥ ३९ ॥

तुल्याहर्निशि विषुशो विषुवद् विशुवं तथा ।
विषुवं, बहुलः कृष्णपक्षे मध्य उकारवान् ॥ ४० ॥

पूर्णिमायां पौर्णमासी, दर्शेऽमावास्यमावसी ।
अमावस्याऽमाऽमावास्या, नष्टेन्दौ तु कुहुः कुहूः ॥ ४१ ॥

चतुर्दशी विध्वदर्शे शिनीवाली सयुग्मभाक् ।
मासे माः स्याद् वर्षकोशो वर्षांशकयुतस्तथा ॥ ४२ ॥

मार्गशीर्षे मार्ग-सहौ सहाः सान्तोऽथ माघके ।
तपाः सान्तो ह्यस्त्रियां स्यात्, फल्गुनाले तु फाल्गुनः ॥ ४३ ॥

फल्गुनश्च फाल्गुनिको, मधौ चैत्रः सचैत्रिकः ।
शुक्रे तु ज्येष्ठा-मूलयोर्ज्येष्ठ-ज्यैष्ठौ त्रयोप्यऽमी ॥ ४४ ॥

त्रिकवर्गद्वितीयाप्तषसंयोगाः, शुचौ पुनः ।
अषाढ आषाढोऽपि स्यात्, नभसि श्रावणः स्मृतः ॥ ४५ ॥

श्रावणिकोऽथ नभस्ये भाद्र-भाद्रपदौ समौ ।
प्रौष्ठपदस्त्रिकवर्गद्वितीयाप्तो ह्यथाश्विने ॥ ४६ ॥

अश्वयुज आश्वयुजो, बाहुले कार्तिकस्तथा ।
कार्तिकिकः प्रशलर्तौ हेमन्तो नान्तहेमयुक् ॥ ४७ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शैष-शिशिरौ तालव्योपेतौ ग्रीष्मर्तुरूष्मकः ।
ऊष्मायण ऊष्मा नान्त उष्ण उष्णागमोष्णकौ ॥ ४८ ॥

प्रावृषि प्रावृषा वर्षा बहुत्वे वरिषास्तथा ।
घनात्यये तु शरदा शरच्चाब्दे तु वत्सरः ॥ ४९ ॥

उद्वत्सर-संवत्सर-परिवत्सर-वत्सराः ।
अनुसंवत्सरो विवत्सरो वत्सोऽपि वर्षवत् ॥ ५० ॥

वरिषः शारदोपेता शरत् संवदनव्ययम् ।
अव्ययं च, समा स्त्रीत्वे वा बहुत्वे च तद्विदि ॥ ५१ ॥

इड्वत्सरेडावत्सरौ क्षये कल्पान्तकल्पकौ ।
संवर्तः परिवर्तश्च सांदृष्टिक-सांमृष्टिके ॥ ५२ ॥

तात्कालिकफले प्रोक्ते, आकाशे द्यो-दिवौ द्यु च ।
क्लीबं सन्तं नभश्चापि नभसो नभसं तथा ॥ ५३ ॥

अन्तरिक्षमन्तरीक्षं मेघे घन-घनाघनौ ।
ऋज्ञसानो रिज्ञसान उभ्रोऽभ्रमब्धमित्यपि ॥ ५४ ॥

गडयित्नुर्गदयित्नुर्वारितो वाह-वाहनौ ।
पर्जन्योऽष्टमवर्ग्याप्तोऽब्दमालायां तु कालिका ॥ ५५ ॥

काली वृष्ट्यां वर्षणं स्याद्वर्षं तद्विघ्नके त्ववात् ।
ग्रह-ग्राहौ, घनोपले तु करः करकस्त्रिषु ॥ ५६ ॥

आशायां दिग्-दिशे काष्ठा त्रिकवर्गद्वितीयभाक् ।
ककुभा ककुब् याम्याशाऽपाच्यवाची दिगन्तरे ॥ ५७ ॥

विदिक् प्रदिक् चापदिशं प्राक्-प्राचीने समे मते ।
अपाचीनमपाक् प्रत्यक् प्रतीचीनमुदक् तथा ॥ ५८ ॥

उदीचीनमपाक् प्रत्यक् प्रागुदगव्ययान्यपि ।
इन्द्रे मघवा मघवान् मघवन् दल्मि-वल्मिकौ ॥ ५९ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नान्तौ सुत्रामा सूत्रामा हर्यश्वो हरिमान् हरिः ।
बिडोजाः स्याद् बिडौजाश्च सन्तौ, वृत्रश्च वृत्रहा ॥ ६० ॥

पर्जन्यः पूर्ववन्नान्तो वृषा दन्त्यद्वयान्वितः ।
तालव्यद्वयवानाद्यतालव्यश्च तृतीयकः ॥ ६१ ॥

शुनाशीरः स्मृतेन्द्राण्यां महेन्द्राणी सची शची ।
शचिर्वासवौ जयन्तः जयदत्तो जयस्तथा ॥ ६२ ॥

इन्द्रपुत्र्यां ताविषी स्याद् वात्यायां च तविष्यपि ।
इन्द्रहस्तिन्यैरावण, ऐरावतः, ऋजौ धनौ ॥ ६३ ॥

इन्द्रस्यर्जुरोहितं स्याद् रोहितं पारिभद्रके ।
मन्दार-मन्दरौ तद्वद्, मन्दारुश्च, पवौ शृणिः ॥ ६४ ॥

सृणिश्च वह्लावप्येतौ, भिदिरं भिदुरं भिदुः ।
भिदि-भेदी दिभिः शम्ब-सम्बौ शाम्बः शतारकः ॥ ६५ ॥

धारः शित-शतात्, वज्रोऽस्त्रियां वज्राशनिर्द्वयोः ।
अशनिर्द्वयोराशनः, स्वार्थे प्रज्ञाद्यणा, शरुः ॥ ६६ ॥

स्वरु-श्वरू उदन्तौ द्वौ स्वरुः सान्तोऽथ षण्ढके ।
व्याधाम नान्तं, व्याधामोऽदन्तः पुंसि च, दस्रयोः ॥ ६७ ॥

अश्विनावाऽश्विनेयौ च, देवत्वष्टरि विश्वकृत् ।
विश्वकर्मापि, स्वर्वध्वां, वा स्त्री भूम्यप्सरा मता ॥ ६८ ॥

ऊर्वसी दीर्घ-ह्रस्वादिर्दन्त्य-तालव्यभाक् क्रमात् ।
गन्धर्वो गायने दैवे गान्धर्वोऽपि च तद्विदि ॥ ६९ ॥

अव्ययाऽनव्ययौ हाहा हाहाः सान्तोऽप्यथो हहाः ।
हुहुर्द्विह्रस्वो हूहूश्च द्विदीर्घोऽव्ययमप्यथो ॥ ७० ॥

हाहाहूहूरित्यखण्डं, नामैके, शमने यमः ।
यमराजो यमराट् च, संयमनी त्र्यकारयुक् ॥ ७१ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शङ्खावश्रपोऽन्तर्दन्त्योपि, हनुषो हनूषवत् ।
रात्रिचरो रात्रिचरो, नृचक्षाः ख्याश्च चक्षसा ॥ ७२ ॥

त्रयः सान्ता अन्त्यषण्ढाः, क्रव्यात् क्रव्यादसंयुतः ।
जातुधानो यातुधानो जातु यातु च षण्ढकौ ॥ ७३ ॥

कर्बुरः कर्बरो रक्षः राक्षसोऽप्याशराऽऽशिरौ ।
तज्जनन्यां तु निकसा निकषा खषया सह ॥ ७४ ॥

वरुणे यादःपतियुक् यादसांपतिरप्पतिः ।
अपांपतिर्धनदे त्वैडविडैलविलौ समौ ॥ ७५ ॥

कैलासौका मध्यदन्त्यो नराद् वाहण-वाहनौ ।
तद्विमानं पुष्पकं स्याद् मूर्द्धन्यौष्ठ्यकयोगयुक् ॥ ७६ ॥

वस्वोकसारा तत्पुर्यामोकःशब्दे सलोपभाक् ।
वित्ते ऋक्थं रिक्थमृक्तं रिक्तः सान्तं नपुंसके ॥ ७७ ॥

सारेऽस्त्रियां निधाने तु शेवधिर्नर-षण्ढभाक् ।
शङ्करे जोटी जोटीङ्गो गिरीशो गिरिशो हरः ॥ ७८ ॥

हीर ईशान ईशश्च वामदेवश्च वामयुक् ।
अहिर्बुध्नो बुध्नकाही महाकालः सकालकः ॥ ७९ ॥

भर्गो भार्गो भर्ग्यः शर्व-सर्वौ महेश्वरेश्वरौ ।
भीम-भीष्मौ च, तच्चापे, त्वजकावमजीजकम् ॥ ८० ॥

अजगावमाजगवं भवेदजकवं तथा ।
अजगवं, गणेष्वस्य, पार्षद्याः पार्षदा अपि ॥ ८१ ॥

पारिषद्याः पारिषदा, मृडान्यामीश्वरेश्वरी ।
कैटभी कैटभा दुर्गा दुर्गमा वरदा वरा ॥ ८२ ॥

अपर्णा चैकपर्णायुग् गौरी गौरा शिवी शिवा ।
भद्रकाली महाकाली काली काला च कालिका ॥ ८३ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

हिमा हैमवतीयुक्ता विकराला करालिका ।
महारौद्री सरौद्रीका जयन्ती विजया जया ॥ ८४ ॥

महाजया नन्दयन्ती नन्दिनी नन्दयाऽन्विता ।
सुनन्दा कुला नकुली, भैरव्यां चर्ममुण्डिका ॥ ८५ ॥

चामुण्डा चण्डमुण्डा च चर्च्चा चर्च्चिः सचर्चिका ।
स्कन्दे गाङ्गायनिर्गाङ्गो गाङ्गेयो भीष्मकेऽप्यमी ॥ ८६ ॥

भृङ्गिगणे भृङ्गिरिटिर्भृङ्गिरीटिश्च, तण्डुके ।
नन्दीश-नन्दिनौ नन्दिः, कमने क-कवी विधिः ॥ ८७ ॥

विधा वेधाश्च द्वौ सान्तौ सर्वविद्-विदुषोरपि ।
विरिञ्चन-विरिञ्ची च विरिञ्चः परमेष्ठियुक् ॥ ८८ ॥

परमेष्ठस्त्रिकवर्गद्वितीयकलितावमू ।
नाभिभूर्नाभिजन्मा च विश्वसृट् विश्वसृक् तथा ॥ ८९ ॥

द्रुहिणो द्रुघणस्तद्वद् द्रुघनोऽपि च शम्भुयुक् ।
स्वयंभूरथ गोविन्दे नारायण-नरायणौ ॥ ९० ॥

विष्वक्सेनो विश्वक्सेनो वृषाकपि-कपी विधुः ।
वेधा मुकुन्द-कुन्दौ च वासुदेवश्च वासुयुक् ॥ ९१ ॥

जलेशयो जलशयोऽधोक्षजोऽक्षज एकपात् ।
त्रिपाद् द्विपद् एतद्वद् वृषाक्षः सुवृषोऽपि च ॥ ९२ ॥

कपिलो भद्रकपिलः सुभद्रो वासुभद्रकः ।
धन्वी सुधन्वा शतकः शतादाऽऽनन्द-वीरकौ ॥ ९३ ॥

श्रीवत्साङ्कश्च श्रीवत्सस्तदरौ मेन्द-मैन्दकौ ।
कालीयः कालियश्चास्य गदा कौमोदकी स्मृता ॥ ९४ ॥

कौपोदकी कौवोदकी, कृष्णमातरि देवकी ।
दैवकी, बलभद्रे तु, भद्राङ्गो बलिना बलः ॥ ९५ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पद्मायामीरी आ या च कमला कमलीन्दिरा ।
इन्दिः श्री-लक्ष्म्यौ क्विब्यन्तौ, यरौ शम्बर-संबरौ ॥ ९६ ॥

शूर्पकश्चादितालव्यः, ऋष्याङ्कः कामनन्दने ।
मूर्द्धन्याद्यान्तः स्थिकभागूषोषा बाणपुत्रिका ॥ ९७ ॥

शम्ब-शाम्बौ जम्बुवत्याः, पुत्रे, ताक्ष्र्ये सुपर्णकः ।
सौपर्णेयो गरुडश्च गरुलो गरुटस्तथा ॥ ९८ ॥

सुगते तु महाबोधि-बोधी बुद्ध-बुधौ मुनिः ।
मुनीन्द्रः, सप्तमे बुद्धे, शाक्यसिंहः सशाक्यकः ॥ ९९ ॥

दैत्येऽसुर आसुरश्च सरस्वत्यां गिरा-गिरौ ।
वाग्-वाचे वाणि-वाण्यौ च तालव्याद्या च शारदा ॥ १०० ॥

व्याहारो वचो वचनं, कारके कर्न-कार्मणे ।
ज्ञाताधर्मकथायां स्यात् तकारो दीर्घसंयुतः ॥ १०१ ॥

द्वादशाङ्गे दृष्टिवादो दृष्टिपातोऽपि कथ्यते ।
प्रत्याख्यानप्रवादे तु, प्रत्याख्यातं च, ज्योतिषि ॥ १०२ ॥

ज्योतिषं ज्यौतिषं, भाष्ये, चूर्णि-चूर्ण्यौ समे मते ।
यङ्लुगन्ते चर्करीतं, चर्करितं, कलिन्दिका ॥ १०३ ॥

कडिन्दिका सर्वविद्या, निघण्टुर्नामसंग्रहे ।
निर्घुण्टुश्च, जनश्रुतौ, वदन्ती किंवदन्त्यपि ॥ १०४ ॥

किंवदन्तिर्वदन्तिश्चोदन्ते वृत्तान्त-वार्त्तिके ।
अभिधायां नामधेयं नामाख्याऽभिख्ययाऽऽह्वयः ॥ १०५ ॥

आह्वा, हूतौ तु हक्कार-कङ्कारौ, शपथे शपः ।
शपनं, प्रियबाहुल्ये, चटु चाटु, यथास्थिते ॥ १०६ ॥

तथ्यं यथातथं सम्यक्, समीचीनं च, रूक्षके ।
निष्ठुरं तृतीयवर्गद्वितीययुगवर्णने ॥ १०७ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

निष्पर्यपात्परो वादो, जुगुप्सा च जुगुप्सनम् ।
गर्हणा गर्हणं गर्हो, रतशापे तु क्षारणा ॥ १०८ ॥

आक्षारणा क्षारणं च, क्षरणा, मङ्गलार्थने ।
आशीराशषया चोभे उशत्यशुभवाचि तु ॥ १०९ ॥

रुशती रुषती सर्वे त्रिलिङ्गा वाच्यलिङ्गतः ।
आज्ञायां स्याद् निराङ् निभ्यो देशोऽथाङ्गीकृतौ पुनः ॥ ११० ॥

संध्या स्यात् सन्धया साकं संप्रत्याङ्भ्यः परः श्रवः ।
वर्जे वर्जनं वृजनं, नृत्ये नृत्तं च नर्त्तनम् ॥ १११ ॥

नाट्यं नटनमङ्गविक्षेपेऽङ्गाद् हारि-हारकौ ।
आतोद्ये वाद्यं वादित्रं, तूरं तूर्यं च, वल्लकी ॥ ११२ ॥

तन्त्रीस्तन्त्रिश्च गन्धर्वे त्र्युकारस्तुम्बुरुः स्मृतः ।
मृदङ्गे मार्दलीकश्च, मार्दलो, दुन्दुभौ पुनः ॥ ११३ ॥

भेरिर्भेरी च भेरापि, कुहालायां तु काहला ।
चण्डकोलाहला पत्रकाहला, सुप्तबोधके ॥ ११४ ॥

द्रगडो द्रकटश्चापि, झल्लर्यां झर्झरी स्मृता ।
झलरी, बीभत्सरसे, विकृतं वैकृतं तथा ॥ ११५ ॥

घर्घरे हासिका हास्यं हासश्च हसनं हसः ।
त्रिकवर्गद्वितीयाप्ता स्मिते वक्रोष्ठिका मता ॥ ११६ ॥

शोचने शुक् शुकः शोकः, कोपे क्रोध-क्रुधा-क्रुधः ।
रुषा-रोष-रुषश्चाप्युत्साहे तूद्याम उद्यमः ॥ ११७ ॥

उद्योगोऽप्यभियोगश्च वीर्यं त्वतिशयान्विते ।
वीर्यापि, साध्वसे भीतिर्भीर्भिया भयमप्यथो ॥ ११८ ॥

भयङ्करे भीम-भीष्मे डमरं डामरं तथा ।
उड्डामरमुड्डमरं, शान्तावुपशमः शमः ॥ ११९ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शमथोऽप्यथ रोमाञ्चे पुलकः पुलसंयुतः ।
बाष्पेऽश्वस्रू अस्रमश्रं, चित् तान्ता चेतना, मतौ ॥ १२० ॥

धीर्धीदा प्रतिपत्तिश्च प्रतिपच्छेमुषी पुनः ।
तालव्यादिर्मूर्धन्यान्ता, लज्जायां स्यादपत्रपा ॥ १२१ ॥

त्रपा ह्री ह्रीकया ह्लीका, व्रीडा व्रीडो, मनःखिदि ।
सादाऽवसादौ, निद्रायां, तन्द्रिस्तन्द्रीच तन्द्रया ॥ १२२ ॥

तन्द्रयमी चत्वारः शब्दाः स्युर्मोहाऽऽलस्ययोरपि ।
औत्सुक्य उत्कण्ठौत्कण्ठ्ये, आकारस्य तु गूहने ॥ १२३ ॥

कुटारिका कटिकाऽवाद्, ह्लादे मोदः प्रमोदयुक् ।
मुदाऽऽमोदौ प्रमदश्च संमदोऽपि मदो मुदा ॥ १२४ ॥

हर्ष-प्रहर्ष-हरिषा आनन्दानन्दथू समौ ।
गर्वेऽभिमान-मानौ च विस्मयः स्मय इत्युभौ ॥ १२५ ॥

तद्विशेषेऽहंपूर्वा-पूर्विका-प्रथमिकाऽग्रिकाः ।
व्यायामे तु क्लम-क्लमी परिश्रम-श्रमावपि ॥ १२६ ॥

चिन्तायां चिन्तिया ध्यानं ध्याम नान्तं नपुंसके ।
प्रतिचिकीर्षारूपे तु ध्याने मर्ष आमर्षकः ॥ १२७ ॥

चित्तस्थैर्ये मनस्कारो भवेद् मनसिकारयुक् ।
संभ्रमे त्वरया तूर्णिस्त्वरिस्तर्के वितर्ककः ॥ १२८ ॥

संवेगावेगावूहेहे परामर्शो विमर्शनम् ।
मृत्यौ मृतिः सर्वगे मरि-मारी मरकोऽपि च ॥ १२९ ॥

नटे भारत-भरतौ तथा भरतपुत्रकः ।
स्त्रीवेषधारकनटे भ्रकुंसः सभ्रुकुंसकः ॥ १३० ॥

भ्रूकुंसश्च भृकुंसोऽपि, केलीकिलो विदूषके ।
केलिकिलो वासन्तिक-वसन्तकौ च, हासिनि ॥ १३१ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

केलिकिलः कैलिकिलो, विलासिनि जने पुनः ।
हेलिहिलो हैलिहिलः, आर्ये मारिष-मार्षकौ ॥ १३२ ॥

चेटी-नीचा-सखीह्वाने हण्डे हञ्जे हलाव्ययाः ।
अत्तिकाऽप्यन्तिका ज्येष्ठभगिन्यां, मातरि स्मृता ॥ १३३ ॥

अम्बिकाऽप्यंविका, भट्टारक-भट्टौ तु पूज्यगात् ।
नाम्नः प्रयोज्यौ प्रायेण नाट्योक्तौ नाट्यवाचकाः ॥ १३४ ॥

## । तृतीयः काण्डः ।

पुंसि पूरुष-पुरुषौ पुलषो ना नरोऽपि च ।
मनुष्यो मानुषो मर्त्यो मर्तोऽपि, बालिशः शिशौ ॥ १ ॥

बालः क्षीरात् कण्ठः पश्च स्तनयः सस्तनन्धयः ।
कुमार-कुमरौ दहृ-दहरावथ शैशवे ॥ २ ॥

बाल्यवद् बालिमा पाकं पाकिमा ना, वयस्यके ।
युवा युवानस्तरुणस्तलुनश्चाथ यौवनम् ॥ ३ ॥

यौवनिकापि तारुण्ये, स्थविरे तु जरन् जरी ।
जरन्तश्च जीन-जीर्णावतिवृद्धे दशाम्ययम् ॥ ४ ॥

दशमीस्थोऽथ संस्तान्तः प्राज्ञो ज्ञः प्रज्ञकः कविः ।
कवी स्त्री कविता काव्यो वैदुषो विदुषस्तथा ॥ ५ ॥

विद्वांश्च शूरि-सूरी तु, सूर्येऽपि, बुद्धयुग् बुधः ।
प्रवीणे निष्ण-निष्णातौ नदीष्णः कृतकृत्यकः ॥ ६ ॥

कृती कृतार्थश्च विज्ञोऽभिज्ञो वैज्ञानिकोऽपि च ।
विदग्धे छेक-च्छेकालौ छेकिलश्च कलाविदि ॥ ७ ॥

कलाज्ञश्च कलज्ञोऽपि, क्षुण्णः संस्कृतवाचकः ।
तृतीयवर्गप्रान्त्याप्तो, वक्नुर्वग्नु-वचक्नुकौ ॥ ८ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वाग्मिनि स्यात्, वक्तरि तु, वदावद-वदौ समौ ।
अवाक्श्रुतावेडमूकानेडमूकावनेडकः ॥ ९ ॥

कलमूकश्चान्ध-शठ-मूर्खवाच्यपि सम्मतः ।
सतामनेडमूकश्चाऽस्फुटवाचि तु काहलः ॥ १० ॥

लोहलोऽपि जड-कडौ, ज्ञायके विदुरस्तथा ।
विन्दुस्त्रिक-तुर्यवर्गमध्यौ कटुर-कट्वरौ ॥ ११ ॥

अत्यन्तकुत्सिते, क्षिष्णुर्णान्तो निराकरिष्णुके ।
प्रियंवदे शक्नु-शक्लौ वदान्यश्च वदन्ययुक् ॥ १२ ॥

दानशीलेऽप्यमू, मूर्खे, बालिशो बाडिशो जडः ।
जलो मुहेर-मुहिरावायोऽयःपूर्वशूलिकः ॥ १३ ॥

भवेद् राभसिके, लोकप्रीणके तु पृण-प्रिणौ ।
प्रीणश्च लोकंपूर्वाः स्युः परायत्ते परात्परौ ॥ १४ ॥

वश-वन्तौ गृह्यकश्च गृह्या-ऽऽगृह्यकसंयुतः ।
नायके नेत्र-नेतारावीडीश ईश्वरस्तथा ॥ १५ ॥

पति-पाती ऋज-रिजाविडीडौ डान्तिमावुभौ ।
ह्रस्व-दीर्घादी प्रभुयुग् विभुश्चाप्यथ वेतने ॥ १६ ॥

भृति-भृत्ये भर्म भर्मण्या कर्मण्याऽथ भारिके ।
भारवाड् भारवाहश्चाप्यथो वार्तावहे जने ॥ १७ ॥

वैवधिको विवधिको वीवधिकोऽथ भारके ।
भरो विवधो वीवधः स्यादथो भारयष्टिका ॥ १८ ॥

विहङ्गिका विहङ्गिमा, विक्रान्ते शूर-सूरकौ ।
कातरे भीरुको भीरुर्भीलुकस्त्रस्नु-त्रस्तकौ ॥ १९ ॥

भृशाकुले समुत्पिञ्ज उत्पिञ्जल-कपिञ्जलौ ।
अथो महेच्छेऽनुदार उदारोदात्तकावपि ॥ २० ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दयालौ तु कृपालुः स्यात् कृपारुरनुकम्पने ।
कारुण्यं करुणा हिंस्रे हिंसीरोऽपि, निबर्हणे ॥ २१ ॥

विशारणं विशरणं निर्वासन-प्रवासने ।
उद्वासनं, वधार्हे तु शैर्षच्छेदिकसंयुतः ॥ २२ ॥

शीर्षच्छेद्यो, मृते प्रेत-परेतौ, तदहेऽर्पणे ।
तदर्थं चोर्ध्वदेहिकमौर्ध्वदेहिकमित्यपि ॥ २३ ॥

ऊर्ध्वदैहिकमप्यग्न्याधाने तु मृतदाहगे ।
चिति-चित्या-चिताः प्रोक्ताः, ऋजौ तु प्राञ्जलोऽञ्जसः ॥ २४ ॥

अनृजौ तु शठः शण्ठो, धूर्ते व्यंशक-व्यंसकौ ।
शठ-शण्ठौ च षण्ढेऽपि, जालिके मायि-मायिकौ ॥ २५ ॥

मायावी, दाण्डाजनिको, दण्डाजनिक इत्यपि ।
मायायां शठता-शाठ्ये, व्याजे लक्ष्यं तु लक्षयुक् ॥ २६ ॥

संख्यायामपि, पिशुने, मत्सरो मत्सरी खलः ।
प्रखलः खुल्लकः क्षुल्लः क्षुद्रकः क्षुद्रसंयुतः ॥ २७ ॥

कौलीने वादिको जाते जातो जातात्परो मतः ।
तस्करे चोरश्चोर-चौरौ पाटच्चरान्वितः ॥ २८ ॥

पटच्चरश्चौरकर्म चौर्यं चोरिका स्तेनवत् ।
स्तेयं स्तैन्यं, हृतधने, लोप्त्रं लोत्रं च लोद्रकम् ॥ २९ ॥

मन्दे त्वलस आलस्यश्चतुरे दक्ष-दक्षिणौ ।
उष्णकोष्णौ, दातरि, तु स्यादुदारोऽनुदारयुक् ॥ ३० ॥

बहुप्रदे स्थूललक्षः स्थूललक्ष्योऽपि यान्तिमः ।
दानेंहतिरंहितिश्च प्रादेशन-प्रदेशने ॥ ३१ ॥

निर्वापणं निर्वपणं, याचके तु वनीपकः ।
वनीयक-वनबकौ, प्रार्थनायां तु याचना ॥ ३२ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

याञ्चैषणाऽध्येषणापि भवितरि भविष्णुयुक् ।
भूष्णुर्भविष्यति भवी भाव्यथो स्यात् प्रसारिणि ॥ ३३ ॥

विसारी च विसृमरो विसृत्वरयुतो मतः ।
लज्जाशीले तु लज्जालुर्लज्जूः स्यात्, क्षमिता क्षमी ॥ ३४ ॥

क्षन्ता सहिष्णुः सहने, ईर्ष्यालुः कुहने स्मृतः ।
ईर्ष्युश्च, क्रोधने क्रोधी, बुभुक्षायां तु रोचकः ॥ ३५ ॥

रुचिः क्षुधा-क्षुधौ, तृष्णक् तृषिते तृष्णकोऽपि च ।
क्षुदसहे क्षुधारुः स्यात् क्षुधालुः, शीतकाऽसहे ॥ ३६ ॥

शीतारुश्च सशीतालुः, पिपासायां तृषा-तृषौ ।
तृष्णा-तर्षौ च, लिप्सायां त्रयोऽन्त्या अपि, भक्षके ॥ ३७ ॥

आशितश्चाशिरो, भक्ते कुरुः कूरं च दग्धिका ।
भिस्साटा भिस्सटा भिस्सा, दधिसर्वरसाग्रके ॥ ३८ ॥

दधिमण्डं मण्डमपि, भक्तमण्डे तु प्राङ्स्रवः ।
निप्रात् स्रावश्च, श्राणायां विलेपी च विलेपिका ॥ ३९ ॥

विलेपनी विलेप्याऽपि क्वाथिका क्वथिकाऽपि च ।
तरलं तरला, सूपे सूदोऽप्यथ तिलान्नके ॥ ४० ॥

कृसर-त्रिसरौ पुंस्त्री, पिष्टके पूप-पूपकौ ।
पूपिकायां पौलि-पौल्यौ पूलिका पोलिकापि च ॥ ४१ ॥

पूपली चेषत्पक्वे त्वभ्यूषाऽभ्योषाऽभ्युषास्त्रयः ।
निष्ठानोऽस्त्री तेमने स्यात्, सठः पत्रफलादिके ॥ ४२ ॥

शाकं साकं हरितके, करम्भो दधिसक्तुषु ।
करम्बोऽपि घार्तिके तु पूरः स्याद् घृत-पिष्टतः ॥ ४३ ॥

घृतवरोऽवसेकिमे वटको वटसंयुतः ।
स्नेहभृष्टतण्डुलेषु भरुजी भरुजापि च ॥ ४४ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मर्मराले पर्पटश्चपटः, पृथुके चेः पुटः ।
चिपिटश्चिपिटिका शर्करायामुपला सिता ॥ ४५ ॥

सितोपला मधुधूलौ खण्डो वर्गद्वितीयखः ।
फाणिते स्यात्तु मत्स्याण्डी मत्स्यण्डिश्च मत्स्यण्ड्यपि ॥ ४६ ॥

मत्सण्डी खण्डतो योज्या शर्करा सर्करापि च ।
शिखरण्यां रसाला स्याद् रसिता मार्जितायुता ॥ ४७ ॥

मर्जिता, मुद्गादिरसे यूर्यूषस्त्रिषु जुषयुक् ।
दुग्धे गव्यं गोरसश्च रसोत्तमरसे समे ॥ ४८ ॥

क्षीरस्य विकृतौ कूर्चिः कूचीका कूचिकान्विता ।
कूर्चिकापि किलाटी स्यात् किलाटा च किलाट्युक् ॥ ४९ ॥

द्रप्स-द्रप्स्ये दध्न्यघने, हविष्य-हविषी घृते ।
रसायन-गोरसौ द्वौ घोले, तक्रे त्वरिष्ट्युक् ॥ ५० ॥

रिष्टमौदश्वितौदश्वित्के संस्कृत उदश्विति ।
पिच्छिले विजलं प्रोक्तं विजिलं विज्जलं विजम् ॥ ५१ ॥

विजेविलं विजिपिलमारनाले तु काञ्चिकम् ।
काञ्जिकं च सुवीराऽम्लं सौवीरं चाभितः षुतम् ॥ ५२ ॥

कुल्माषाभिषुतं चैव कुल्माषं चार्धराद्धके ।
माषादौ तु कुल्माषः स्यात् कुल्मासश्चाप्युपस्करे ॥ ५३ ॥

दन्त्य-तालव्य-मूर्द्धन्यमध्यः स्याद् द्वेषवारकः ।
तिन्तिडीक-तन्तिडीके चुक्रे पक्षण्यपि स्मृते ॥ ५४ ॥

राजिकायामासुरी स्यादसुरी च क्षुधा-क्षतात् ।
परोऽभिजननः शब्दो योज्यते शब्दवेदिभिः ॥ ५५ ॥

कुस्तुम्पुरुर्वाध्युकारस्तस्मिन् धान्यं च धान्यकम् ।
धन्या धन्याकं धान्याकं धानेयक-धनीयके ॥ ५६ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

धनकोऽथ कोलके स्याद् मरीचं मरिचं तथा ।
ऊषणं ह्युषणं विश्वा शुण्ठी शुण्ठिश्च, पिप्पली ॥ ५७ ॥

उषणा स्यादूषणापि, कृष्णा च कृष्णतण्डुला ।
गजपिप्पल्यां वशिरो वसिरः, सर्वग्रन्थके ॥ ५८ ॥

ग्रन्थकं शिरोऽनादन्तः क्ली सान्तं चटकाशिरः ।
व्योषे त्रेः कटु-कटुके, अजाजी जीर-जीरकौ ॥ ५९ ॥

जीरणो जरणः कणः जीरकः कृष्णजीरके ।
सुषवी दन्त्य-मूर्धन्य-तालव्यान्तर्गता पृथुः ॥ ६० ॥

पृथ्वी उत्कुञ्चिका चोपकुञ्चिकाप्यथ हिङ्गुनि ।
वाल्हीकं वाल्हिकं, जग्धौ खादनं खदनं घसिः ॥ ६१ ॥

निघसोऽपि विष्वाणाऽवष्वाणौ जमन-जेमने ।
ग्रासे गुडेरक-गुडौ गुडेरोऽपि गडोलयुक् ॥ ६२ ॥

गण्डोलः कवलोपेतः कवकः, सुहिते पुनः ।
आघ्राता-ऽऽघ्राणकौ, भुक्तत्यक्ते फेला च फेलियुक् ॥ ६३ ॥

मांसाशिनि शाष्वलः स्याच्छौष्कलः शाष्कलिस्तथा ।
मौष्कुलिर्मौष्कुलो, लिप्सौ लोलुपो लोलुभोऽपि च ॥ ६४ ॥

लोलोऽपि गर्धनो गृध्नु-गृध्नौ चेहेह ईहने ।
कामश्च कामना, धृष्टौ धृष्णुः स्याद् धृष्णजा सह ॥ ६५ ॥

शुभंयुः शुभसंयुक्ते शुभंयश्चाप्यहंकृति ।
अहंयोऽहंयुसंयुक्तः, कामुके कामि-कामिनौ ॥ ६६ ॥

कामनः कमनः कम्रः कमरः कमितापि च ।
कामयिताऽभिक-भीकावन्तर्दुर्विपरो मनाः ॥ ६७ ॥

विचेतस्यभिशस्ते तु स्यादक्षारित-क्षारितौ ।
तिरस्कारे परीभावः परापर्यभितो भवः ॥ ६८ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न्यक्कारः सनिकारः स्यात्, जागरूके तु जागरी ।
जागरिका, जागरणे जागर्या जागरस्तथा ॥ ६९ ॥

जागरा जाग्रिया, शङ्की संशयालुर्भवेदयम् ।
सांशयिको दक्षिणार्हे दक्षिण्यो दक्षिणीयकः ॥ ७० ॥

दण्डिते दाप्यतः प्रोक्तो दायितोऽपि तथोच्यते ।
अर्च्ये प्रतीक्ष्यो निर्योपि, पूजिते त्वपचायितः ॥ ७१ ॥

अपचितोऽथार्हणायां पूजा पूज्याऽथ पीनके ।
बहुलो बहलः स्थूर-स्थूलौ पीवा सपीवरः ॥ ७२ ॥

मांसलांसलौ निर्दिग्धे, कृशे शात-शितौ स्मृतौ ।
तीक्ष्णेऽप्येतौ, बृहत्कुक्षौ तुन्दी तुन्दिक-तुन्दिलौ ॥ ७३ ॥

तुन्दिभौऽप्युदरिकश्चोदरिलोदरिणौ समौ ।
अनासिके विख्र-विखू विग्रोऽपि, नतनासिके ॥ ७४ ॥

अवाद् भ्रट-टीट-नाटा नाशायां तन्नतावपि ।
खरनासे खरणसः खरणाः, खुरसदृग्नसि ॥ ७५ ॥

खुरणाः स्यात् खुरणसः, श्रोणे पङ्गुः सपङ्गुलः ।
स्यात् खल्वाटे तु खलति-खलतावल्पकायके ॥ ७६ ॥

पृश्नि-पृष्णी गडुले तु न्युब्ज-कुब्जौ, कुहस्तके ।
कुणि-कूणी, ह्रस्वकरपादे खर्वो निखर्वयुक् ॥ ७७ ॥

ह्रस्वशाखे वामनश्च वामा नान्तो, द्विनग्नके ।
वण्डो दन्त्यौष्ठ्यवादिः स्यादल्पमेढ्रेऽपि, खञ्जके ॥ ७८ ॥

खोड-खोरौ च खोटेऽपि, पोगण्डो विकलाङ्गके ।
अपोगण्डोऽप्यूर्ध्वजानावूर्ध्वज्ञोर्ध्वज्ञकौ समौ ॥ ७९ ॥

विलजानौ प्रज्ञुः स्यात् प्रज्ञोऽपि, युतजानुके ।
संज्ञु-संज्ञौ च सर्वत्र जञसंयोग उच्यते ॥ ८० ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वलियुक्ते वलिनः स्याद् वलिभः, शस्तकेशके ।
केशवः केशिकः केशी, तुण्डिलो वृद्धनाभिके ॥ ८१ ॥

तुण्डिभस्तुन्दिलोऽभ्यान्ताऽभ्यमितौ ग्लान-ग्लास्नुकौ ।
व्याधिते, कच्छुरे तु स्यात्पामनः पामरस्तथा ॥ ८२ ॥

सातिसारेऽतिसारक्यतीसारकी, कफान्विते ।
श्लेष्मणः श्लेष्मलः, क्लिन्ननेत्रे तद्वति पिल्लयुक् ॥ ८३ ॥

चिल्लश्चुल्लोऽपि, मूर्ते तु मूर्च्छालो मूर्च्छितोऽपि च ।
पित्ते पलाग्निः पललज्वरोऽथ खेटयुक् खटः ॥ ८४ ॥

वलासो दन्त्य-तालव्यप्रान्तकः कथितो बुधैः ।
कफे, व्याधौ रोग-रुजौ रुजाऽप्यामय आमकः ॥ ८५ ॥

अमः, क्षये राजयक्ष्मा यक्ष्मा जक्ष्मापि नान्तकः ।
जक्ष्म-यक्ष्मावदन्तौ द्वौ, क्षवे क्षुत् क्षुतमप्यथ ॥ ८६ ॥

क्षवथौ काशः कासोऽपि, खसे पामा तु पामया ।
कच्छूः कच्छुः स्त्रियां सर्वे, खर्ज्वां कण्डूयनं मतम् ॥ ८७ ॥

कण्डूः कण्डूति-कण्डूये, व्रणे रुषो रुषा सह ।
ईर्मोऽस्त्रियामीर्म नान्तं, गण्डे विस्फोट-स्फोटकौ ॥ ८८ ॥

पिटकः पिटका तद्वत्पिटकं च, किलासके ।
सिध्म-सिध्मे, कुष्ठभेदे दर्द्रुर्दद्रूश्च दद्रुयुक् ॥ ८९ ॥

दद्रूर्दर्दूश्च, कोठके मण्डलकं च मण्डलम् ।
हृल्लासे हिक्का हेक्कापि, पीनसे स्यादपीनसः ॥ ९० ॥

आपीनसः प्रतिश्यायः प्रतिश्या, श्वयथौ पुनः ।
शोफ-शोथौ, छर्दने तु च्छर्दिश्छर्दी प्रच्छर्दिका ॥ ९१ ॥

वमनं वमि-वमथू, कुरण्डस्त्वण्डवर्धने ।
कूरण्डोऽपि, प्रमेहे तु मेहोऽपि च, चिकित्सके ॥ ९२ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आयुर्वेद्यायुर्वेदिको भिषग्-भिषज-भिष्णजाः ।
जायौ भेषज-भैषज्ये उपचारश्चिकित्सने ॥ ९३ ॥

उपचर्यापि, सत्कृत्यालङ्कृतस्वकनीदये ।
कूकुदः कूपदश्चाऽऽपदापदे विपदा विपद् ॥ ९४ ॥

विपत्तौ, कृच्छ्रवञ्च्ये तु समौ दूडाभ-दूडभौ ।
समर्धुकस्तु वरदे स्यात् समर्धक इत्यपि ॥ ९५ ॥

सदस्ये तु पारिषद्य-पार्षद्यावथ संसदि ।
परिषत्-पर्षदौ तुल्ये समज्या च समाजयुक् ॥ ९६ ॥

आस्थानमास्था, दैवज्ञे नैमित्तिको निमित्तवित् ।
नैमित्तोऽपि च, मौहूर्तो मौहूर्तिकेऽथ लेखके ॥ ९७ ॥

लिपिकरो लिविकरोऽक्षरन्यासे लिपिर्लिविः ।
मषी-मस्यौ मलिनाऽप्सु, कितवे त्रितयं स्मृतम् ॥ ९८ ॥

धार्तो धूर्तोऽक्षधूर्तश्च, दुरोदर-दरोदरे ।
द्यूतेऽथाऽक्षे पाशकः स्यात् प्रासकः शारितः फलम् ॥ ९९ ॥

फलकोऽप्यपदे शारिः शारः खेलनिकोच्यते ।
व्यालग्राह्यहितुण्डिक आहितुण्डिक इत्यपि ॥ १०० ॥

मनोजवस्ताततुल्ये मनोजवसकोऽपि च ।
क्षेमङ्करो रिष्टतात्यरिष्टताती तथाऽऽस्तिके ॥ १०१ ॥

श्राद्ध-श्रद्धालू च, सहे प्रभविष्णुः प्रभूष्णुयुक् ।
शक्त-शक्लावसामर्थ्यजीवके चानवस्थिते ॥ १०२ ॥

चत्वारोऽमी पराः कर्णात् टिरिटिरि-ष्टिरेष्टिरा ।
चुरुचुरु-श्चुरुचुरा, शिथिलः शिथिरः श्लथे ॥ १०३ ॥

स्थित ऊर्ध्वंदमश्चोर्ध्वो निर्वकारो वकारवान् ।
ऊर्ध्वदमस्तद्भवे तु ऊद्धर्वाद् दमिक दामिकौ ॥ १०४ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ऊर्ध्वंदमिकोऽप्यध्वगे तु स्यादध्वन्योऽध्वनीनवत् ।
गन्तु-गान्तू पथिकश्च पान्थ:, शम्बल-सम्बले ॥ १०५ ॥

पाथेये, जङ्घाकरे तु जङ्घाकरिक जाङ्घिकौ ।
त्वरिते जवी च जवनः सहायेऽभ्यनुतश्चरः ॥ १०६ ॥

अनुगाम्यनुगश्चापि सेवायां स्यादुपासना ।
उपास्त्युपेता चोपास्या परेष्टैषणमेषणा ॥ १०७ ॥

पत्तौ पदाति-पादातौ पादातिक-पदातिकौ ।
पदकः पदगः पद्गः पादाविक-पदाजिकौ ॥ १०८ ॥

प्रष्ठे सरोऽग्रेऽग्र-पुरः-परतो गम-गामि-गाः ।
पुरस्तः, आवेशिके तु स्तः प्राघूर्णक-प्राघुणौ ॥ १०९ ॥

अतिथ्योऽतिथिरातिथ्य आङ्परौ गान्तु-गन्तुकौ ।
आवेशिक आतिथेय्यातिथेयातिथ्यनिःस्वनाः ॥ ११० ॥

ग्रामे भवे तु ग्रामीण-ग्रामीणौ ग्राम्य इत्यपि ।
ग्रामेयकश्च लोके तु जनो जनपदस्तथा ॥ १११ ॥

देवलोके देवविशा देवविद् वाऽभिजातके ।
जात्याभिजौ कुलीनश्च कुल्य-कौलेयकौ समौ ॥ ११२ ॥

महाकुलीनसहितौ माहाकुल-महाकुलौ ।
गोत्रोऽन्वयोऽन्ववायश्च संतानः संततिस्तथा ॥ ११३ ॥

स्त्रियां महेला महिला मेहला च महेलिका ।
वामिर्वामा जोषा योषा स्याद् योषिदपि योषिता ॥ ११४ ॥

स्याद् मत्तकासिनी मत्तगामिन्यां मत्तकाशिनी ।
स्त्र्यलङ्कारे कुट्टुमितं द्व्युकारं, कन्यका कनी ॥ ११५ ॥

कुमार्यां, मध्यमवयःस्त्रियां स्यात् तरुणी तथा ।
तलुनी, युवतिश्चोक्ता युवत्याद्यवयःस्त्रियाम् ॥ ११६ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सुवासिनी स्ववासिनी वधूटी वध्वटीति च ।
चिरिण्टी स्याच्चिरण्टी च चरिण्टी सचरण्टिका ॥ ११७ ॥

पत्न्यां सधर्मिणी सहधर्मिणीगृहिणीगृहाः ।
कलत्रं कडत्रं दारः पुंसि वा भूम्नि दारया ॥ ११८ ॥

जनिर्जनी कुटुम्बिन्यां स्यात् पुरन्ध्रिः पुरन्ध्र्यपि ।
स्नुषायां तु वधूयुक्ता वधूटी च जनिर्जनी ॥ ११९ ॥

कुलस्त्रियां तु कुलतो वालिका पालिकाऽपि च ।
कान्तायां प्रेयसी प्रेष्ठा षटकार-ठकारभाक् ॥ १२० ॥

प्रिया, कान्ते प्रियः प्रेयान् प्रेष्ठष्ट-ठद्वयान्वितः ।
वरो वरयितोद्वाहे विवाहे यम-यामकौ ॥ १२१ ॥

उपात्, जायापत्योस्तु जम्पती दम्पती स्मृतौ ।
द्वित्वे, जस्यती दस्यती प्रायो वेदे प्रयोजितौ ॥ १२२ ॥

जित्वरीवाचकौ पूर्वाविकत्वादावुदाहृतौ ।
हरणे तु सुदायः स्याद् दायो युतक-यौतकौ ॥ १२३ ॥

यौतुकः, परगेहस्था त्वायत्ता शिल्पजीविनी ।
सैरन्ध्री चापि सेरन्ध्र्यथावरोधनप्रेष्यिका ॥ १२४ ॥

असिक्निका स्यादसिक्नी, दूत्यां दूतिरपि स्मृता ।
प्राज्ञी प्रज्ञा प्रजानत्यामाचार्यानी नृयोगके ॥ १२५ ॥

आचार्या, मातुलानी च मातुल्यपि तथा मता ।
उपाध्यायान्युपाध्यायी, क्षत्रियाणी स्वतो भवेत् ॥ १२६ ॥

क्षत्रिया स्यादुपाध्याय्युपाध्यायाऽऽर्याणिका पुनः ।
आर्या पुनर्भ्वां दिधिषूर्दिधीषुरपि तद्भवे ॥ १२७ ॥

दिधिषुर्दिधिषूर्विप्रे त्वग्रतो दिधिषुर्मतः ।
दिधिषूरप्यसत्यां तु वर्षणी धर्षणीति च ॥ १२८ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पांशुला पांसुलाऽथ स्यात् पतिः पत्नी च जीवतः ।
पतिवत्न्यां, निर्वीरा च वीरा पति-सुतोज्झिता ॥ १२९ ॥

भिक्षुकी भिक्षुणी मुण्डा श्रमणा श्रवणाऽपि च ।
गणिकायां वेश्या वेष्या पण्याङ्गना पणाङ्गना ॥ १३० ॥

कुट्टन्यां शम्भली दन्त्य-तालव्यादिर्मता बुधैः ।
कुम्भदास्यां पोटा वोटाऽवस्त्रनार्यां तु नग्निका ॥ १३१ ॥

नग्ना कोटवी कोट्टवी, ऋतुमत्यां तु पुष्पिता ।
पुष्पवती चाविरवी निष्पुष्पायां तु निष्कला ॥ १३२ ॥

निष्कल्यपि च स्त्रीधर्मे आर्तवं ऋतुसंयुतम् ।
रजः सान्तं रजोऽदन्तो ना गुणेऽप्यथ मैथुने ॥ १३३ ॥

सुरतं स्याद् रति-रते पशोर्धर्म-क्रिये स्मृते ।
जभनं यभनं, गर्भवत्यां गुर्वी च गुर्विणी ॥ १३४ ॥

प्रसूतायां विजाताख्या प्रजाताप्यथ भ्रूणके ।
वृधसानो वर्धसानो गरभो गर्भ इत्यपि ॥ १३५ ॥

दोहदं दौहृदं श्रद्धा, पुत्र्यां तु स्यात् स्तनन्धयी ।
स्तनन्धया सूनुः सुतापत्ये, पुत्रेऽपि तोककम् ॥ १३६ ॥

तुगपत्ये, भ्रातृपुत्रे भ्रातृव्यो भ्रात्रीयोऽपि च ।
पुत्रपुत्रे पौत्रस्तस्य युवापत्ये पुनः स्मृतः ॥ १३७ ॥

पौत्रायण एवं पुनर्भूर्नानान्द्रो दुहितृवत् ।
पौनर्भव-पौनर्भवायणौ, नानान्द्र इत्यपि ॥ १३८ ॥

नानान्द्रायणो, दौहित्रो दोहित्रायणकस्तथा ।
पैत्र्यां नप्ता भवेद् नप्त्री स्यात् पितृष्वसुरात्मजे ॥ १३९ ॥

पितृष्वसेयवत्पैतृष्वस्रीयो, जननीस्वसुः ।
पुत्रे तु मातृष्वस्रीयस्तद्वन्मातृष्वसेयकः ॥ १४० ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दास्याः सुते तु दासेय-दासेरौ च, नटीसुते ।
नाटेय-नाटेरौ, पुत्रे बन्धक्या बान्धकेयवत् ॥ १४१ ॥

बान्धकिनेयश्च, कौलटेरः स्यात् कौलटेयवत् ।
भिक्षुसत्याः सुते कौलटेय-कौलटिनेयकौ ॥ १४२ ॥

स्वजाते त्वौरसौरस्यौ, भवेद् गोलश्च गोलकः ।
मृते पत्यौ जारजोऽथ भ्रातरि स्यात्सहोदरः ॥ १४३ ॥

समानोदर्य-सोदर्य-सोदराः, ज्येष्ठभ्रातरि ।
अग्रजोऽग्रियाऽग्रिमकौ स्यात् कनीयांश्च कन्यसः ॥ १४४ ॥

यविष्ठोऽपि यवीयांश्च कनिष्ठे सोदरे समाः ।
ज्येष्ठ-कनिष्ठ-यविष्ठास्त्रिकवर्गद्वितीयकाः ॥ १४५ ॥

स्यालस्तालव्य-दन्त्यादिः पत्न्या भ्रातरि कथ्यते ।
देवृ-देवर-देवानः स्युः पत्युरनुजे, स्वसा ॥ १४६ ॥

जानिर्यानिः कुलस्त्री च भग्नी स्याद् भगिन्यन्विता ।
पत्युः स्वसरि ननन्दा ननान्दा नन्दनीत्यपि ॥ १४७ ॥

पत्नीकनिष्ठभगिन्यां श्याली शाली च, खेलने ।
परिहासः परीहासः कुर्दनं कूर्दनं समौ ॥ १४८ ॥

किलः केलिश्च जनके बप्पो वप्रश्च तातयुक् ।
ततो जनयिता तद्वज्जनित्रोऽपि च, मातरि ॥ १४९ ॥

अम्बाऽप्यब्बा जनयित्री जनित्री जननीयुता ।
जानी, पित्रोः स्मृतौ माता-पितरौ, मातरात्परौ ॥ १५० ॥

पितरः पितृशब्दश्च, ज्ञातौ स्वः स्वजनस्तथा ।
बान्धवो बन्धुरात्मीये स्व-स्वकीये, नपुंसके ॥ १५१ ॥

पण्डु-पाण्डौ शण्ठ-शण्ढौ तृतीयाप्रकृतिस्तथा ।
तृतीयप्रकृतिर्देहे कलेवरं कडेवरम् ॥ १५२ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तनूः स्यात्तनु-तनुषी घनस्तद्वच्च भूघनः ।
गात्रं गान्त्रं मूर्तिमच्च मूर्तिः स्यात्, कुणपे शवः ॥ १५३ ॥

शवः सान्तं भवेत् षण्ढे, मूर्ध्नि मस्तक-मस्तिके ।
शिरः सान्तं स्मृतं क्लीबे शिरोऽदन्तो मतो नरि ॥ १५४ ॥

चिकुरश्चिहुरः केशे ललाटस्याऽलके पुनः ।
भ्रमरकः स्याद् भ्रमरालको वेणिः प्रवेणियुक् ॥ १५५ ॥

केशन्यासे काकपक्षे शिखण्डक-शिखाण्डिकौ ।
वक्रस्त्रिषु च्छन्दस्यपि, दान्ते षण्ढे भषद् भसद् ॥ १५६ ॥

आमाशयस्थाने च, जघनेऽपि तुण्डि-तुण्डकौ ।
घनं घनोत्तमं भाले त्वलीकमलिकं तथा ॥ १५७ ॥

कर्णे श्रवणं श्रुतिवत् श्रवः श्रोत्रं च श्रौत्रकम् ।
नेत्रेऽक्ष्यऽक्ष्णं दृशि-दृशे दृग् लोचन-विलोचने ॥ १५८ ॥

कनीनिकायां तारा स्यात् तारकाऽप्यर्धवीक्षणे ।
काक्षः कटाक्षो नेत्रस्य मीले मेष-मिषौ नितः ॥ १५९ ॥

कालभेदेऽपि भ्रूविकारे भ्र-भ्रु-भ्रू-भृतः कुटिः ।
भ्रूमध्ये कूर्च-कूपे कूर्पं नक्रे नस्नया नसा ॥ १६० ॥

नासा नस्या नासिका च नाशिका घ्राणमाघ्रया ।
घ्रा, दन्तवस्त्रे ओष्ठः स्यात् त्रिकवर्गद्वितीयवान् ॥ १६१ ॥

ओष्ठप्रान्ते सृक्क नान्तं क्लीबं सृक्कमदन्तकम् ।
सृक्कणी सृक्कणिडर्यन्तेदन्ते सृक्कि नपुंसके ॥ १६२ ॥

इदन्तमेकैर्वदद्वन्द्वं कयुग्ममपरैः स्मृतम् ।
सृक्कशब्देऽथ हन्वग्रसन्धौ स्याच्चिबुकं चिबुः ॥ १६३ ॥

दंष्ट्रिकायां दाढिका स्याद् द्राढिका खादने पुनः ।
रदनो रदयुग्दंश-दशनौ मल्ल-मल्लकौ ॥ १६४ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जिह्वायां रसना दन्त्य-तालव्यान्तर्गता रसा ।
रसमातृका रस्ना च रसिका रसनं तथा ॥ १६५ ॥

गले कण्ठः कण्ठी कण्ठं शब्द-समीपयोरपि ।
अंसे तु स्कन्धः स्कधश्च सान्तं क्लीबमुरोंसयोः ॥ १६६ ॥

सन्धौ तु जत्रु षण्ढे स्यात् तकार-रेफयोगवत् ।
प्रवेष्टो दोर्दोषा बाहुर्बाहा बाहो भुजो भुजा ॥ १६७ ॥

भुजामध्ये कपोणिः स्यात् कफोणी च कफोणियुक् ।
कफणिः कफणी तद्वत्कुर्परः कूर्परोऽपि च ॥ १६८ ॥

प्रकोष्ठे वर्गद्वितीयः स्यात् कलाचिः कलाचिका ।
हस्ते करः करिर्हस्तमूले तु मणिबन्धवत् ॥ १६९ ॥

मणिः स्यात्करशाखायामङ्गुरी चाङ्गुरिस्तथा ।
अङ्गुलोऽङ्गुलिरङ्गुल्यां तर्जन्यां तु प्रदेशिनी ॥ १७० ॥

प्रदेशिनी प्रदेशिका, ज्येष्ठाङ्गुल्यां तु मध्यमा ।
मध्या, ज्येष्ठा-कनिष्ठे द्वे टवर्गद्वितीयान्विते ॥ १७१ ॥

पुनर्नव-पुनर्भवौ करजे नखरस्त्रिषु ।
नखोऽस्त्री तर्जन्यायत्तेऽङ्गुष्ठे त्वथ प्रदेशवत् ॥ १७२ ॥

प्रादेशोऽप्यायताङ्गुलौ हस्ते स्यात् प्रतलस्तलः ।
तालिका-तालौ चपेटश्चर्पटश्चपटोऽपि च ॥ १७३ ॥

तद्द्वये योजिते सिंहतलः संहतलस्तथा ।
तताङ्गुष्ठमध्याङ्गुलिमाने तालस्तलोऽपि च ॥ १७४ ॥

वितस्ति-खड्गमुष्ट्योश्च, कुब्जिताङ्गुलिके करे ।
प्रसृतः प्रसृतिश्चापि गण्डूषे चलुकश्चलुः ॥ १७५ ॥

चुलुको, निष्कनिष्ठे स्याद् हस्त आर्तिररत्नयुक् ।
तिर्यक्प्रसारितबाह्वोर्व्यायामो व्याम-व्यामनी ॥ १७६ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वियामः, पृष्ठवंशे तु रीढको रीढयुग् मतः ।
पृष्ठं वर्गद्वितीयाप्तमुत्सङ्गेऽङ्को नपुंसके ॥ १७७ ॥

सान्तमङ्कोऽप्यदन्तो नाऽथोरोजोरसिजौ स्तने ।
कुच-कूचौ, जठरे तु स्यात् पिचण्डः पिचिण्डयुक् ॥ १७८ ॥

तुन्दं तुन्दिः कुक्ष-कुक्षी, यक्नि कालेय-कालके ।
कालखण्डं कालखञ्जं, गुल्मे प्लीहा प्लिहा तथा ॥ १७९ ॥

नान्तौ, प्लीहा चाबन्तोऽपि, मध्ये मध्यम इत्यपि ।
विलग्नावलग्नौ सर्वे पुंक्लीबाः, रसनापदे ॥ १८० ॥

कटीरं च कटि-कटी-कटाः श्रोणी च श्रोणियुक् ।
वलित्रयसमाहारे त्रिवलिस्त्रिवली तथा ॥ १८१ ॥

त्रिकपार्श्वगर्तयोस्तु कुकुन्दरे कुकुन्दुरे ।
युतौ स्फिचौ स्फिजौ चान्तौ जान्तौ, स्यात्स्मरमन्दिरे ॥ १८२ ॥

योनिर्योनी च, पुंश्चिह्ने शेपः शेफश्च सान्तगे ।
शेप-शेफौ च शेवश्च त्रयोऽदन्ता बुधैः स्मृताः ॥ १८३ ॥

लाङ्गूलं शङ्कु लङ्गूलं मुष्क आण्डाण्डकौ नरि ।
अण्डं पेलं पेलकोऽप्यथोरुरूरूश्च सक्थनि ॥ १८४ ॥

जङ्घायां तु टङ्क-टङ्गौ खनित्रेऽपि च तौ मतौ ।
पादग्रन्थौ कुल्फ-गुल्फौ घुटिको घुण्ट-घुण्टकौ ॥ १८५ ॥

घुटः सर्वेऽपि पुंस्त्रीगाः, चरणे चलनः क्रमः ।
क्रमणः पाद-पदौ पात् पत्-पदे अंह्रिरङ्घ्रियुक् ॥ १८६ ॥

तिलके कालकस्तद्वत् तिलकालक इत्यपि ।
जडुलो जटुलो, मांसे पलं पललपामिषम् ॥ १८७ ॥

अमिषं चार्द्रमांसे तु भवेदर्पशमर्पिशम् ।
मुख्यमांसे बुक्का नान्तं त्रिषु वुक्कस्त्रिषु स्मृतः ॥ १८८ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वृक्काग्रमांसाग्रमांसे वृक्कः स्यात्पुंस्त्रियोर्वसा ।
मेदः सान्तं मेदोऽदन्तो मस्तिष्को मस्तुलुङ्गकः ॥ १८९ ॥

मस्तकस्नेहे गोदोऽस्त्री करोटं शिरसोऽस्थनि ।
करोटीवत् करोट्यिश्च भकालं च भगालयुक् ॥ १९० ॥

पृष्ठहड्डे कशेरुका कशारुकाऽस्थिसंभवे ।
मज्जा नन्तो द्वयोर्मज्जाऽऽबन्तः स्त्री रेत्र-रेतसी ॥ १९१ ॥

बल-बल्ये च वीर्ये द्वे लोम रोम तनूरुहे ।
तनुरुहं, चर्म चर्मं त्वक् त्वचं चोचमित्यपि ॥ १९२ ॥

असृग्धरा सृग्धरा च कषिते लेख्यचर्मणि ।
कडित्रं सकटित्रं च, स्नायौ वसस्नया स्नसा ॥ १९३ ॥

स्नावा नान्तो, धमन्यां तु धमनिर्नाडि-नाडकौ ।
नाडी शिरा सिरा नेत्रमले दूषी सदूषिका ॥ १९४ ॥

दूषीका काणुकं काणूकमाणूकवदाणुकम् ।
घ्राणमले शिङ्घाणक-सिङ्घाणौ, लालिका पुनः ॥ १९५ ॥

सृणीका सृणिका गूथो विड्-विषौ शान्त-षान्तगौ ।
वर्चस्क-वर्चसी तुल्ये विष्ठा वर्गद्वितीयभाक् ॥ १९६ ॥

नेपथ्ये वेष-वेशौ द्वावुत्सादनमुद्वर्तने ।
उच्छादनं चापि समालभने चर्चिक्यं मतम् ॥ १९७ ॥

चर्चाऽपि, मण्डने प्रति-परितः कर्म कथ्यते ।
मार्ष्टी मार्जो मृजा मार्जा मार्जना, स्नान आप्लवः ॥ १९८ ॥

आप्लावोऽपि च, गात्रानुलेपन्यां वर्तिरुच्यते ।
वर्ती तथा जोङ्गके स्यादगर्वगुरु वंशकम् ॥ १९९ ॥

वंशिका वंशिकं कृमिजग्धं कृमिजमित्यपि ।
प्रवरं प्रकरं तुल्ये गोशीर्षे हरिचन्दनम् ॥ २०० ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

हरिश्च, रक्तचन्दने पत्रगं च पतङ्गकम् ।
पत्राङ्गं, सौमनसे तु जातिर्जाती फलं तथा ॥ २०१ ॥

जातीफलं जातिफलं तद्वत्कोशफलं मतम् ।
जातीकोशं जातीकोषं, कपूरे स्यात् सिताभ्रकः ॥ २०२ ॥

सिताभश्चापि, कस्तूर्यां नाभिवद् मृगनाभिजा ।
मृगनाभिर्मृगमदो मृगः स्याद् मद इत्यपि ॥ २०३ ॥

कुङ्कुमे वरवाह्लीकं वरं वाह्लीक-वाह्लिके ।
कश्मीरजन्म काश्मीरं कश्मीरजमपि स्मृतम् ॥ २०४ ॥

संकोचपिशुनं तद्वत्संकोचं पिशुनं समे ।
वर्णं वर्ण्यं, देवसुमे लवङ्गं लवसंयुतम् ॥ २०५ ॥

कोशफले कक्कोलकं कक्कोलं कोलकं तथा ।
कोलं कोरं च, कालानुसार्ये यापक-जापके ॥ २०६ ॥

कालीयकं कालेयकं कालियं चाऽग्निवल्लभे ।
रालोऽक्ष्यरालः, श्रीवासे धूपः स्याद् वृक-वृक्षतः ॥ २०७ ॥

श्रीवेष्टः श्रीपिष्टकश्च, कोटीरे मुकुटोऽस्त्रियाम् ।
मकुटोऽपि किरीटं स्यात् तिरीटं पुष्पदाम तु ॥ २०८ ॥

नान्तः क्लीबेऽराबन्तोऽस्मिन् मुण्डमालाभिधे स्मृतम् ।
ललामवल्ललामाऽश्व-प्रधान-ध्वज-लक्ष्मसु ॥ २०९ ॥

पुण्ड्र-वालधि-शृङ्गेषु भूषा-प्रभावयोरपि ।
माल्यं माला, तिलके तमालपत्रं तमालवत् ॥ २१० ॥

शीर्षस्रज्यवतंसः स्याद् वसन्तोत्तंसकौ समौ ।
त्रयोऽमी कर्णपूरेऽपि पत्रावल्यां तु पत्रतः ॥ २११ ॥

भङ्गि-लेखा-लताङ्गुल्यो वल्लरी मञ्जरीति च ।
वल्लिश्चोत्क्षिप्तकायां तु कर्णान्दूश्च कर्णान्दुयुक् ॥ २१२ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कण्ठभूषायां ग्रैवेयं ग्रैवं ग्रैवेयकं तथा।
मुक्तास्रज्याहारो हार: स्त्रीन्नोर्यष्ट्यां सरि: सर: ॥ २१३ ॥

सारिकाऽप्येकावल्यां तु कण्ठी कण्ठिकया सह।
कटिके तु पारिहार्य:परिहार्यश्च कङ्कणम् ॥ २१४ ॥

कङ्कणिश्चोर्मिकायां त्वङ्गुलीयकाङ्गुरीयके।
मेखलायां सारसनं दन्त्य-तालव्यमध्यगा ॥ २१५ ॥

रसना, काञ्चि: काञ्ची च किङ्किणि: क्षुद्रघण्टिका।
किङ्कणी कङ्कणीका च कङ्कणी किङ्किणीत्यपि ॥ २१६ ॥

समे मञ्जीर-मन्दारे नूपुरे पादत: परे।
शीली च नालिका पादाङ्गुलीये पादत: परे ॥ २१७ ॥

पालिका कीलिका, वस्त्रे वसनं वस्न-वाससी।
सिनो निवसनं सन्नं कर्पटं पटमित्यपि ॥ २१८ ॥

पट: पट्याच्छादनं च छाद: सिक्-सिचयौ तथा।
वस्त्राञ्चले वर्ति-वस्ती दुकूलमतसीपटे ॥ २१९ ॥

दुगूलं, कम्बले रल्लो रल्लकोऽथ निवीतके।
प्रावृतं निवृतं, स्थूलशाटे तालव्य-दन्त्यवान् ॥ २२० ॥

वरासि:, परिधानस्य ग्रन्थौ नीवी च नीवियुक्।
चण्डातके चलनकश्चलनश्चलनिका पुन: ॥ २२१ ॥

चोलश्चोली कञ्चुलिका कञ्चूल: कञ्चुकोऽपि च।
कूर्पासकश्च कूर्पास: कुर्पास: सकुर्पासक: ॥ २२२ ॥

शाटके तु शाट: शाटी, परिधानापराञ्चले।
कच्छा कच्छाटी च कच्छाटिका, कौपीनके पुन: ॥ २२३ ॥

कक्षापट: कक्षापुट:, कर्पटे नक्तको मत:।
लक्तक:, प्रच्छदपटे उत्तरच्छद उच्यते ॥ २२४ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

निचोलको निचुलको निचोलं च निचोल्यपि ।
निचुलोऽवसत्थिकायां स्मृता पर्यस्तिकायुता ॥ २२५ ॥

पर्यस्तिश्चापि पर्यङ्कः पल्यङ्कोऽपि, कुथे पुनः ।
वर्णपरिस्तोम-वर्णौ परिस्तोमवदास्तरः ॥ २२६ ॥

आस्तरणं प्रवेणीयुक् प्रवेणिः प्रतिसीरिका ।
जवनी जवनिकापि यवनी यमनीति च ॥ २२७ ॥

दूष्ये स्थूलं स्थुडमपि, पटकुट्यां तु केणिका ।
केणिः, पल्लवादिकृता शय्या संस्तर-प्रस्तरौ ॥ २२८ ॥

स्रस्तरोऽपि च, तल्पे तु शयनं शयनीयवत् ।
शय्यापि च खट्वायां तु मञ्चवद् मञ्चकः स्मृतः ॥ २२९ ॥

पर्यङ्कोऽपि च पल्यङ्कः, पतद्ग्राह-पतद्ग्रहौ ।
प्रतिग्रह-प्रतिग्राहौ पालेऽथो दर्पणे मतः ॥ २३० ॥

मकुरो मुकुरस्तद्वद् मङ्कुरोऽप्यात्मदर्शवत् ।
आदर्शो, वस्त्रासने त्वासन्दा-सन्द्यौ च सन्दवत् ॥ २३१ ॥

सन्दी भोजन आच्छादे एकोक्त्या चोभयोरपि ।
कशिपुर्दन्त्य-तालव्यमध्यः स्याच्छयनासने ॥ २३२ ॥

एकोक्त्योशीरमौशीरं पलङ्कशा पलङ्कषा ।
राक्षा रक्षा च लाक्षापि तद्रसे याववद्यतः ॥ २३३ ॥

यावको लक्तकालक्तौ, दीपस्तु कज्जलध्वजे ।
प्रदीपो दीपवृक्षश्च तालवृन्ते तु वीजनम् ॥ २३४ ॥

व्यजनं मृगचर्मेति धवित्रं च धुवित्रवत् ।
केशमार्जे कङ्कतिका कङ्कतः काक-कङ्कते ॥ २३५ ॥

कङ्कती, बालक्रीडने गिरिको गिरिवद्गुडः ।
गिरिगुडो गिरियको गिरीयकोऽथ गिन्दुकः ॥ २३६ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गेन्दुकोऽपि कन्दुके द्वौ, पार्थिवे नृपतिर्नृपः ।
भूप-भूपति-भूपालास्तथा मूर्ध्नाभिषिक्तयुक् ॥ २३७ ॥

मूर्द्धावसिक्तो राजा राट् राज्ये महिन-माहिने ।
वसुदेवा वासुदेवा अर्द्धचक्रिषु संमताः ॥ २३८ ॥

तज्ज्येष्ठभ्रातृषु बला बलदेवाः, पृथौ नृपे ।
वेनिर्वैन्यो, भरते तु स्यात् सर्वदमनस्तथा ॥ २३९ ॥

सर्वंदमः, सीतापतौ रामः स्याद् रामचन्द्रवत् ।
रामभद्रोऽपि, सौमित्रौ लक्ष्मणो लक्षणान्वितः ॥ २४० ॥

कैकेयी कैकयी चास्याः पुत्रे तु भरतो मतः ।
भरथोऽप्यथ जानक्यां शीता तालव्य-दन्त्ययुक् ॥ २४१ ॥

इन्द्रसुते वालिर्वाली, मारुतो हनुमानिति ।
हनूमान्, भीमशत्रौ किर्मीरः कर्मीर-किर्मिरौ ॥ २४२ ॥

हिडिम्बो डीकारयुक्तोऽर्जुने फल्गुन-फाल्गुनौ ।
बीभत्सो बीभत्सुरपि, पाण्डुसूनुषु पाण्डवाः ॥ २४३ ॥

पाण्डवायनाश्चाऽर्जुनधनौ गाण्डीव-गाण्डिवौ ।
धनुर्मात्रेऽप्यमू, हाले वाहनः सात-सालतः ॥ २४४ ॥

सालोऽपि, परिवारे तु परेर्बर्हश्च बर्हणम् ।
आतपत्रे प्रतपत्रं छत्रं छत्रश्च छत्र्यपि ॥ २४५ ॥

रोमगुच्छे चामरं स्याच्चमरश्चामरस्तथा ।
चामरापि, भृङ्गारे त्वालूराण्डूः, सचिवे पुनः ॥ २४६ ॥

अमात्य आमात्यो मन्त्री मन्त्रिश्च, द्वारपालके ।
प्रतीहारः प्रतिहारो द्वाःस्थो द्वाःस्थितदर्शकः ॥ २४७ ॥

द्वाःस्थितो दर्शकस्तद्वत् द्वाःस्थितादर्श्यऽपि स्मृतः ।
सूदाध्यक्षे पुरोगुः स्यात् तथा पौरोगवोऽपि च ॥ २४८ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सूपकारे सूप-सूदौ स्यादन्तःपुरके पुनः ।
आन्तर्वेश्मिकयुगान्तर्वंशिकोऽन्तःपुरे समौ ॥ २४९ ॥

अवरोधनावरोधौ भवेत्कञ्चुकिके पुनः ।
कञ्चुकी सौविदिल्लश्च सौविदः, स्थपतिस्तथा ॥ २५० ॥

स्थापत्यः स्थापतीकश्च, रिपौ शत्रुः सशात्रवः ।
अभिमातिरभियातिरारातिश्चाऽप्यरातियुक् ॥ २५१ ॥

ऋष्व-ऋष्वौ घातुकेऽपि द्विषन् द्वेषी च द्विड्युतः ।
परेः पन्थक-पन्थिनौ, सख्यौ सूर्येऽपि चोच्यते ॥ २५२ ॥

मित्रशब्दो द्वितकारः, सख्ये सौहार्द-सौहृदे ।
मैत्र्यं मैत्री, हेरिके तु चरश्चारोऽवसर्प्यवत् ॥ २५३ ॥

अपसर्पः, सान्त्वजे तु शाम तालव्य-दन्त्ययुक् ।
प्रावृते लञ्चया लञ्च उपदोपप्रदानवत् ॥ २५४ ॥

शौर्ये शौण्डीर्य-शौण्डीरे नय-न्यायौ समञ्जसे ।
भागधेयो भागधेयी भागोऽपि कारवत् करः ॥ २५५ ॥

राजदेयेऽनीकिन्यां तु सेना सैन्यं चमूश्चमुः ।
सैन्यपृष्ठे प्रति-परेर्ग्रहः, केतौ तु केतनम् ॥ २५६ ॥

वैजयन्ती वैजयन्तो जयन्ती च ध्वजो ध्वजिः ।
ध्वाजिश्च ध्वजपस्तद्वत्पताकाऽपि पटाकया ॥ २५७ ॥

ध्वजः कूर्चक उच्चूडोच्चूलौ द्वौ चूड-चूलकौ ।
अवात्परौ क्रीडार्थे तु रथे पुष्परथो मतः ॥ २५८ ॥

मूर्द्धन्यान्तस्थायोगाप्तो, भवेत् कर्णीरथे पुनः ।
डयनं हयनं चाप्यनसि स्याच्छकटस्तथा ॥ २५९ ॥

शकटी शकटं तद्वच्छकटिर्वहसाऽन्वितः ।
वाहसो वृषभेऽप्येतौ, प्रधौ नेमी च नेमिवत् ॥ २६० ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अक्षाग्रकीले त्वण्यानी अस्नि-सीम्नोरपि स्मृतौ ।
पिण्डिकायां नाभिर्नाभी, कूबरं स्याद् युगन्धरे ॥ २६१ ॥

कुबरं चाधःस्थदारावनुकर्षा नरि नान्तगः ।
अनुकर्षोऽस्त्यदन्तोऽपि धूर्वीवद् धूर्धुराऽपि च ॥ २६२ ॥

यानमुखेऽथ दोलायां प्रेङ्खः प्रेङ्खा, विनीतकम् ।
वैनीतकं, परम्परावाहने शिबिकादिके ॥ २६३ ॥

याने तु वह्यं वाह्यं च वहनं वाहनं तथा ।
सारथौ वर्ग्यद्वादश ऋकाराकारयुक् त्विह ॥ २६४ ॥

सव्येतः ष्टृष्ठ-ष्ठातारौ दक्षिणात् स्थश्च संस्थवत् ।
रथवति त्रयोऽप्येते रथिको रथिरो रथी ॥ २६५ ॥

अश्ववारे सादिः सादी रथिकेऽप्यमू यन्तरि ।
निषादी सनिषादिश्च, भटे योद्धा सयोधकः ॥ २६६ ॥

तथा भण्डीर-भाण्डीरौ वनेऽपि कथितावमू ।
सेनासमवेते सैन्यः सैनिकोऽपि च, योद्धृषु ॥ २६७ ॥

सहस्रेण साहस्रिणः साहस्रः, प्रतिमुक्तवत् ।
स्यादामुक्तो पिनद्धश्च पिनद्धे, कवचे पुनः ॥ २६८ ॥

माढिर्माढा दशनं च दंशस्त्वक्त्रं तनुत्रवत् ।
कञ्चुके वारबाणः स्याद् बाणवारो धियाङ्गवत् ॥ २६९ ॥

अधियाङ्गमधिकाङ्गं सारसने त्रयं स्मृतम् ।
शिरस्त्राणे तु शीर्षण्यं शीर्षकं, शस्त्रजीवनि ॥ २७० ॥

आयुधीयश्चायुधिको भवेत् परश्वधायुधे ।
पारश्वधिकवत् पारश्वधः, प्रहरणेऽस्त्रवत् ॥ २७१ ॥

शस्त्रं, चापे धन्व धन्वं पुंक्लीबो धनुवद्धनुः ।
धनूः स्त्रियां त्रिणतावत् तृणता धनुषोऽग्रके ॥ २७२ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अटन्यटनिरत्यार्त्ती पीडायामपि स्यात्तलम् ।
तला चाऽपि गोधायां स्याद् वेध्ये लक्ष्यं सलक्षकम् ॥ २७३ ॥

बाणे पृषत्कस्तात्कान्तः सायकः सायवत्सरः ।
शरः शरुः स्वरुर्भल्लो भल्लिश्चापि कडम्बयुक् ॥ २७४ ॥

कलम्ब इव कादम्बो भेर-भेलावमू तथा ।
भेकेऽपि, कर्तरिः पुङ्खे कर्तरी, शरधौ पुनः ॥ २७५ ॥

तूणी तूणा तूणं तूणस्तूणीरश्च निषङ्गवत् ।
उपासङ्गोऽपि खड्गे तु ऋष्टि-रिष्टी नरस्त्रियोः ॥ २७६ ॥

करवालः करपालः करालिकस्तथोदितः ।
चन्द्रहासश्चन्द्रभासो धारान्तोगो धरोऽपि च ॥ २७७ ॥

प्रत्याकारे कोश-कोषावावरणे फरं स्फरम् ।
स्फरः स्फरकः फरकः फलकं फलमित्यपि ॥ २७८ ॥

खेटकः खेटकं खेटं, कृपाणिका छुरी क्षुरी ।
क्षुरिका साऽऽयता पत्रात्पालः स्यात्पालिकाऽपि च ॥ २७९ ॥

एकधारासौ स्यादीली इली च करवालिका ।
करपालिकाऽपि तरवालिकाऽपि च, कुन्तके ॥ २८० ॥

प्रासस्तालव्य-दन्त्यान्तो, मुद्गरे द्रुघणो घनः ।
द्रुघनः, कुठारे पर्शुः परशुश्च परस्वधः ॥ २८१ ॥

पर्श्वधः परश्वधश्च स्वधितिः, परितो घके ।
पलिघो दन्त्य-तालव्यौ शर्वली शर्वला युधि ॥ २८२ ॥

लोहदण्डे पट्टिशः स्याद् दन्त्य-तालव्यप्रान्तगः ।
अभ्यासभुवि खडूरः खलूरश्च खलूरिका ॥ २८३ ॥

प्रस्थाने त्वभिनिर्याणं प्रयाणं खलु हेतवे ।
तृणकाष्ठादेः, प्रसृतौ प्रसरणा प्रसारणी ॥ २८४ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रसारश्च प्रसरणं, वैरिणः प्रति गच्छति ।
अभ्यमित्र्योऽभिमित्रीयोऽभ्यमित्रीणो, बलान्विते ॥ २८५ ॥

उरस्वान् स्यादुरसिलोऽप्यतिबले ऊर्जस्वलः ।
ऊर्जस्वप्यूर्जस्वांश्च जिष्णौ जेता च जैत्रवत् ॥ २८६ ॥

जित्वरो, वैतालिके तु सौखशायनिको मतः ।
सौख्यशय्यिकश्चाक्रिके घाण्टिको घाटिकोऽपि च ॥ २८७ ॥

मागधो मगधो मङ्खे वैश्यात् क्षत्र्यां भवेऽपि च ।
छन्दोजातावुष्णिहोष्णिग् बले शुष्मं तु शुष्मणा ॥ २८८ ॥

ऊर्ज ऊर्जो गूर्जः सान्तं क्लीबं च सहसा सहः ।
सङ्ग्रामे युद्धं युत् संयत् पुंस्त्रियोश्च संयद्वरः ॥ २८९ ॥

संयतं राटी रालिर्ना समितिः समितः समित् ।
समः स्फोट-स्फेट-फेटाः प्रध्मश्च प्रधनं तथा ॥ २९० ॥

समुदायः समुदयः सांपरायकमित्यपि ।
सांपरायः संपरायकमग्रगमने मतम् ॥ २९१ ॥

नासीरस्त्रिषु, धाटौ तु धाट्यवस्कन्द इत्यपि ।
अभ्यवस्कन्दः, सौप्तिके त्ववापात् स्कन्द उच्यते ॥ २९२ ॥

पलायने तु संदावः समुत्प्रेभ्यश्च द्राववत् ।
द्रववद् विद्रवो, भग्ने पराजित-जितौ समौ ॥ २९३ ॥

भूतः परापर्यभितो, गुप्तौ तु चार-चारकौ ।
बन्द्यां ग्रहश्च ग्रहकः प्रोपतो ग्रह इष्यते ॥ २९४ ॥

संन्यासिके तापसः स्यात् तपस्व्यपि च सूरतः ।
सूरथोऽपि च दाने द्वौ शान्त-श्रान्तौ जितेन्द्रिये ॥ २९५ ॥

शुद्धकर्माऽवापाद् दानं महादाने प्रवारणम् ।
वरणं, विप्रे ब्रह्मा स्याद् ब्रह्माणो जाति-जन्म-जाः ॥ २९६ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

द्व्यग्राभ्यां, बटौ माणवो माणवकस्तथैव च ।
मौञ्जीबन्धे तूपापाद् नाय-नयावानय इत्यपि ॥ २९७ ॥

अग्नीन्धने स्यादाग्नीध्राग्नीध्र्यौ स्यातां जटाजटिः ।
सटायां, तपस्वि पीठे वृषी वृसी, कमण्डलौ ॥ २९८ ॥

कुण्डं कुण्डी कुण्डिका च, यजमाने तु याजकः ।
यष्ट्याऽथ सोमपे सोमा सोमात्पीती पीथी च नान्तगौ ॥ २९९ ॥

सर्ववेदः सर्ववेदौ सान्ताऽदन्तौ तु याजके ।
सर्वस्वदक्षणेष्टेश्च, हुतौ होम नपुंसकम् ॥ ३०० ॥

नान्तं, होमो नरेऽदन्तो होत्रं, भूमिः परिष्कृता ।
वेदिर्वेदी च, निर्मन्थदारुणि त्वरणिर्द्वयोः ॥ ३०१ ॥

अरणी समिधि त्वेध एधः सान्तं तथेन्धनम् ।
नान्तादन्ते तु इध्मेध्मे रक्षाभस्मनि क्षारवत् ॥ ३०२ ॥

स्रुवे स्रुग्, मखवधे तु शसनं शमनं समे ।
शृतोष्णक्षीरगे दध्नि आमीक्षाऽमिक्षया सह ॥ ३०३ ॥

दधिषाज्य-दीधीषाज्यौ दधियुक्तघृते मतौ ।
मृषावादिन्यपि चाग्निहोत्रिण्यग्न्याहितो भवेत् ॥ ३०४ ॥

आहिताग्निर्दर्विर्दर्वी घृतलेखनिकोच्यते ।
आचमने तूपस्पर्श उपसंस्पर्शनं तथा ॥ ३०५ ॥

उपसंस्पर्शः, पाठे तु निपाठ-निपठौ समौ ।
स्वाध्याये जपो जाप उपवास उपोषितम् ॥ ३०६ ॥

अपवस्त्रमुपवस्त्रमौपवस्त्रोपवस्त्रके ।
वृत्ते चरित्रं चारित्रमाचार-चरणे अपि ॥ ३०७ ॥

चरितं, प्राचेतसे तु वाल्मीकिर्वल्मीकयुक् ।
वाल्मीक-वाल्मिकौ तद्वत् कविरादिकविस्तथा ॥ ३०८ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मैत्रावरूणिः समैत्रावरूणो, बादरायणे ।
वेदव्यासश्च व्यासः, स्याद् रामः परशुरामवत् ॥ ३०९ ॥

जामदग्न्यो, याज्ञवल्क्यो योगेशः सयोगीशकः ।
वशिष्ठो दन्त-तालव्यमध्यो, वर्गद्वितीययुक् ॥ ३१० ॥

गोनर्दीयमुनौ तुल्यौ पतञ्जलि-पतञ्जलौ ।
वररुचौ कात्यायन-कात्यौ, कक्षीवति स्मृतः ॥ ३११ ॥

स्फोटायनः स्फौटायनः पालकाव्ये करेणुभूः ।
कारेणवो मुनिभेदे स्यादत्रिरत्रिणा समम् ॥ ३१२ ॥

अपिशलिरापिशलिः कशात् कृत्स्नः सकृत्सकः ।
मृकण्डुवद् मृकण्डश्च, हारीतो हारितोऽपि च ॥ ३१३ ॥

पक्षिभेदेऽपि, कुमारः कुमारिलसमन्वितः ।
नास्तिके लौकायतिको लोकायतिक इत्यपि ॥ ३१४ ॥

बाहुसंभवे राजन्यो राजा च क्षत्र-क्षत्रियौ ।
आर्ये विड्-वैश्यौ वेतने वृत्तिर्वार्तापि जीविका ॥ ३१५ ॥

ऋते तूञ्छं शिलञ्छोञ्छं शिलोञ्छं शिलवत्तथा ।
कृषौ प्रमृतमनृतं वाणिज्यं वणिक्कर्मणि ॥ ३१६ ॥

वणिज्या वणिज्यं क्रयविक्रयिके तु वाणिजः ।
वणिक् प्रापणिकः प्रोक्त आङ्परः पणिकस्तथा ॥ ३१७ ॥

पनिकः पतिकश्चैव पदिकः, क्रायके पुनः ।
क्रायिको विक्रायके च क्रयिको विक्रयी तथा ॥ ३१८ ॥

मूल्ये वक्रयाऽवक्रयौ मूलद्रव्ये तु नीविवत् ।
नीवी स्यात्तु विनिमयो नैमेयो निमयोऽपि च ॥ ३१९ ॥

वैमेयोऽपि परदाने व्यवहारे पणं पणः ।
न्यासार्पणे प्रतिदानं परिदानं, सत्यापने ॥ ३२० ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सत्यङ्कारः सत्याकृतिः संख्येये तु गणेयवत् ।
गण्यं, पोते प्रवहणं वहनं वहितं तथा ॥ ३२१ ॥

वहित्रं वाहित्थमपि, पोतवाहे नियामकः ।
निर्यामोऽपि च बेडायां स्तरणिस्तरणी तरिः ॥ ३२२ ॥

तरी स्तरी च काष्ठाम्बुवाहिन्यां द्रुणिवद् द्रुणीः ।
द्रोणिर्द्रोणी च नौदण्डे क्षेपणिः क्षेपणीयुता ॥ ३२३ ॥

काष्ठकुद्दालेऽभ्रिरभ्री, प्लवे स्यादुडुवो डुवः ।
उडूप उडुपस्तरपण्ये तु तर आतरः ॥ ३२४ ॥

आतार आतारुरपि, वृद्ध्याजीवे तु वार्धुषिः ।
वार्धुषिक ऋणे धारोऽस्त्र्युद्धारे प्रतिभूः पुनः ॥ ३२५ ॥

लग्नको लग्नः, षोडशमात्रैः करिष-कार्षकौ ।
तुला विंशत्या तु भारो भरश्च शकटीनवत् ॥ ३२६ ॥

शाकटोऽपि शलाटश्च शगरोऽपि तुरीयके ।
प्रस्थभागे कुटपः स्यात् कुडवः कुलवोऽपि च ॥ ३२७ ॥

द्रोणैः षोडशभिः खारी खारी मानभिदि स्मृता ।
काकनी काकिणी, क्रोशद्वये गव्यूतिरुच्यते ॥ ३२८ ॥

गव्यागव्यूते, गोमति, गवीश्वर-गवेश्वरौ ।
गोम्याभीरे तु गोपाल-गोपौ स्यातां, कुटुम्बिनि ॥ ३२९ ॥

कार्षकः कर्षकस्तद्वत् कृषकः कृषिकोऽपि, च ।
क्षेत्राजीवो भवेत् क्षेत्री सीरे हालो हलं हलः ॥ ३३० ॥

लाङ्गलदण्डे ईषेशे, प्रोक्ता लाङ्गलपद्धतौ ।
शीता तालव्य-दन्त्यादिर्नदीभेदेऽपि लाङ्गले ॥ ३३१ ॥

निरीषे तु कुट-कूटौ कुटकं, कुशिके पुनः ।
कृशिकश्च फलं फालः कुद्दालश्च कुदालवत् ॥ ३३२ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गोदारणे प्रवयणे तोत्रं प्रतोद-तोदने ।
आबन्धे तु योत्र-योक्त्रे कोटीशो लोष्ठभेदने ॥ ३३३ ॥

कोटिशः खलवाल्यां तु मेधिर्मेथिश्च शूद्रके ।
पद्य-पज्जौ क्षत्र-वैश्याजातौ माहेष्यवद् मतः ॥ ३३४ ॥

महिष्योऽपि शिल्पिनि तु स्युः कारु-कारि-कारयः ।
ध्वजो ध्वजी कल्पपाले मद्ये कपिश-कापिशे ॥ ३३५ ॥

कापिशायनं माध्वीकं मार्द्वीकं च परिश्रुता ।
परिस्रुद् दन्त्य-तालव्यमध्यातालव्य-दन्त्यभृत् ॥ ३३६ ॥

सुरा-मदिरा मद्वरी मदना मद्य-बीजके ।
नग्नहूर्नग्नहुर्मद्यसन्धाने, भिष-वासवौ ॥ ३३७ ॥

पानपात्रे तु, तर्षणा ऽनुतर्षौ मद्यपाशने ।
उपदंशश्चावदंशः स्यात् तेजसावर्तनीमुखा ॥ ३३८ ॥

मूषा मूषी शाणे शाणा शार्णिर्निकषवत्कषः ।
कृपाण्यां कर्तरिः प्रोक्ता कर्तरी चापि, सेवनी ॥ ३३९ ॥

सूत्रिः सूत्री सूचि-सूत्रे द्वे पिप्पलक-पिप्पले ।
कर्तनसाधने तर्कुस्तर्कुट्यपि च सीवनम् ॥ ३४० ॥

सेवनं च स्यूतौ, स्यूते तु प्रसेवश्च प्रसेवकः ।
स्योनं स्यात्तन्तुवाये तु तन्त्रवायः कुविन्दवत् ॥ ३४१ ॥

कुपिन्दोऽपि सूत्रवेष्टे त्रसरस्तसरोऽपि च ।
वानदण्डे वेम वेमा तन्तौ स्यात् सूत्रतन्तुवत् ॥ ३४२ ॥

सूत्रःसूत्रं सूत्र्यपि स्यादुपानहि तु पादुका ।
पादूः पन्नद्धापि पादाज्जङ्गुर्वीथी रथी तथा ॥ ३४३ ॥

पीठी त्राणं रक्षणं च पदात् त्वरायतापि च ।
वरत्रायां नध्री वध्री वार्द्धी वद्धापि वर्द्धवत् ॥ ३४४ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पिण्याके खलिः खलोऽस्त्री स्यात्तक्षिण्यां तु वासिवत् ।
वासी तूलिका त्वीषी केषिका कान्दविके पुनः ॥ ३४५ ॥

भक्ष्यकारो भक्ष्यकार आदितालव्य-दन्त्यभृत् ।
श्वेदनिका श्वेदनश्च कन्दौ स्याद् नापिते क्षुरी ॥ ३४६ ॥

क्षौरिको भण्डिवाही च भाण्डिकस्तस्य भाण्डके ।
क्षुरः खुरो, मायाकारे प्रातिहारिक उच्यते ॥ ३४७ ॥

प्रतिहारो, मायायां तु शाम्बरी साम्बरी तथा ।
इन्द्रजाले तु कुहुकं कुहकं तद्वदाहतम् ॥ ३४८ ॥

विनोदे स्यात् कुतुकं कौतुकं च कुतूहलम् ।
कौतूहलं, पापर्द्धौ तु मृगव्यं मृगया मृगः ॥ ३४९ ॥

आच्छोदनं च द्वितीयथद्वितीयकसंयुतम् ।
आखेटक आखेटश्च, रज्जौ तन्त्री च तन्त्रिवत् ॥ ३५० ॥

वटारक-वटारौ द्वौ वटस्त्रिषु तु दोरवत् ।
दवरश्च तन्तुगुणे, दाशो दासश्च धीवरे ॥ ३५१ ॥

दाशी दासी धीवरी स्याच्छिलाजतु च चेट्यपि ।
मत्स्यबन्धने बडिशं बलिशं च, वधास्पदे ॥ ३५२ ॥

शूना तालव्य-दन्त्यादिः, पामरः प्रामरोऽपि च ।
क्षुल्लकः खुल्लकस्तद्वद्, निषादे तु श्वपाकवत् ॥ ३५३ ॥

पाकश्चण्डाल-चाण्डालौ बुक्कसः पुक्कसस्तथा ।
पुल्कसोऽन्तावसायी चान्तेवास्यपि पुलिन्दवत् ॥ ३५४ ॥

पौलिन्द्रोऽपि, शबरे तु पत्रशबर उच्यते ।
वरटो वारट्येऽप्युक्त इडीडौ म्लेच्छजातिके ॥ ३५५ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

## । चतुर्थः काण्डः ।

धात्र्यां भू-भूमि-भूम्यः स्युः पृथवी पृथिवी पृथा ।
धरित्री धरयित्री वसुधा सुधा वसुन्धरा ॥ १ ॥

विश्वा विश्वम्भरा क्षोणिः क्षोणी तद्वद् महिर्मही ।
जगतिर्जगत्युर्वरोर्विरूर्वी ग्मा क्ष्मा क्षमा ॥ २ ॥

अवन्यवनिर्धरणी धरणिर्धारया धरा ।
केलिश्च केलिनी ख्याता महास्थल्यम्बरस्थली ॥ ३ ॥

दीर्घादय ईडेलेराश्च त्विडीडौ डान्तगौ मतौ ।
अन्दताविड ईडश्च देवभिद्यपि तौ स्मृतौ ॥ ४ ॥

इडेले सर्ग-नाडी-गो-बुध-स्त्री-वाक्ष्वपीरिते ।
द्यावाभूम्योस्तु रोदस्यौ रोदसी रोदसी तथा ॥ ५ ॥

आद्यो ऽध्यन्त इदन्तोऽन्यस्तृतीयः सान्तषण्ढगः ।
द्यावापृथिव्यौ च दिवस्पृथिव्यौ च तथोदिते ॥ ६ ॥

दिवःपृथिव्यौ च, क्षारभूम्यामुषरमूषरम् ।
इरिणवदीरिणं, भूः कृत्रिमोच्चा स्थला स्थलम् ॥ ७ ॥

मृद् मृत्तिकाऽपि, सा शस्ता मृत्सा मृत्स्नाऽपि, खानिका ।
लवणस्य रुमा नान्ता रुमाऽऽबन्तापि कथ्यते ॥ ८ ॥

वशिरो वसिरश्चाऽपि सामुद्रलवणे मतौ ।
सैन्धवे दन्त-तालव्यादिमं सीतशिवं स्मृतम् ॥ ९ ॥

माणिमन्थं माणिबन्धं रौमके, वसुकं वसु ।
वस्तकं स्याद्, विड-विटौ पाक्ये, टङ्कस्तु टङ्कणे ॥ १० ॥

टङ्कनः पाचनकश्च पाचनस्तुग्घिका पुनः ।
खर्ज्जिः स्यात् खर्ज्जिका देशे, विशयी विषयी तथा ॥ ११ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विषयः पुंस्त्रियोर्नीवृदुपोपातस्तु वर्तनम् ।
जाङ्गलो निर्जले देशे जाङ्गलो जडभूयसि ॥ १२ ॥

नडकीयो नड्वलश्च नडांश्च, बहुशर्करे ।
शर्करा शर्करिलोऽपि शर्करावांश्च शार्करः ॥ १३ ॥

सिकता-वालुकाप्राये स्याद् सिकतिल-सैकतौ ।
सिकतावान्, साखायः शाखिनेडाहाल-डाहलाः ॥ १४ ॥

डहालाश्चेदयश्चैद्याः, साल्वाः सल्वा अपि स्मृताः
वाह्लिका-वाह्लि-वाह्लीकाः, पाञ्चालाः स्युः पञ्चालवत् ॥ १५ ॥

कुङ्कणः कौङ्कणोऽप्युक्तो, द्रविडो द्रमिडोऽपि च ।
ग्रामे तु वसथः सं-न्यु-प-प्रति-परितः परः ॥ १६ ॥

पल्लि-पल्ल्यौ गृह-गृहसमूह-स्थानकेष्वपि ।
सीम-सिमौ क्षेत्र-सीम-गोचर-भू-हयेष्वपि ॥ १७ ॥

मर्यादा घट आघाटः स्थविः स्थिविश्च सीमया ।
सीमः सीमा त्रिषु नान्तो मालं ग्रामान्तराटविः ॥ १८ ॥

मालकोऽपि भवेत्क्षेत्रे वप्रो वप्यश्च सम्मतः ।
शाकक्षेत्रे स्तृतं शाकं शाकटं शाकशाकिनम् ॥ १९ ॥

अणुक्षेत्रे चाणवीनमणव्यमपि, भङ्गवत् ।
भाङ्गीनं च भङ्गाक्षेत्रे, उमाक्षेत्रे तथोम्यवत् ॥ २० ॥

औमीनं च यवक्षेत्रे यव्यं यवक्यं यावकम् ।
माषाक्षेत्रे तु माषीणं माष्यं च, तृतीयाकृते ॥ २१ ॥

शम्बाकृतं सम्बाकृतं, वापादौ द्रौण-द्रौणिके ।
द्रोणस्य, खलधाने तु खलस्त्रिषु च, रेणुके ॥ २२ ॥

धूलि-धूल्यौ पांशु-पांसू रजो ना सान्तषण् रजः ।
दलौ लोष्ठो लेष्टुर्लोष्टुर्नाकौ कुलक-कूलकौ ॥ २३ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नगरे नगरी द्रङ्ग-द्राङ्गौ पत्तन-पट्टने ।
पुरस्त्रिषु पूः पुरिश्च, कन्याकुब्जं तु गाधिपूः ॥ २४ ॥

कन्यकुब्जं, शिवपुर्यां कासिस्तालव्य-दन्त्यभृत् ।
वराणसी वाराणसी वाणारसी वराणसिः ॥ २५ ॥

कासी काश्यथाऽयोध्यायां कोसलोत्तरकोशला ।
कर्णपुर्यां चम्पा चण्या, मथुरा मघुरान्विता ॥ २६ ॥

मधूपघ्ने, गजाह्वये हस्तिनी हस्तिनायुतात् ।
हास्तिनात् पुरं स्तम्बपूः लिप्तं स्यात्ताम-दामतः ॥ २७ ॥

तामलिप्ती, विदर्भायां कुडिनी कुण्डिनात् पुरम् ।
द्वारकाऽनिकाररेफा, सालस्तालव्य-दन्त्यभृत् ॥ २८ ॥

वरणे प्राकारः पारक् जान्तः क्षौमे तु अट्टवत् ।
अट्टालकयुतोट्टालो, वृत्तौ वाटी च वाटिका ॥ २९ ॥

वाटो वाटं वाटिरिव प्राचीनं च प्रचीरवत् ।
मार्गे तालव्य-दन्त्यादिः सरणिः सरणी पथः ॥ ३० ॥

पन्थाः पन्थान-पथी वर्त्मनिर्वर्त्म वर्तनिः ।
वर्तनी पदवी तद्वत् पदविः, सत्पथे पुनः ॥ ३१ ॥

स्वतितः पन्थाः, अपथमपन्था गूढवर्त्मनि ।
भूमध्ये तु द्व्युकाराप्ता दन्त-तालव्यपूर्वगा ॥ ३२ ॥

शुरुङ्गा सन्धिला सन्धिः, स्थाने तु पदमास्पदम् ।
पितृ-प्रेताद्वन-गृहे, धिष्ण्ये सदन-सादने ॥ ३३ ॥

गृहं गेहं धाम धामं मन्दिरं मन्दिरा कुटिः ।
कुटः कुट्योकः सान्तं षण् पुंस्योकोऽदन्त उच्यते ॥ ३४ ॥

सत्रं सात्रं वस्त्यं पस्त्यं निवासा-ऽऽवास-वासकाः ।
आवसथो वसितश्चोदवसितं न्याड्युग् लयः ॥ ३५ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

निकाय्य-निकायौ स्यातां स्यादागारमगारवत् ।
चतुःशाले चातुःसाली जवनं यवनं समः ॥ ३६ ॥

यमनं चोपकार्य्यावदुपकार्योपकारिका ।
प्रसादनः प्रसादोऽपि देव-भूपगृहे समौ ॥ ३७ ॥

मठस्त्रिष्वावसथ्यश्चावसथः स्तूप-तूपकौ ।
आयतनविशेषेऽथो मृतचैत्ये तु चैत्रवत् ॥ ३८ ॥

चित्यं च, हविर्गेहे तु होत्रं होत्रीयवत्स्मृता ।
आथर्वणे शान्तिगृहं शान्तीगृहं, तृणालये ॥ ३९ ॥

कुटी कुटि-कुडी तुल्ये, सूतका सूतिका परम् ।
गृहं त्वरिष्टे, कारूणां कर्मशालाऽनुवासनम् ॥ ४० ॥

अन्वासनमावेशनं, भिल्लसद्मनि पक्वणः ।
द्विककारोऽस्त्रियां, हट्टेऽट्टोऽस्त्रियां विपणिः स्त्रियाम् ॥ ४१ ॥

विपणी चाऽऽपणो, वेश्याश्रये वेशः सवेषकः ।
भित्तौ स्याद्भित्तिका कुड्य-कुट्ये अत्र तृतीयकौ ॥ ४२ ॥

तृतीयतुर्यवर्गस्थो, कुड्येऽन्तर्निहितास्थनि ।
एडुकैडूके औडूपं, वितर्दौ वेदि-वेदिके ॥ ४३ ॥

प्राङ्गणा-ऽङ्गणे त्वजिरेऽङ्गनं स्याद्वलजे पुनः ।
द्वाःस्त्री द्वारं च बारोपि, परिघेऽर्गलमर्गला ॥ ४४ ॥

अर्गलो तथा वर्गल्यर्गलिका, द्वारयन्त्रके ।
ताडकं तालकं चास्योद्घाटयन्त्रे तु तालिका ॥ ४५ ॥

प्रतिताल्यपि, कपाट्यां कपाटं च कपाटकः ।
कवाटः कवाटी तुल्यौ कुवाटोऽररऽररी ॥ ४६ ॥

अररी, स्तम्भाद्यधःस्थदारौ प्रोक्ते शिली-शिले ।
गोपानसिर्गोपानसी वक्रे वलभिच्छादने ॥ ४७ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दारौ, देहल्यामुम्बरोदुम्बरोऽम्बुरकास्त्रयः ।
बहिर्द्वारप्रकोष्ठे तु प्रघाण-प्रघणौ समौ ॥ ४८ ॥

प्रघानः प्रघनोऽलिन्दे आलिन्दः, पटलस्त्रिषु ।
पटं छदिः छादिः सान्ते ल्कीत्वालेऽथेन्द्रकोशके ॥ ४९ ॥

तमङ्गस्तवङ्गश्छदिराधारे वलभीभवे ।
वलभिवर्डभी तद्वद्वडभिश्च्यूडया समम् ॥ ५० ॥

चूला मूलापि, गवाक्षे जालं जालकमित्यपि ।
कुसूलस्तालव्यदन्त्यमध्यः स्यादन्नकोष्ठके ॥ ५१ ॥

अधिरोहिण्यां निःश्रेणिः निर्विसर्गाऽविसर्गयुक् ।
निःश्रेणी, कोणोऽश्रिरस्त्रः पालिः पाली च पुत्रितः ॥ ५२ ॥

का-ल्यौ पञ्चाली पाञ्चाली विच्छन्दका-विछर्दकाः ।
नन्द्यावर्तप्रभृतिषु, समुद्गे संपुटः पुटः ॥ ५३ ॥

मञ्जूषायां तु मञ्जूषा पेटा-पटिक-पेटकाः ।
पेडा, व्यवहारिकायां तु वर्धनीवदवर्धनी ॥ ५४ ॥

बहुकरी ब[illegible]रा बहुकरा तयेरिते ।
धूल्यादौ तु समः कार-करावकरः स्मृतम् ॥ ५५ ॥

खण्डनभाण्डे तु भवेदुदूखलमुलूखलम् ।
उरूखलं, किलिञ्जे तु कटः कटी कटं तथा ॥ ५६ ॥

मुसले मुषलोऽयोग्रमयोनिर्वंशनिर्मिते ।
भाण्डे तु कण्डोलकः स्यात्कण्डोलः पिटकः पिटम् ॥ ५७ ॥

तितउः चालनी स्त्रीषण्, सूर्पं तालव्यदन्त्ययुक् ।
प्रस्फोटनेऽन्तिकायां त्वश्मन्तमश्मन्तकान्वितम् ॥ ५८ ॥

अखन्तकमखन्तं च चुल्लि-चुल्ल्यावुदः परे ।
हानं धानं ध्मानं च, पिठरस्त्रिषुचोखया ॥ ५९ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

उखः स्थालं स्थालिः स्थाली कुण्डकुण्डी च कुण्डिवत् ।
कुण्डी कुम्भिः कुम्भी घटे घटी कुटोऽस्त्रियां कुडः ॥ ६० ॥

कलसः कलशः कुम्भस्त्रिष्वङ्गारकपात्रिका ।
हसन्तिका हसन्ती च हसनी चाम्बरीषवत् ॥ ६१ ॥

अम्बारीषं, पिष्टपाकभृत्पृचीषमृजीषवत् ।
दर्व्यां खजा खजाका च खजका खजिकापि च ॥ ६२ ॥

दारुहस्तके तु-तर्द्रूस्तर्दूरपि गलन्तिका ।
आडूरालूर्भवेदालुः कर्करीका च कर्करी ॥ ६३ ॥

करकोऽस्त्री लोहकर्णवत्पात्रे कटहः स्मृतः ।
कटाहः कर्परस्तद्वत् खर्परस्त्रितयं त्रिषु ॥ ६४ ॥

अलिञ्जरे तु मणिको मणिर्गर्गर्या मन्थनिः ।
मन्थनी कलशी तद्वत् कलशिः, क्षुब्धके मथः ॥ ६५ ॥

मथिर्मन्थान-मन्थकौ मथापो मन्थ एव च ।
मन्था विशाख-वैशाखौ खजकी खजका खजा ॥ ६६ ॥

खजश्च खजको, मन्थविष्कम्भे कुटरस्तथा ।
कुटकः शालाजिरे तु दन्त्यतालव्यपूर्वगः ॥ ६७ ॥

सरावो ना दृतिस्तत्र खल्लं खल्लश्च भाण्डिभित् ।
ध्रुवका ध्रूवकाऽमत्रे पात्रं पात्री च पात्रकाः ॥ ६८ ॥

तद्विशालं स्थालं स्थाली, शैले तु धर-भूधरौ ।
भूध्रोऽद्रिश्च शद्रि-सद्री शिखी स्याच्छैखरोपि च ॥ ६९ ॥

क्रौञ्चे कुङ् तथा कौञ्चोऽपि, विन्ध्ये मेकल-मेखलौ ।
उज्जयन्ते रैवतको रैवतश्चक्रवालवत् ॥ ७० ॥

चक्रवाडो लोकालोकाचले, मेरुः सुमेरूवत् ।
स्वर्णाद्रावथ कन्दर्यां कन्दरा कन्दरं दरिः ॥ ७१ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कन्दरोऽपि दरो, दर्याः प्रस्थे प्रष्ठोऽपि सानुयुक् ।
स्नुर्ना तालव्यमूर्धन्यमध्यौ पाषाणयुग् दृषत् ॥ ७२ ॥

शिलाशिल्यौ ग्रावाकरे खनी खानी खनिस्तथा ।
निधितडागयोरप्येतौ द्वौ, धातौ तु गैरिकम् ॥ ७३ ॥

गवेरुकं च कस्सटी खटिनी च खटीयुता ।
कठिन्यां ताम्र ऊदम्बमुदुम्बरमुडुम्बरम् ॥ ७४ ॥

औदुम्बरं वरिष्ठं स्यात् त्रिकवर्गद्वितीययुक् ।
वङ्गे त्रपु त्रपुस्तपुर्द्वे सान्ते त्रीणि षण्ढके ॥ ७५ ॥

तारे श्वेतं सितं रूप्यं रूप्रं भीरु सुभीरुकम् ।
कनके स्वर्णं सुवर्णं स्याद् महारजतान्वितम् ॥ ७६ ॥

रजतं हेम हेमोऽस्त्री रुक्मं रुग्मं च रुक्मलम् ।
शातकुम्भं शातकौम्भं हिरण्यं हिरणं तथा ॥ ७७ ॥

वराटशुक्रयोरप्येतौ स्यातां भर्म-भर्मणी ।
शृङ्गी शृङ्गिरलङ्कारसुवर्णेऽथाऽऽरकूटके ॥ ७८ ॥

आरोऽस्त्री रिरी रीरी च कांस्यं स्याद् वङ्ग-शुल्वजे ।
कंसं च पञ्चलोहे तु सौराष्ट्रं च सौराष्ट्रकम् ॥ ७९ ॥

पारतः पारदः सूते चलश्च चपलोऽभ्रके ।
अभ्रं गिरिजामलं स्याद् गिरिजं चामलं तथा ॥ ८० ॥

शिखिग्रीवे तुच्छाञ्जनतुच्छे पुष्पाञ्जने पुनः ।
पौष्पकं पुष्पकं पुष्पं पुष्पकेतुवदाढकी ॥ ८१ ॥

तूबरी तुबरी प्रोक्ता मृत्तालकं मृतालकम् ।
मृत्तिका मृत्स्नया मृत्सा, गन्धाश्मनि सुगन्धकः ॥ ८२ ॥

सौगन्धिकः सुगन्धश्च गन्धिको गन्धकोऽपि च ।
गोदन्ते हरितालं स्यात् तालमालमलं तथा ॥ ८३ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मनोगुप्तायां नेपाली नैपाली च मनःशिला ।
शिला सिन्दूरे शृङ्गारे भवेच्छृङ्गारभूषणम् ॥ ८४ ॥

हंसपादे हिङ्गुलोऽस्त्री हिङ्गुलुः स्यादथाश्मजे ।
गिरिजं गैरेयं शैलं शैलेयं च शिलाजतु ॥ ८५ ॥

बोले गोपरसो गोपो रसो गन्धरसान्वितः ।
रत्ने मणिश्च माणिक्यं वैडूर्यं वालवायजे ॥ ८६ ॥

वैडूर्यमपीन्द्रनीले महानीलं तथाऽपरौ ।
पनिकः पदिकश्चापीन्द्रकीलेऽपि वज्रके ॥ ८७ ॥

हीरश्च हीरको, राजपट्टे प्रोक्तो विराटजः ।
वैराटोऽपि चन्द्रकान्ते चान्द्रोऽपि, स्फटिके मतम् ॥ ८८ ॥

स्फाटिकं च, शुक्तिजे तु मुक्ता मुक्ताफलान्विता ।
मौक्तिकं च मकुतिकं भवेद् मुकुतिकं तथा ॥ ८९ ॥

वणिग्द्रव्येऽपि, पानीये जीवनीयं च जीवनम् ।
नीरं नारं मीरं वा स्त्री-क्लीबयोर्वारि वार्दरे ॥ ९० ॥

उदकोदे दक-दगे कबन्धं बन्ध-मन्धके ।
कमन्धमापः स्त्री भूम्नि आपः सन्त स्त्र्युत्सूत्सकौ ॥ ९१ ॥

शम्बरं दन्त-तालव्यादिमं स्याच्छवरः शिवम् ।
कृपीटं कृषीटमलं कमलं च शरं सरः ॥ ९२ ॥

सन्तं सारं दुमलं च द्रुमलं भुवनं वनम् ।
जलं जडं च सलिरं सरिलं सलिरं तथा ॥ ९३ ॥

सरिरं, त्रिपकारं च पिप्पलं, स्यादगाधके ।
अस्थाघमस्ताघा-ऽस्तागे गम्भीरं च गभीरवत् ॥ ९४ ॥

निम्ने चलागाधयोश्च, धूमिका धूमरी हिमे ।
धूममहिष्यथाऽवश्याऽवश्यायौ, वारिधौ पुनः ॥ ९५ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वार्द्धिर्वारिनिधिरुत्सोत्सू अपांपतिरप्पतिः ।
यादसांपतिश्च यादःपतिश्चाप्यकूपारवत् ॥ ९६ ॥

अकूवारः पारापारः पारावारोऽपि कथ्यते ।
अवारपारस्तरङ्गे भङ्गो भङ्गं महत्पथम् ॥ ९७ ॥

लहरी लहरिः, फेने डिण्डीरः सहिण्डीरकः ।
पिण्डीर-दिण्डीरौ तट्यां तटं तटः प्रतीरवत् ॥ ९८ ॥

तीरं रोधोऽदन्तः पुंसि रोधः सान्तं नपुंसके ।
जलोज्झितेऽस्मिन् पुलिनं पुरिनं सैकतं तथा ॥ ९९ ॥

सिकता, नद्यां ह्रदिनी ह्रादिनी च धुनी धुनिः ।
आपगाऽथाप्यपगा श्रोतो दन्त्य-तालव्यगादिमम् ॥ १०० ॥

स्रोतस्विनी स्रोतस्वती स्रोतोवहा स्रवन्तिका ।
द्रवन्त्योषधिभेदेऽप्यमू भवेतां च, गोदया ॥ १०१ ॥

गोदावरी, सूर्यात्मजा तापिस्तापी शतद्रुयुक् ।
शुतुद्रिः शुतुद्रुरपि शितद्रुः सरयूयुता ॥ १०२ ॥

सरयुः कोसलानद्यां, नदीभेदे तु चन्द्रिका ।
चन्द्रभागा चन्द्रभागी भागी चान्द्राच्च भागया ॥ १०३ ॥

वासिष्ठ्यां गोमती तद्वत् गोतमी स्याद् विपाड्युता ।
विपाशोक्ता, वैतरणी वैतरणिरवन्तिगा ॥ १०४ ॥

सिप्रा सृप्रापि, स्वतोऽम्भःसरणे श्रोत उच्यते ।
दन्त्य-तालव्ययुग् देहसिरास्वपि प्रवाहके ॥ १०५ ॥

वेणिर्वेणीवक्त्रं वक्त्रं पुटभेदेऽम्बुनिर्गमे ।
परिवाह-परीवाहौ नाल-नादौ प्रनालिका ॥ १०६ ॥

प्रणालः प्रणालं तोयमार्गे सरणिः सारणी ।
कुल्यायां, सिकतायां तु वालुका वालिकापि च ॥ १०७ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

बिन्दौ पृषतिः पृषतः पृषत्, पङ्के तु कर्दमः ।
दमोऽपि, दीर्घिकायां तु वापिर्वापी च कूपके ॥ १०८ ॥

क्षुद्रे चुरिश्चुरी चुण्ढिश्चुण्ढी च घटीयन्त्रके ।
उद्घाटकमुद्घाटनमुद्घातनमपि स्मृतम् ॥ १०९ ॥

कासारे तु तडागः स्यात् तडाकश्च तटाकवत् ।
सरः-सरस्यौ स्थानकेऽलवालं चालवालयुक् ॥ ११० ॥

आवालोऽस्त्री, उत्स उत्सुः स्रवः प्रस्रवणं झरः ।
झरी झरा निर्झरश्च, वह्नावग्निस्तु पुं-स्त्रियोः ॥ १११ ॥

दमुना दमूना सन्ता वञ्चतिश्चाङ्कतिस्तथा ।
शुष्मा बहिर्बर्हिः शुष्मा नान्तः शुष्मोऽस्त्यदन्तकः ॥ ११२ ॥

आश्रयाश आशयाश विश्वप्सा नान्तगो मतः ।
विश्वप्सोऽपि, नान्तो दान्तः शन्त्रतोऽपि तनूनपात् ॥ ११३ ॥

घासिर्घसुरिर्हवनो हविश्च द्वौ वनात्परौ ।
दवो दावो, हेतौ कीला कीलो ज्वालो पि ज्वालया ॥ ११४ ॥

अर्चिरर्ची सन्तेदन्तावूष्मा नान्तः सहोष्मया ।
बाष्पे, तडिति शम्पा स्यात् सम्पा शम्बा च विद्युता ॥ ११५ ॥

विद्युत् सौदामिनी सौदामनी सौदाम्निकान्विता ।
सौदाम्नी च सुदाम्नी वा चपला चवला चला ॥ ११६ ॥

आकालिकी चाकालिका, वायौ मरुत-मारुतौ ।
मरुत् समीर-समरौ सृमरौऽप्यनलाऽनिलौ ॥ ११७ ॥

जगत्प्राणो-जगत्प्राणौ गन्धाद् वाहि-वाह-वहाः ।
वातिर्वातो भवेत् सारो दन्त्य-तालव्यपूर्वगः ॥ ११८ ॥

शबलवर्णेऽपि सरट्-सरडौ टान्त-डान्तगौ ।
लघट् च लघिटिः पविः पवनः पवमानवत् ॥ ११९ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वातूलो वातुलो वातसमूहेऽथासहेऽपि च ।
वातविकारस्याऽरण्ये षण्डं शण्डं वनं वनी ॥ १२० ॥

सत्रं तालव्य-दन्त्यादि दवो दावोऽटव्यटविः ।
चुरुम्बः सतुरुम्बश्चारामेऽपोपात्परं वनम् ॥ १२१ ॥

राज्ञामन्तःपुरोद्याने प्रमदा-प्रमदाद् वनम् ।
वृक्षे द्रुमो विद्रुमो द्रुःकुठिः कुण्ठोऽंह्रिपोऽङ्घ्रिपः ॥ १२२ ॥

शालस्तालव्य-दन्त्यादिः शिखी शाख्यगमोऽगवत् ।
पारिन्दश्चापि पालिन्दो गाथकेऽपि दलान्विते ॥ १२३ ॥

पर्णलः पर्णिलो वृक्षे स्थाने वृक्षैर्वृतान्तरे ।
निकुञ्ज-कुञ्जौ जरुट-जरुडौ च, वनस्पतौ ॥ १२४ ॥

फलाप्तवृक्षे फलवान् फलिनश्च फली तथा ।
फलपाकावसानायामौषध्यौषधिरोषधी ॥ १२५ ॥

क्षुपो ह्रस्वशिफाशाखे क्षुपको, व्रततिर्लता ।
प्रततिर्व्रतती तद्वद् वल्लि-वल्ल्यौ च वेल्लिवत् ॥ १२६ ॥

प्ररोहे रोहेऽप्यङ्कूराङ्कुरौ शाखा शिखा लता ।
स्कन्धशाखा शाला साला जटा जटिः शिफा शिफः ॥ १२७ ॥

मूले वृक्षस्य बुध्नः स्याद् ब्रध्नोऽह्रिरङ्घ्रिसंयुतः ।
मज्जा नान्तो ना मज्जाबन्ता सारेऽथ वल्लिका ॥ १२८ ॥

त्वचस्त्वचा त्वक् च चोचं शल्कं वल्कं च वल्कलम् ।
शकलं वल्के शल्के त्वर्धेऽपि शल्कं शकलेऽपि ॥ १२९ ॥

कोटरे निष्कुटः प्रोक्तो निष्कहो, वल्लरौ पुनः ।
वल्लरी मञ्जरी मञ्जा मञ्जरिश्चापि, पर्णके ॥ १३० ॥

पत्रं पात्रं पतत्रं च छादनं छदनं छदः ।
सन्तं छदोऽस्त्री चादन्तः, नवेऽस्मिन् किसलं स्मृतम् ॥ १३१ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

किसलयं द्वयं दन्त्यं, पुष्पे सुमनसः स्त्रियाम् ।
भूम्नि सुमना ऐक्येऽपि प्रसूनं सून-सूनके ॥ १३२ ॥

प्रसूतकं प्रसूतं च प्रफुल्लं फुल्लवत् सुमम् ।
कुसुमं, कलिकायां तु कलिः स्यात्कोर-कोरकौ ॥ १३३ ॥

कुड्मले कुद्मलं तद्वत् कुष्मलं कुमलं तथा ।
मुकुलं मकुरं प्रोक्तं मुकुरं, बकुलद्रुमे ॥ १३४ ॥

कुलालदण्डे कोरको दर्पणेऽपि च कोशवत् ।
कोषो द्वौ च कक्षे दिव्ये रैवये योनिशिम्बयोः ॥ १३५ ॥

जातीकोशे सिपिधानेऽण्डकोऽपि स्तबके पुनः ।
गुत्सो गुच्छो गुलुम्बुश्च गुलुच्छुः सगुलुच्छकः ॥ १३६ ॥

गुच्छको गुञ्छको गुञ्छो गुलुञ्छोऽस्त्री, रसे पुनः ।
पौष्पे मकरन्दः ख्यातो मकलन्दो मकरन्दवत् ॥ १३७ ॥

प्रबुद्धे प्रफुल्ल-फुल्ले संफुल्लोत्फुल्लके स्फुटम् ।
स्फटितं सव्याकोशं च व्याकोषं स्यात् फले पुनः ॥ १३८ ॥

शस्यं तालव्य-दन्त्यादि वानावाने तु शुष्कके ।
ग्रन्थौ पकः षण्ढं सन्तं पसश्च बीजकोशिका ॥ १३९ ॥

शिम्बा सिम्बायुता शिम्बिः शमी शिमिश्च पिप्पली ।
पिप्पलः पिप्परी बोधिः स्याद् बोधिद्रुम इत्यपि ॥ १४० ॥

स्यादश्वत्थे च, प्लक्षे तु पर्कटी नन्त-ड्यन्तगः ।
जटी नन्तो जटी ड्यन्तो भवेज्जटिरिदन्तकः ॥ १४१ ॥

न्यग्रोधे तु वटो वट्या वटं जन्तुफले पुनः ।
उदुम्बरोडुम्बरौ द्वौ मलयूर्जघनेफला ॥ १४२ ॥

मलयुः, सहकारेऽम्र आम्रोऽपि शिग्रुके स्मृतः ।
दन्त्य-तालव्यादिः शालाञ्जनोऽक्षीव आक्षीववत् ॥ १४३ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पुन्नागे केशरो दन्त्य-तालव्यमध्यः केशवः ।
बकुले केशरस्तद्वत् केसरः सिंहकेसरः ॥ १४४ ॥

मालूरे बिल्वो बिल्वी च, पर्णगुच्छे कुरण्टकः ।
कुरुण्टक-कुरण्डकौ किङ्करातवदीरितः ॥ १४५ ॥

किङ्किराटः, पलाशे तु दन्त्य-तालव्यमध्यगः ।
किंसुकस्तृणराजे तु तलस्तालश्च तद्विदि ॥ १४६ ॥

तालि-ताडी, देवताडे देवताडी खरागरी ।
खरागर्यौ समे प्रोक्ते अगरीवद् गिरागरी ॥ १४७ ॥

मोचायां तु रम्भा रम्भः कदलिः कदलोऽपि च ।
कन्दलस्त्रिषु वारणवुषा बुषा बुसान्विता ॥ १४८ ॥

हयमारे करवीरः कणवीरस्तथा मतः ।
प्रतिहासः प्रतीहासः स्याद् गिरिमल्लिका कुटः ॥ १४९ ॥

कौटजः कुटजः कोटी, तत्फले त्विन्द्र-भद्रतः ।
यवं कलिङ्गं कलिङ्गा, वेतसे वेतसी रथः ॥ १५० ॥

रथाभ्रपुष्पोऽभ्रपुष्पः, कौलौ तु बदरी भवेत् ।
बदरिस्तथा कर्कन्धुः कर्कन्धूः कर्कुन्धुवत् ॥ १५१ ॥

कर्कुन्धूर्घुट्टा घोण्टा च गोपघोण्टातने भवा ।
नीपे कदम्ब-कलम्बौ शालस्तालव्य-दन्त्यवान् ॥ १५२ ॥

सर्जे फेनिले त्वरिष्ठो रिष्ठोऽपि पिचुमन्दवत् ।
पिचुमर्दोऽपि निम्बेऽथ कर्पासे पिचुतूलयुक् ॥ १५३ ॥

पिचुस्तूलः पिचव्यश्च, कृतमाले त्वारग्वधः ।
आर्ग्वधारगवधौ च शम्पाकश्च सम्पाकवत् ॥ १५४ ॥

वृषे वृषक-वृषभावाटरूषोऽटरूषकः ।
अटरुषोऽटरुषक आटरूषो अटाद् रुषः ॥ १५५ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वाशको वाशिका वासा वाशा स्त्रीन्रोः करञ्जवत् ।
करजोऽपि नक्तमाले रक्तमालस्तथेमकौ ॥ १५६ ॥

काकाचिकः काकचिकस्तद्विशेषे तु पूतिकः ।
पूतीकोऽपि महावृक्षे स्नुक् स्नुट् स्नुहिः स्नुही स्नुहा ॥ १५७ ॥

गुडो गुडा गुडी वज्रो वज्रा वज्री सिहुण्डवत् ।
सीहुण्डो पराजितायामास्फोटा स्फोतया समम् ॥ १५८ ॥

पारिभद्रे तु मन्दारुर्मन्दारो मन्दरोऽपि च ।
मधुद्रुमे मधूकः स्याद् मधुकश्च मधूलकः ॥ १५९ ॥

मध्वष्ठीलो मधुष्ठीलो मधुश्चापि, पलङ्कषे ।
गुग्गुलो गुग्गुलुः कुम्भं कुम्भोलूश्च कुभोलुवत् ॥ १६० ॥

उलूखलं च खलकं कुम्भोलूखलकं तथा ।
चारे प्रियालः पियालो राजादन-राजातनौ ॥ १६१ ॥

सन्नकद्रुः सन्नकोद्रुर्धनुष्पटो धनुष्पटौ ।
धनुरुदन्तः क्षीरिण्यां क्षीरिका च राजादनः ॥ १६२ ॥

राजातनो राजन्यां च फलाध्यक्षोऽप्यध्यक्षवत् ।
रथद्रुमे स्यात्तिनिशं तिलिशो नेमि-नेमिनौ ॥ १६३ ॥

नेमी इ्यतोऽपि नारङ्गे नार्यङ्गस्तापसद्रुमे ।
इङ्गुदी गुदमिङ्गुदः स्याच्छ्रीपर्ण्यां तु काश्मरी ॥ १६४ ॥

कश्मरीवत् काश्मर्या च काश्मीर्यपि च संमता ।
कम्भारी गम्भारी तुल्ये अम्लीकायां मताम्लिका ॥ १६५ ॥

अम्बिलका चाम्बिलकाऽम्ब्लीका तिन्तिडी तिन्तिली तथा ।
तिन्तिडीका तिन्तिडिका, दाडिमः शुकवल्लभे ॥ १६६ ॥

दाडिम्बो दालिमोऽपि स्याच्छेलुः श्लेष्मान्तके शलुः ।
लकुचे लिकुचोऽप्युक्तो डहुश्चाडहुरित्यपि ॥ १६७ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

बीजके त्वासनः प्रोक्ताऽसनोऽशनवदाशनः ।
पाटला पाटलिः स्त्रीन्नोर्बहुत्वके भवेद् भुजः ॥ १६८ ॥

भूर्जो भुर्जः कर्णिकारे परिव्याधश्च व्याधवत् ।
जलवेतसभेदे स्यादिज्जलो हिज्जलोऽपि च ॥ १६९ ॥

निचुलो निचुरो धात्र्यामामलकी त्रिलिङ्गिका ।
कायस्थावद् वयःस्था च स्याद् भूम्यामलकी पुनः ॥ १७० ॥

ताली तामलक्यमली झाट्य चाज्झटयान्विता ।
विनुन्नको नद्वयाप्तो बिभीतक-बिभेदकौ ॥ १७१ ॥

अक्षभया हरीतकी त्रिलिङ्गा स्याद् वयःस्थया ।
कायस्थैतत्फलत्रय्यां त्रिफली त्रिफला फलम् ॥ १७२ ॥

तृफला, गन्धवृक्षे तु वरणो वरुणस्तथा ।
भवेत् तमाले तापिच्छस्तापिञ्च्छो बिन्दुसंयुतः ॥ १७३ ॥

सिन्दुवारे तु निर्गुण्डी निर्गुण्डा च निगुण्ठ्यपि ।
सुरस इन्द्रसुरिसोऽप्यथातिक्तके लता ॥ १७४ ॥

माधवीलता माधव्यथोड्रपुष्पे जपा जवा ।
मालत्यां तु जातिर्जाती सुमनाऽऽबन्त-सन्तगा ॥ १७५ ॥

विचकिले मल्लिका च मल्लिः स्याच्छतभीरुका ।
शीतभीरुर्वनजेऽस्मिन्नास्फोता स्फोटया समम् ॥ १७६ ॥

शिवमल्ल्यां बक-बुकौ वसूको वसुको वसुः ।
वृक्षरुहायां तु वन्दा वन्दाका च जयन्त्यपि ॥ १७७ ॥

जीवन्ती सुषिणे करमर्दः स्यात् करमन्दवत् ।
कृष्णपाकफलः कृष्णपाकः कृष्णफलात् परः ॥ १७८ ॥

पाकः पाककृष्णफलः पाकाढिफलकृष्णवत् ।
प्रियङ्गौ फलिनीयुक्ता फला जम्बीरपादपे ॥ १७९ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जाम्बीरोऽपि च जम्भीरो जम्भीलो जम्भ-जम्भलौ ।
बीजपूरे पूरकः स्यात् सुपूरकश्च केसरी ॥ १८० ॥

केसराम्लोऽम्लकेसरो मातुलिङ्गश्च लिङ्गवत् ।
मातुलुङ्गोऽपि, ग्रन्थिले करीर-क्रकरौ समौ ॥ १८१ ॥

करर एरण्डे मण्ड आरण्डः स्यादमण्डवत् ।
उरुबूकश्चोरुबुको व्यडम्बक-व्यडम्बनौ ॥ १८२ ॥

कपिकच्छ्वां तु कण्डूरा कण्डुराण्डाध्यवेः परा ।
शूकशिम्बा शूकशिम्बी विजयायां तु मातुली ॥ १८३ ॥

मातुलानी भृङ्गी भङ्गा धूर्ते धुस्तूर-धूस्तुरौ ।
धूस्तूर-धुस्तुरौ धुस्तुर्धर्तूरो धुत्तुरो रवौ ॥ १८४ ॥

अर्कोऽर्कपर्णो वसुको वसुरा स्फोटयान्विता ।
आस्फोताऽथ दधिफले कपिच्छः स्यात्कपिच्छवत् ॥ १८५ ॥

लाङ्गली नन्तो ड्यन्तो नालिकेरी नालिकेरवत् ।
नालिकेलो नालीकेरो नालिकेरश्च पर्णकः ॥ १८६ ॥

चीर्णात्कर्जूर-खर्जूरौ वर्षपाकी कपीतनः ।
पीतनकोऽम्नातकश्चाम्रातकः क्रकचच्छदे ॥ १८७ ॥

केतकः केतकी कोविदारे कुद्दालवत् स्मृतः ।
कुदारो, गजप्रियायां शल्लकी सल्लकीति च ॥ १८८ ॥

सिल्लकी ह्लादिनी ह्लादा तन्त्रिर्यासे तु कुन्दुरुः ।
त्र्युकारः, कुन्दः पालक्यां पालङ्कीति च वंशके ॥ १८९ ॥

त्वचिसारः त्वक्सारोऽपि शिंशपाऽगरुशिंशपा ।
अगरुवंशलोचना भवेद् वांशीव वंशजा ॥ १९० ॥

तुकाक्षीरी त्वक्क्षीरी च त्वक्क्षीरं रोचना च गोः ।
गोपित्तरोचना, पूगे गूवाकः स्याद् गुवाकवत् ॥ १९१ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तद्भेदे चिक्कणं चिक्कं ताम्बूली कथिता बुधैः ।
ताम्बूलवल्ल्यां क्रमुकपर्णचूर्णकसंयुजि ॥ १९२ ॥

तम्बुलं च सताम्बूलं तुम्ब्यां तुम्बः सतुम्बकः ।
तुम्बी तुम्बिरलाबूवदालाबूरप्यलाबु च ॥ १९३ ॥

लाबुका गुञ्जायां काकचिञ्चिका काकणिन्दिका ।
काकनन्तिका, गोस्तन्यां मृद्वीका स्याद् मृदीकषा ॥ १९४ ॥

रसा द्राक्षा ध्राक्षा कण्ठ्यां त्रिकण्ट-त्रिककण्टकौ ।
गोक्षुरो गोक्षुरु-क्षुरौ गोखुरो गिरिकर्णिका ॥ १९५ ॥

आस्फोता स्यादास्फोटा च वीरणीमूल आदृतम् ।
उशीरमुषिरमुशिग् जान्तो लघुलयं लघु ॥ १९६ ॥

लयमृणाला-मृणाले अवदाहेष्टकापथम् ।
इष्टकापथावदाहौ बालके वाल इष्यते ॥ १९७ ॥

ह्रीवेरं हिरिवैरं च दद्रुघ्ने तु प्रपुन्नटः ।
प्रपुन्नाटश्च प्रातुन्नाटकः पद्माट इत्यपि ॥ १९८ ॥

प्रपुन्नाडः प्रपुनाड उरणा-क्षोरणाख्यकौ ।
शिरीषे भण्डी भण्डीरो भण्डिरो भण्डिलोऽपि च ॥ १९९ ॥

जम्बूवृक्षे जम्बुरपि तत्फले जम्बु-जाम्बवे ।
जम्बूः स्त्री स्यादरलौ त्वरेटुः श्योनावशोणकौ ॥ २०० ॥

स्योनाकः कुटन्नटवद् नटोऽथ चिरजीवकः ।
जीवको मधुरकश्च मधुरः कूर्चशीर्षके ॥ २०१ ॥

कपीतनो गर्दभाण्डे कपीतः पीतनस्तथा ।
नागकेसरे केसरो नागः स्याद् मदनद्रुमे ॥ २०२ ॥

पिण्डी पिण्डीतकः कटह्लद्रौ पनसः स्मृतः ।
फनसः पणसो भल्लातके रुष्वोऽप्यरुष्करः ॥ २०३ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पिच्छिलायां शाल्मलिः स्याच्छल्मलिः शाल्मलोऽपि च ।
प्लीहशत्रौ रोहितको सरोहितक-रोहितौ ॥ २०४ ॥

रोही खदिरे गायत्री नन्तो ड्यतश्च कथ्यते ।
पुण्डरीके तु पुण्डर्यं प्रपुण्डरीकमित्यपि ॥ २०५ ॥

कतके कतोऽपि केशहन्त्र्या शमिः शमीति च ।
ह्रस्वा शमीरुः शमीरस्तूते तूदं तुदं तथा ॥ २०६ ॥

मधुयष्ट्यां यष्टिमधु यष्टीमधुकमादृतम् ।
यष्टिर्मधुकं त्वक्पत्रे गुडत्वक् त्वक् त्वचं तथा ॥ २०७ ॥

वराङ्गकं वराङ्गं च स्यादेलायां तु निष्कुटिः ।
निष्कुटा स्थूलैलायां तु कथिता त्रिपुटा पुटा ॥ २०८ ॥

कर्कटशृङ्ग्यां शृङ्गी च कृष्णाभेद्यां कटंवरा ।
कटुकी कटुकश्चापि अशोका रोहिणीयुता ॥ २०९ ॥

अशोकरोहिणी दारुहरिद्रायां कालेयकः ।
कालीयको गालवे तु रोध्र-लोध्रौ च सावरः ॥ २१० ॥

तालव्य-दन्त्यपूर्वः स्यात्, तद्भेदे ङ्यन्त-नान्तगः ।
पट्टी फणिज्जके तु स्याद् मरुबक-मरूबकौ ॥ २११ ॥

रक्ताम्राते कुरुबकः सोकारानुकारकः ।
महासहायामम्लातो म्लातको म्लान इत्यपि ॥ २१२ ॥

अमिलातकेऽपि दुरालभायां तु यवासकः ।
यवास-यवाषौ यासो धन्वयासोऽपि सम्मतः ॥ २१३ ॥

धन्वयवासको धन्वयासो रोदनी बोधनी ।
मोरटायां मूर्वा मूर्वी स्रवा स्रुवाऽपामार्गके ॥ २१४ ॥

खराद् मञ्जरि-मञ्जर्यौ भार्म्यां हिञ्जी च फञ्जिका ।
ब्राह्मणी नाह्मणाद्या स्याद् यष्टिकाथ किरातकः ॥ २१५ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

किरातो हैमे कुष्ठे तु वर्ग्यद्वादशसंयुते ।
वानीरं वानीरजं च व्याप्यमाप्यं च तद्विदि ॥ २१६ ॥

शतरुषा शतारुश्च सन्तोऽथो कत्पले पुनः ।
काफलं कट्फलस्तद्वत् केटरः कैटर्यं तथा ॥ २१७ ॥

अजमोदायां तु मयूरो भवेद् हस्तमयूरकः ।
यवानिका यवानी च यमानिका यमान्यपि ॥ २१८ ॥

झिण्ट्यां सैरेयश्च सैरीयकः सहचरान्वितः ।
सहाचरो नीलझीण्ट्यां वाणो वाणाथ पीतिका ॥ २१९ ॥

कुरुबकः कुरुण्टकः सहाचरः सहाच्चरः ।
सहचरी शतपुष्पा सितच्छत्राऽतिच्छत्रका ॥ २२० ॥

मिशिर्मिशी मिसि-मिस्यौ मधुरा तु मधूरिका ।
सालेयो दन्त्यतालव्यो मिशी मिशिर्मिसी मिसिः ॥ २२१ ॥

मिश्रेया कोकिलाक्षे तु क्षुर इक्षुर इत्यपि ।
शङ्खिन्यां तु चोरपुष्पी चौर्यथो खरकाष्ठिका ॥ २२२ ॥

काष्ठिकापि बलायां स्याद् नागबलायां तु द्वे पुनः ।
गङ्गेष्ठिका गङ्गेरुका महाबलायां संगता ॥ २२३ ॥

सहदेवी देवसहा हिङ्गुपत्र्यां तु कारवी ।
करवी कबरी तद्वत् कवरी बाष्पिकायुता ॥ २२४ ॥

बाष्पीका पृथु-पृथ्व्यौ च स्याद् मयूरशिखोऽप्यसौ ।
मयूरो लोचतः ख्यातो मस्तको मर्कटोऽपि च ॥ २२५ ॥

श्यामलतायां गोपे च गोपी गोपालिका तथा ।
गोपवल्ली शारिवावद् भवेदुत्पलशारिवा ॥ २२६ ॥

चोराख्यगन्धद्रव्ये तु गणवद् गणहासकः ।
शुषिरायां नटी-नल्यौ ग्रन्थिपर्णेऽशुकं मतम् ॥ २२७ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शुकबर्हं बर्हिः पुष्पं पुष्पं स्पृकौषधौ पुनः ।
कोटीवर्षा कोटिवर्षा कोटिर्माला मरुद्युता ॥ २२८ ॥

मरुन्मालाऽप्यथ वृद्धदारके इक्षगन्धया ।
इक्षुगन्धा छागलात्री छगली तद्वदात्र्यपि ॥ २२९ ॥

दन्त्यां मकूलक-मुकूलौ रक्ताङ्गके पुनः ।
स्यात्कम्पिल्लश्च काम्पिल्लः काम्पिल्योऽपि कम्पीलवत् ॥ २३० ॥

रोचना रेचनी बलभद्रिका त्रायमाणिका ।
त्रायन्ता, रास्नायां रस्या रसना रसनं रसा ॥ २३१ ॥

मांसिगन्धद्रव्ये मिषी मिसिश्च जटिला जटा ।
जनातिगन्धद्रव्येषु स्याज्जनी जननी जनिः ॥ २३२ ॥

जतूका जतोः का-कार्यौ जतुकृच्चातिविषा पुनः ।
विषी विषा प्रत्युपाभ्यां त्रिवृति त्रिवृता स्मृता ॥ २३३ ॥

त्रिपुटी त्रिपुटा प्रोक्ता रोचनी रेचनीयुता ।
शतवीर्यायां तु शतावरी चेन्दीवरी वरी ॥ २३४ ॥

सहदेव्यां सहदेवः सहदेविश्च कथ्यते ।
मञ्जिष्ठा वर्गद्वितीययुग् भण्डीरी च भण्डिरी ॥ २३५ ॥

भाण्डीरी भण्डी विकसा विकषा कालमेश्यपि ।
कालमेषी चविकायां चविकं चवनं तथा ॥ २३६ ॥

चव्यं चव्याऽप्यथ तण्डुलायां तु तण्डुलः ।
तन्तुलोऽपि विडङ्गं च विलङ्गं गन्धमूलिका ॥ २३७ ॥

शटी षटी च कर्चूरः कर्चूरोऽप्यथ क्षीरिणी ।
हिमावती हिमवती स्थिरायां शालपर्णिका ॥ २३८ ॥

दन्त्य-तालव्याद्याथाखुपर्ण्यां चित्रोपचित्रया ।
ऐलवालुके वेलेयं वालुकं हरिवालुकम् ॥ २३९ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नवमालिका सप्तला सातला कैवर्त्तीपरे ।
मुस्तके वानेयं वन्यं प्लवं च परिपेलवम् ॥ २४० ॥

दशपूरं दशपुरं, कटम्भरौषधौ मता ।
भद्रबला राजबला महाबला प्रसारणी ॥ २४१ ॥

सरणी सरणा वापि सारणी कटली पुनः ।
ज्योतिष्का ज्योतिष्मती च तर्कार्या वैजयन्तिका ॥ २४२ ॥

जया जयन्ती पानीयकण्टके तु शृगाटकम् ।
सङ्घाटिका त्रिकोणश्च त्रिकोने प्रोपमे पुनः ॥ २४३ ॥

बातामममपि बादामं पद्मेब्जोऽदन्त-सन्तषण् ।
जलात् पङ्कात् सरसोऽपि परे जन्म-ज-रुट्-रुहाः ॥ २४४ ॥

सरसीरुहं सरसिरुहं विसप्रसूतवत् ।
विसप्रसूनमपि स्यात्कैरविण्यां कुमुद्वती ॥ २४५ ॥

कुमुदिन्यथोत्पले तु कुवेलं कुवलं कुवम् ।
कुवलयं कैरवे तु कुमुदं कुमुदुत्पले ॥ २४६ ॥

नीले त्विन्दीवरं चन्दीवारमिन्दीकरं तथा ।
सौगन्धिके तु कल्हारं हकाराक्रान्तलान्वितम् ॥ २४७ ॥

पद्मनाले तु मृणालं मृणाली च विशं विसम् ।
विसण्डकं च पद्मादिवृन्ते नाली तु नालया ॥ २४८ ॥

नालं किञ्जल्के तालव्य-दन्त्यमध्यं तु केसरम् ।
नवपत्रे संवर्तिका संवर्तिर्जलनीलिका ॥ २४९ ॥

शेवालं शैवलं शैवालं शेपालं च शीवलम् ।
शेवलं पाटलसाला वाशुराशु च व्रीहिवत् ॥ २५० ॥

आशुव्रीहिः कलमस्तु कडमश्च कलामकः ।
मङ्गल्यके मङ्गल्याऽपि मसूरो मसुरस्तथा ॥ २५१ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मसूरा मसुराऽप्येते वेश्यायामपि वार्द्धयः ।
कलाये सतीनकः स्यात् सातीनश्च सतीनवत् ॥ २५२ ॥

सतीलक-सातीलकौ त्रिकटोऽङ्कट इत्यपि ।
चणके हरिमन्थः स्याद् हरिमन्थज इत्यपि ॥ २५३ ॥

मुद्गे हरिः सहरितस्तुम्बरस्तु वनोद्भवे ।
राजमुद्गे मकुष्टः स्याद् मयुष्ठोऽपि स-ठान्तिमौ ॥ २५४ ॥

मुकुष्ठक-मयष्ठकौ वर्गाद्याप्तौ स-ठान्तिमः ।
मुकुष्ठः स्याद्, धान्यभेदे कुल्माषश्च कुल्मासवत् ॥ २५५ ॥

जघन्यव्रीहौ श्यामाकः श्यामकः पीततण्डुला ।
कङ्गु-क्वङ्गू कङ्गुनी च कङ्कुश्च, कोरदूषके ॥ २५६ ॥

कोद्रवः कुद्रवोऽप्युक्तः, युगन्धर्या तु योनलः ।
जोन्नाला यवनालश्च, जूर्णा जूर्णिः शणः सणः ॥ २५७ ॥

भङ्गायाम्, गवेधुकायां गवीधुका गवेधुवत् ।
गवेडुश्च, तिलात्पिञ्जपेजौ षण्ढतिले ह्युभौ ॥ २५८ ॥

कदम्बके सरिषपः सर्षपः, सस्यशीर्षके ।
कविशं कणिशोऽफलकाण्डे पल-पलालकौ ॥ २५९ ॥

कडङ्गरे वुसवुषौ, मेघनादे स्मृतावुभौ ।
तण्डुलीयस्तण्डुलेरस्तण्डुलीशाकभिद्यहो ॥ २६० ॥

मारिषं मारुषम्, बिम्ब्यां स्यात्तुण्डी तुण्डिकेरिका ।
तुण्डिका तुण्डिकेरी च, मधुस्रवायां तु जीवनी ॥ २६१ ॥

जीवन्ती जीवनीया च जीवा स्यात्, क्षारपत्रके ।
शाकवीरो वीरशाको वास्थूकमपि वास्तुकम् ॥ २६२ ॥

चङ्गेर्यां स्यादम्ललोना लोणिका चाऽम्ललोणिका ।
अम्बोष्ठिकायुताऽम्बष्ठा टोलावदम्लटोलकः ॥ २६३ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

खरपुष्पायां कबरी बर्बरा बर्बरी तथा ।
वृन्ताके वार्ता वार्ताकी वार्ताकं च वार्ताकुवत् ॥ २६४ ॥

वार्ताङ्गो वातिङ्गणश्च तथैव दुष्प्रधर्षिणी ।
दुष्प्रधर्षणी च, शतपर्णायां तु कलम्बिका ॥ २६५ ॥

कलम्बूश्च, पालघ्ने तु छत्रा-छत्रा-ऽतिछत्रवत्
अतिछत्रस्तिक्तके तु पटोलः पटुवत् स्मृतः ॥ २६६ ॥

पुष्करमूले पौष्करं पुष्करं मूलमित्यपि ।
भृङ्गराजे भृङ्गरोऽपि भृङ्गरजो नादन्तगः ॥ २६७ ॥

भृङ्गरजश्च सान्तोऽपि षर्बूजे चाऽपि मूर्धजे ।
दशाङ्गुलमितिख्यातं कारवेल्ले सुशव्यपि ॥ २६८ ॥

सुषवी सुशवी कर्कारौ कुष्माण्डो विदां मतः ।
कुष्माण्डोऽपि च कूष्माण्डी, पटोल्यां तु कोशातकी ॥ २६९ ॥

कोषातकी च, कर्कट्यां स्यादीर्वारुरिर्वारुवत् ।
ऊर्वारुरुर्वारुरपि एर्वारुश्चिर्भिटी तथा ॥ २७० ॥

चिर्भिटं चिर्भिटस्तद्वत् वालुङ्कः स्याद् वालुक्यपि ।
त्रपुषी त्रपुसी त्रपुषं त्रिपुषं च, घ्नेऽर्शसः ॥ २७१ ॥

शूरणो दन्त्यतालव्यादिमः, बालतृणे पुनः ।
शस्यं स्याद्दन्त्यमूर्धन्यमध्यम्, बर्हिषि दभ्रवत् ॥ २७२ ॥

दर्भः कुशः कुसो मुञ्जे शरस्तालव्यदन्त्यभाक् ।
दूर्वायां हरितालीवद्धरिता, धमने नडः ॥ २७३ ॥

नलो नटः, कुरुविन्दे मुस्ता त्रिषु च मुस्तकः ।
इक्षौ गण्डीरी गण्डकी, पुण्ड्रेक्षौ पुण्ड्र-पौण्ड्रकौ ॥ २७४ ॥

कासस्तालव्यदन्त्यान्त ईषीका स्यादिषीकया ।
यवासं यवसंघातेऽर्जुने तु द्वे तृण-त्रिणे ॥ २७५ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मालातृणं भूस्तुणं च, विषे तु गर-सङ्गरौ ।
गरलोऽथ हालाहले हालहलो हलाहलः ॥ २७६ ॥

पर्यन्तवने त्वोकण्युकणी, कीटे कृमिः क्रिमिः ।
लाक्षायामपि तद्भेदे नीलाङ्गुश्च नीलङ्गुवत् ॥ २७७ ॥

गण्डूपदे किञ्चुलकः किञ्चुलुकोऽपि सम्मतः ।
जलसर्पिण्यां जलूका जलौका च जलौकसः ॥ २७८ ॥

स्त्रियां वा भूम्नि च जलालोका प्रोक्ता जलौकसः ।
पुंस्यदन्तो जलायुकाऽस्त्रपाऽऽबन्ता विजन्तकः ॥ २७९ ॥

अम्बुमात्रजशङ्खे तु शम्बुः शम्बूश्च शम्बुकः ।
शम्बूकश्च सशाम्बूकः, कपर्दे तु हिरण्यवत् ॥ २८० ॥

हिरणः कथितः प्राज्ञैर्दीर्घकोशा पुनः स्मृता ।
दीर्घकोषा च दुर्नामाऽऽबन्तो नान्तो दुर्नाम्न्यपि ॥ २८१ ॥

पिपीलके पीलकोऽपि, क्षुद्रजन्तौ तु धान्यजे ।
कणाटीनः कटटीनः स्याद् युकाण्डे तु लिक्षया ॥ २८२ ॥

रिक्षोद्दंशे कोलकणो मत्कुणोत्कुणकावपि ।
इन्द्रगोपे त्विन्द्ररजोऽग्निकोऽथ तन्तुवायके ॥ २८३ ॥

तन्त्रवाय ऊर्णनाभ उर्णनाभिश्च मर्कटः ।
मर्कटको जालिकश्च जालकारकवत् कृमिः ॥ २८४ ॥

क्रिमिर्वृश्चिकेऽलि-राल्य-लालिर्द्रोणो द्रुणो द्रुतः ।
भ्रमरेऽलि-रली मधुकृत् मधुकरः शिलीमुखः ॥ २८५ ॥

शिलामुखः, मक्षिकायां भिम्भरा भिम्भराल्यऽपि ।
मधुरस्त्री मधूलं च, माक्षिके वरूटी पुनः ॥ २८६ ॥

वरट्यऽपि च, गन्धोल्यां वर्षकर्यां तु चीरिका ।
चीरी चरुका चिरुका झीरुका झिल्लीकायुता ॥ २८७ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

झिल्लो झिल्लिका झिलिका विलेपनमले तथा ।
आतपस्य रुच्यपि च, श्वापदे व्याड-व्यालकौ ॥ २८८ ॥

द्विपे मतङ्ग-मातङ्गौ गजो गर्जो मतङ्गजः ।
करी करिर्दन्तावलो दन्ती पेचकिपेचिलौ ॥ २८९ ॥

हस्तिन्यां धेनुका धेनुर्वाशिता वासिता द्वयम् ।
नार्यामपि कणेरुश्च गणेरुरपि तद् द्वयम् ॥ २९० ॥

वेश्यायां कर्णिकारेऽपि करेणुः स्त्रीन्त्रिभीभयोः ।
विंशतिवर्षेभे विक्कः, पिक्कोऽपि त्रिंशदब्दके ॥ २९१ ॥

कलभः कडभश्च द्वौ उद्वान्तोपात्तकौ समौ ।
निर्मदे राजबाह्ये त्वौपवाह्यश्चोपवाह्यवत् ॥ २९२ ॥

हस्तिदन्ते विषाणं स्याद्विषाण्यपि विषाणकः ।
तन्मूले तु करीरीवत्करीरिर्नेत्रगोलके ॥ २९३ ॥

ईषिका स्यादिषीकेवेभगण्डे करटः कटः ।
गजपश्चिमभागे त्वपरावदऽवरेदिता ॥ २९४ ॥

शृङ्खलस्त्रिषु हिञ्जीरे निगडो निगलोऽन्दुकः ।
अन्दूर्गजबन्धभूमौ वारिर्वारी च तोत्रके ॥ २९५ ॥

वेणुकं वैणुकम्, दन्त्यतालव्यादिः शृणिर्मतः ।
अङ्कुशे, तदग्रेऽपष्ठं काद् द्वादशाऽक्षरान्तिमम् ॥ २९६ ॥

वीते वातं यतं चोक्ते, वरत्रायां सया पया ।
कक्ष्या गृहप्रकोष्ठे च काञ्चीसादृश्ययोरपि ॥ २९७ ॥

अश्वे तुरगस्तुरङ्गस्तुरङ्गमश्च वाज्यपि ।
वाजिर्वीतिः पीतिः पीती नान्तोऽश्वायां तु वामिवत् ॥ २९८ ॥

वामी-वनायुजा-वानायुजा-वाल्हीका-वाल्हिकाः ।
पुच्छे लङ्गुलं लाङ्गुलं गतिभेदे तु धौरितम् ॥ २९९ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

धौरितकं धोरणं च धौर्यं स्यान्मुखयन्त्रणे ।
खलीनं खलिन-कवी कविका कवियं कविः ॥ ३०० ॥

सन्नाहऽस्य प्रक्षरं प्रखरोऽस्त्री रश्मि-रस्मिके ।
रुक् च वल्गा वल्गो वागाऽश्वतरे वेगतः सरः ॥ ३०१ ॥

वेसरो वेसरादश्वायां जाते, मुकयस्तथा ।
मुकुयो द्वौ मृगभेदे, गर्दभ्यश्वतरात्मजे ॥ ३०२ ॥

अप्युष्ट्रे तु मय-मयू क्रमेलश्च क्रमेलकः ।
दाशेरकः सदाशेरः, उक्ष्णि शक्वर-शाक्वरौ ॥ ३०३ ॥

शाङ्करश्च वृषा नान्तो वृषोऽपि वृषभर्षभौ ।
शण्डे षण्डोऽपीड्वरः स्यादित्वरः, विद्धनासिके ॥ ३०४ ॥

नस्योतो नस्तितो नस्तोतः स-ठौ प्रष्ठ-पष्ठतः ।
वाड, दमयो जितहलवोढ्रेकधुरावहे ॥ ३०५ ॥

एकधुरीणैकधुरौ, धूर्वहे तु धुरन्धरः ।
धूरीणधुर्यधौरेया धौरेयकोऽथ पृष्ठ्यके ॥ ३०६ ॥

स्थौरी स्थूरी स्थूली, षोडः षोडन् षोडत इत्यपि ।
पड्दन्ते, सकूटे तु कुकुदे ककुदं ककुत् ॥ ३०७ ॥

स्त्रीराट्चिह्ने शैलाग्रे श्रेष्ठेऽपि द्वयमन्तिमम् ।
नैचिकं नैचिकी शीर्षे कूणिकायां तु कूणिवत् ॥ ३०८ ॥

शृङ्गं शृङ्गः शृङ्गिः शृङ्गी विषाणोक्ता विषाण्यपि ।
विषाणं विपाणो गव्यां गौर्द्वयोरनुडुह्यहो ॥ ३०९ ॥

अनुड्वाही तम्पा तम्बा माहेयी सह माहया ।
स्रवद्गर्भा त्ववतोका एतोका चोत्तमा च गौः ॥ ३१० ॥

नैचिकी निचिकी नीचिकी नीचीक्यऽप्यकोपना ।
सूरता सुरता रूरथा सुरथाऽथ गोकुले ॥ ३११ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गोधनं धनं कीलस्तु पुंस्त्रियोः पुष्पलान्वितः ।
पुष्पलकः शिवकश्च शिवोऽपि ध्रुवको ध्रुवः ॥ ३१२ ॥

बन्धने संदानोद्दाने दामा-दाम-दामो-द्दितम् ।
संदितं संदानितेऽजे छगलः छागवत् छगः ॥ ३१३ ॥

स्तभ-स्तुभौ, युवाजे तु बर्करो बर्करी तथा ।
बर्करम्, मेषे तु हुडुर्हुडोऽप्युरण ऊरणः ॥ ३१४ ॥

वडूटो वरुटस्तद्वद् वरूडो वरुडोऽपि च ।
भरूडो भरुडोऽप्युक्तो भरूटोऽस्थ्याशे कुक्करः ॥ ३१५ ॥

कुर्क्करः श्वानः स्वानश्च शुनकः श्वा शुनः शुनिः ।
शुनखो भषणो भषकोऽपीन्द्रमहकान्वितः ॥ ३१६ ॥

इन्द्रमहकामुकश्च श्वाने, द्वौ मृगयापटौ ।
विश्वकद्रुर्विश्वकद्रूः, शुनकी शुनका शुनी ॥ ३१७ ॥

श्वानकर्णे शुनस्कर्णः श्वकर्णोऽपि निगद्यते ।
सैरिभे मह-महिषौ लुलायश्च लुलायुयुक् ॥ ३१८ ॥

सिंहे पारिन्द्र-पारीन्द्रौ कण्ठीरव-कण्ठेरवौ ।
केशरी दन्त्यतालव्यः, व्याघ्रे द्वीपीव द्वीपिनः ॥ ३१९ ॥

चित्रकश्चित्रकायोऽपि, शरभेऽष्टापदोष्टपात् ।
गण्डके खड्गी खड्गीरः खड्गो वाध्रीणसोऽपि च ॥ ३२० ॥

दन्त्यतालव्यान्तः कोले शूकरः सूकरः किरिः ।
किरः ऋक्षे तु भल्लूको भाल्लूको भल्लुकस्तथा ॥ ३२१ ॥

भाल्लुकोऽपि च भालूकश्छोभल्लोऽप्यच्छभल्लवत् ।
गोमायौ फेरु-फेरण्डौ फेरवो भूरिमायवत् ॥ ३२२ ॥

भूरिमायुर्जम्बुकश्च जम्बूकोऽपि शृगालवत् ।
सृगालोऽपि शिवाऽऽबन्तः खिङ्गिरः खिङ्गीरा स्त्रियाम् ॥ ३२३ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भूम्युभौ तु शिवाभेदे खट्वाङ्गे वारि-वालुके ।
भिक्षुभङ्गेऽपि, कीशे तु प्लवगः सप्लवङ्गमः ॥ ३२४ ॥

प्लवङ्गः प्रवगोपेतः प्रवङ्गोऽथ मृगे भवेत् ।
मर्कटः कर्मटस्तद्वत् कुरङ्गश्च कुरङ्गमः ॥ ३२५ ॥

वातायुश्च सवातायुर्दन्त्यतालव्यपूर्वगः ।
शारङ्गः शबलवर्णे चातकेऽपि ससार्गकः ॥ ३२६ ॥

मृगभेदे कृष्णसारकालसारौ सदन्त्यकौ ।
सतालव्यौ च, पृषत् पृषतो बिलशायिनि ॥ ३२७ ॥

कन्दली नन्तो ङ्यन्तश्च कदली त्रिषु कन्दला ।
हस्तायामऽश्याममृगे ऋश्य-रिश्यौ च सम्मतौ ॥ ३२८ ॥

ऋष्य-रिष्यौ मृगभेदे, वाताभिमुखगामिनि ।
मृगे वातप्रमीः पुंस्त्रीदन्तो ङीबन्तकोऽप्ययम् ॥ ३२९ ॥

अमि पुंसि वातप्रमीं शशि वातप्रमीनिति ।
ङौ वातप्रमीति रूपं ग्रामणीवच्च शोषकम् ॥ ३३० ॥

स्त्रियामीदन्तं लक्ष्मीवद् ङीबन्तं तु नदीसमम् ।
श्वाविधि शललः शल्यः शल्यकः पुंस्त्रियोर्मतः ॥ २३१ ॥

तच्छलाकायां तु शलं शललस्त्रिषु गोधिका ।
अवलत्तिका लत्तिका गोधा, सर्पसुते पुनः ॥ ३३२ ॥

गोधेर-गोधारौ, पल्यां गृहोली गृहगोलिका ।
गृहोलिका मुसली मूर्द्धन्यतालव्यदन्त्यभाक् ॥ ३३३ ॥

अञ्जन्यामञ्जनाधिका हालिनी च हलाहलः ।
कृकलासे कृकुलासः सरटः सरडस्तथा ॥ ३३४ ॥

सरण्डश्च प्रतिसूर्यः प्रतिसूर्यशयानकः ।
शयानकः, आखौ तु स्याद् मूषिका मूषिकोऽपि च ॥ ३३५ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

उन्दरो-न्दुरो-न्दुरवः कुन्दुर्मूषी तु मूषिका ।
मूषा च, गन्धमूष्यां तु छुछुन्दरी छुछुन्दुरी ॥ ३३६ ॥

ओतौ बिडालो बिलालो दरुटो दरुडान्वितः ।
ह्वीको ह्लीको ह्वीकुर्ह्लीकुर्लज्जालौ नकुलोऽपि च ॥ ३३७ ॥

मार्जालीयश्च मार्जारोऽहौ भुजङ्गो भुजङ्गमः ।
भुजगः सर्प-सूर्पौ च सरीसृपश्च गूढपाद् ॥ ३३८ ॥

गूढपदो व्याल-व्याडावुरङ्गश्चोरगस्तथा ।
अजगरे शयथुश्च शयालुः स्यात् शयातु षण् ॥ ३३९ ॥

शयुर्जलसर्पे तु स्यादलीगर्दोऽलगर्दयुक् ।
अलगद्धोऽलीगद्धोऽपि राजिलाऽहौ तु डुण्डुभः ॥ ३४० ॥

दण्डुभो दन्दुभो दोडो दोलोऽपि च, तिलित्सिके ।
गोनासो गोनसोऽप्युक्तो घोणसः, मातुलोरगे ॥ ३४१ ॥

मालुधानोऽहिदंष्ट्रायामाश्यां-शीर्भोगके फटः ।
स्फटौ द्वौ पुंस्त्रियोः प्रोक्तौ फणस्त्रिषु च दर्वीवत् ॥ ३४२ ॥

दर्वी च कञ्चुके निर्ल्वयनी निर्लयनीयुता ।
पक्षिणी पत्त्री पतत्त्री नकारान्ताविदन्तकौ ॥ ३४३ ॥

पतन् पित्सन् पतङ्गश्च पतगो विहगो मतः ।
विहङ्गमो विहङ्गोऽपि नगौकाश्च नगौकवत् ॥ ३४४ ॥

सशकुन्तः शकुन्तिश्च शकुनिः शकुनः स्मृतः ।
वकीरो विकिरश्चापि विष्कीरश्च सृपाटिका ॥ ३४५ ॥

स्मृपाटी चञ्चुश्चञ्चूवत् त्रोटिस्त्रोटी, तनूरुहे ।
पिच्छं पिञ्छं पतत्रं च पत्रं पक्षो नरि स्मृतः ॥ ३४६ ॥

पक्ष नान्तं पक्षः सान्तं द्वे षण्ढे च, नभोगतौ ।
प्रडीनो-ड्डीन-संडीन-डयनान्यथ चाण्डके ॥ ३४७ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पीशीकोशः पेशी–कोशौ, नीडं त्रिषु कुलायके ।
केकिनि मोर–मयूरौ मयूको मरुकस्तथा ॥ ३४८ ॥

बर्ही च बर्हिणः शिखावलः शिखी, पिके पुनः ।
घोषयित्नुः पोषयित्नुः कोकिलः कौकिलान्वितः ॥ ३४९ ॥

मौकुलिर्मोकुलः काके, वनकाके तु द्रोणवत् ।
द्रोणकाकः निशाटे तु कौशिकः कुशिकेऽपि च ॥ ३५० ॥

कुक्कटः कुर्कुटस्ताम्रचूडेऽङ्को वक्र–चक्रतः ।
हंसे, कृष्णचञ्चुपादे धार्तराष्ट्र इति स्मृतः ॥ ३५१ ॥

धृतराष्ट्रो भवेद्, हंस्यां वारला वरला तथा ।
वारटा वरटा तद्वत् वरटी, खञ्जनः पुनः ॥ ३५२ ॥

खञ्जरीटः, सारसे तु लक्ष्मणो लक्षणोऽपि च ।
सारस्यां लक्ष्मणा लक्ष्मणी च लक्षणया सह ॥ ३५३ ॥

क्रौञ्चे कुङ् शत्रि-शक्री च क्रौञ्च्यां कुङ् कुचया समम् ।
चाषे चासः किकिदीविः किकीदीवि–किकीदिवौ ॥ ३५४ ॥

किकिः किकीः किकिदिविः दैविः, शकुनिभिद्यथ ।
वर्तको वर्तवत् प्रोक्तो वर्तका वर्तिका स्त्रियाम् ॥ ३५५ ॥

कटुक्वाणे टिट्टिभः स्यात् टीटिभश्चटके पुनः ।
कुलिङ्ककः कलम्बिकः चटका क्षिपकादिषु ॥ ३५६ ॥

स्त्रियां तयोः स्त्र्यपत्येऽपि चाटकेरो नरे तुकि ।
जलरङ्कौ जलरञ्जः कालात्कण्टक–कण्ठगौ ॥ ३५७ ॥

दात्यूहश्च सदात्योहः, कह्वे बक–बुकौ समौ ।
बकोटोऽपि, बलाकायां कण्टिका–कण्ठिके बिसात् ॥ ३५८ ॥

चिल्ले आतापिरातापी आतायी नान्तकावुभौ ।
कामायौ तु गृध्र–गृत्सौ दाक्षाय्यश्च दक्षाय्यवत् ॥ ३५९ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रामाश्रिते जटायुर्नोदन्तकः सान्तिमोऽपि च ।
कीरे तालव्यदन्त्यादिः सुकोऽथ शारिका मता ॥ ३६० ॥

गोकिराटिका गोराटी स्यात् चर्मचटका पुनः ।
जतुका च जतूका च, परोष्ठ्यां वल्गुली स्मृता ॥ ३६१ ॥

वल्गुलिका, कर्करटौ करेटुः कर्कराटुकः ।
करटुः कर्करेटोऽथाटिराड्श्च शरातिवत् ॥ ३६२ ॥

आतिः शरारिः शलालिः कृकण-क्रकरावुभौ ।
कपिञ्जले, भास-भाषौ शकुम्भे, रक्तलोचने ॥ ३६३ ॥

पारापतः पारावतः पारपतः कपोतवत् ।
कपोटः, गुन्द्राले जीवञ्जीवः स्याद् जीवजीववत् ॥ ३६४ ॥

व्याघ्राटे तु भरद्वाजो भारद्वाजश्च, तित्तिरः ।
तित्तिरिः खरकोणे द्वौ, गरुले कारण्ड इष्यते ॥ ३६५ ॥

कारण्डवः, मीने मच्छो मत्सो मत्स्यो विसारिणा ।
वेसारिणो विसारश्च शक्लीव शकली मता ॥ ३६६ ॥

शम्बरो दन्त्यतालव्यो वादालश्च वदालवत् ।
सहस्रदंष्ट्रे शिशुके चुलूपीव दुलूप्यपि ॥ ३६७ ॥

शफरे शफरी प्रोष्ठः प्रोष्ठी ठान्तौ चिलीचिमिः ।
चिलिचीमश्चिलिचिमः, नलमीनेऽथ मत्स्यभित् ॥ ३६८ ॥

शालः सालश्च, नक्रे तु कुम्भी कुम्भीर इत्यपि ।
शङ्खमुखः शङ्कुमुखः, ग्राहे तु तन्तु-तन्तुणौ ॥ ३६९ ॥

तन्तुनागश्च नागोऽपि, कर्कटे तु कुलीरवत् ।
कुटीरश्च चन्द्राश्रयराशावऽपि च, कच्छपी ॥ ३७० ॥

दुलिर्दुली दुडिर्भेके प्लवगः सप्लवङ्गमः ।
प्लवः सालूश्च सालूरो दन्त्यतालव्यपूर्वकः ॥ ३७१ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शालस्तथैव भेक्यां तु वर्षाभूरिति कथ्यते ।
वर्षाभ्व्युद्भिदि चोद्भिज्जमुद्भिदं चोद्भिजं तथा ॥ ३७२ ॥

## । पञ्चमः काण्डः ।

नैरयिके नारकको नारकीयश्च नारकः ।
प्रेतः परेतः आजूः स्त्र्यूदन्ता रेफान्तिमाऽपि च ॥ १ ॥

आजूराजूरवाजूर इत्येवं रूपसङ्गतिः ।
निर्वेतनकर्मकृतौ भद्राख्ये करणे तथा ॥ २ ॥

निरये दुर्गतिः स्त्रीत्रोर्नरको नारकान्वितः ।
पातालेऽधोऽव्ययं चाधः, भुवनं विवरे सुषिः ॥ ३ ॥

तालव्यदन्त्यः शुषिरम्, गर्ते गर्ता दरस्त्रिषु ।
स्वभ्रं तालव्यदन्त्याद्यमवटोऽवटिरित्युभौ ॥ ४ ॥

## । षष्ठः काण्डः ।

लोके विष्टपं पिष्टपं जगती, जगत्प्राणिनि ।
जन्यु-जन्तू, उद्भवे षण् जन्म जन्मोऽस्त्रियां जनिः ॥ १ ॥

जनुः सान्तं षण् जननम्, जीविते जीवस्त्रिष्वचि ।
जीवातुरस्त्रियां प्राणाः पुंभूम्नि जीविताध्वनि ॥ २ ॥

आयुः सान्तं च षण् आयुरुदन्तः पुंसि चोच्यते ।
हृद् हृदयं चित्तं चेतो मनो मानसमित्यपि ॥ ३ ॥

स्वान्तमास्वनिताऽऽस्वान्ते, निर्वृतौ सुख-सौख्यके ।
सर्म-सर्मे नान्ताऽदन्ते दन्ततालव्याद्ये मते ॥ ४ ॥

शान्तं तालव्यदन्त्याद्यं भद्रं भन्द्रमसौख्यके ।
तृप्रं दृप्रं बाधा बाध आबाधा चाऽमनस्यवत् ॥ ५ ॥

अमानस्यमामनस्यम्, चर्चा चर्चो विचारणा ।
स्वभावे निसर्ग-सर्गौ, पश्चात्तापोऽनुतापवत् ॥ ६ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विप्रतिसारो विप्रतीसारोऽथ सुकृते वृषः ।
वृषभो धर्मधरीमा नान्तो धर्मोऽथ दिष्टके ॥ ७ ॥

भागो भाग्यं भागधेयं, शुभकर्मण्यपोऽप्तसा ।
सान्ते षण्ढे, पापं पाप्मा किल्बिषं कलुषं समे ॥ ८ ॥

कल्मषमभिप्राये तु छन्दो ना छन्दसा षणा ।
चतुरश्चातुरको द्वौ नेत्रगोचर ईरितौ ॥ ९ ॥

चाटुकारे चक्र-गण्डावपि, स्परिशः स्पर्शवत् ।
शिशिरे शीतलः शीतः सुसीमश्च सुषीमवत् ॥ १० ॥

ईषदुष्णे कवोष्णः स्यात् कदुष्णः कोष्ण इत्यपि ।
खरे जरठो जठरः करटः कर्कटोऽपि च ॥ ११ ॥

कक्खडः खक्खटस्तद्वत्, कोमले मृदुलो मृदुः ।
सोमालः सुकुमारश्च, मधुलो मधुराऽन्वितः ॥ १२ ॥

गुल्ये, दन्तशठेऽम्लोऽम्ल्वः, कखाये तुबरस्तथा ।
तूबरः कुबरोऽपि स्यादाद्यौ द्वौ तौबरोऽपि च ॥ १३ ॥

त्रयोऽश्मश्रुनरे शृङ्गहीनपशावपि स्मृतः ।
आमोदिनि मुखशुभाद् वासनः, धवले सितः ॥ १४ ॥

शितिः श्वेतः श्येतः श्येनः शुभ्रिः शुभ्रश्च पाण्डरः ।
पाण्डुर-पाण्डू गोराप्तो गौरः पीतेऽरुणेऽप्यऽमू ॥ १५ ॥

शुक्रः शुक्लः, कपोताभे कापोतः स्यात्कपोतवत् ।
कपोटेऽप्यथ हारिद्रे कथितौ पीत-पीतकौ ॥ १६ ॥

पीतनीले तु पालाशः पलाशो हरितो हरिः ।
लोहितो रोहितो रक्ते, पीतरक्ते तु पिङ्गलः ॥ १७ ॥

पिङ्गः कपिलः कविलः, कृष्णे तु स्याम-श्यामलौ ।
श्यामालश्च शिति-शिनी, रक्तश्यामे तु धूमलः ॥ १८ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

धूम्रोऽथ कर्बुरश्चित्रः चित्रलोऽपि कल्माषवत् ।
कल्मासश्च, भवेत् शब्दो निस्वानो निःस्वनः स्वनः ॥ १९ ॥

स्वनिः स्वानो ध्वनिर्ध्वानो निक्वाणो निक्वणः क्वणः ।
क्वाणश्च घोष-निर्घोषौ निर्ह्रादो ह्राद इत्यपि ॥ २० ॥

निनादो निनदो नाद आरावो राव आरवः ।
रवो विरावः संरावः, क्ष्वेडा क्ष्वेडित-क्ष्वेलिते ॥ २१ ॥

भटानां सिंहनादेऽथ शिञ्जितं भूषणध्वनौ ।
सिञ्जाश्वशब्दे हेषा स्याद् ह्रेषा, गर्जस्तु गर्ज्जया ॥ २२ ॥

हस्तिशब्दे, विस्फारश्च विस्फोरोऽपि धनूरवो ।
मेघशब्दे गर्जितं स्यात् गर्जिवद् ना, खरारवे ॥ २३ ॥

रेषण-रेषे, तन्त्र्यास्तु प्रक्वाणः- प्रक्वणो रवे ।
गम्भीरध्वनिते मन्द्र-मद्रौ, सूक्ष्मकलध्वनौ ॥ २४ ॥

काकली काकलिर्वृन्दे कदम्बं च कदम्बकम् ।
समुदायः समुदयः पेटं स्यात् पेटकं त्रिषु ॥ २५ ॥

चक्रवालं चक्रवाडं चक्रं च चय-संचयौ ।
शण्ड-षण्डौ केदाराणां गणे कैदारकं मतम् ॥ २६ ॥

कैदारिकं कैदार्यं च, केशानां कैश्य-कैशिके ।
अश्वीयमाश्वमश्वानाम्, वातूलो वात्यया सह ॥ २७ ॥

वातानां, खलानां खल्या खलिनी, रथकट्यया ।
रथ्या रथानां, यौवतं यौवनं युवतीगणे ॥ २८ ॥

वंशादिदलनिर्मितभाण्डराशाविदं द्वयम् ।
स्यात् पिटक्या पिटाक्या च हल्या हालं हलोत्करौ ॥ २९ ॥

पङ्क्तौ वीथी वीथिरालिरावलिरावली मता ।
राजि-राज्यौ रेखा लेखा समाने पुंस्त्रियोः स्मृता ॥ ३० ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रेणिः श्रेणी च युग्मे तु युगवद्युगलं यमम् ।
यमलं यामलं द्वन्द्वं दन्द्वं द्वैतं द्विती द्वयम् ॥ ३१ ॥

द्वितयं, प्रचुरे भूयो भूयिष्ठं पुरुहं पुरु ।
बहुलं बहु बहूलम्, लेशे त्रुटि-तुटी समौ ॥ ३२ ॥

अत्यल्पे त्वल्पीयोऽल्पिष्ठमुच्चे तूत्तुङ्ग-तुङ्गकौ ।
उदग्रमनुदग्रं च, खर्वे न्यग् नीचवद्, गुरौ ॥ ३३ ॥

पृथुलं पृथु विपुलं पुलं वड्रं च वड्रवत् ।
वरिष्ठं वर्गद्वितीयाप्तमारोहे समुच्छ्रयः ॥ ३४ ॥

उच्छ्रायश्च, प्रपञ्चे तु विस्तारो विस्तरोऽपि च ।
शब्दे विस्तर एवैकः, समस्ते निखिला-ऽखिले ॥ ३५ ॥

समं सिमं च निःशेषाऽ-शेषे सकल-शल्कके ।
अन्यूनाऽनूने, अपूर्णे उनमूनम्, समार्द्धके ॥ ३६ ॥

शकलं शक्लं खण्डं च खण्डलं चाऽपि, भागके ।
अंसस्तालव्यदन्त्यान्तः, भागेऽर्थेऽष्टम आष्टमः ॥ ३७ ॥

षष्ठः षाष्ठः, मानभागे षष्ठः षाष्ठश्च षष्ठकः ।
म्लानं मलीमसे प्रोक्तं मलिनं कश्मलं तथा ॥ ३८ ॥

कष्मलं, मेध्ये पावनं पवित्रं च पविस्तथा ।
पूतं च, प्रकृष्टे मुख्यं प्रमुखं मुखमित्यपि ॥ ३९ ॥

प्रधानमजहल्लिङ्गं वाच्यलिङ्गमपि स्मृतम् ।
वरं वरेण्यं प्रवरमग्र्यमग्रीयमग्रियम् ॥ ४० ॥

अग्रिममनुत्तमं चोत्तमं चाऽनवरा-ऽर्ध्यवत् ।
परं परार्ध्यं ग्रामण्य-ऽग्रण्यग्रे प्रष्ठमन्तठम् ॥ ४१ ॥

सत्तमे श्रेयसा श्रेष्ठं स्याद् टवर्गद्वितीययुक् ।
उपसर्जनमाविष्टलिङ्गं स्यादप्रधानके ॥ ४२ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

निकृष्टे त्वपकृष्टं स्यादधमं चाऽवमं समे ।
याप्यं याव्यं रेप-रेफौ रेपो रेफश्च सान्तिमे ॥ ४३ ॥

अर्वाऽर्वाणोऽसेचनकमासेचनकमित्यपि ।
दर्शनाद् दृगतर्पेऽर्थे, शोभने मञ्जु-मञ्जुलौ ॥ ४४ ॥

रम्यं रमणीयं सौम्यं सोमं बन्धूर-बन्धुरे ।
नम्रेऽपि कमनीयं स्यात् काम्यं कम्रं मनोरमम् ॥ ४५ ॥

रामाऽभिरामे चाऽसारे शक्यं शिक्यं च, रिक्तके ।
शून्यं शुन्यं च, प्रत्यग्रे नवीना-ऽभिनवे नवम् ॥ ४६ ॥

नव्यवद् नूतनं नूत्नं, जीर्णं जरति जर्णवत् ।
प्रणं प्रीणं पुराणं च प्रतनं च पुरातनम् ॥ ४७ ॥

प्रत्नं चिरत्नं च चिरन्तनम्, परुद्भवे मतम् ।
परुत्तनं परुन्तमं परुत्नं च, परारिजे ॥ ४८ ॥

परात्नं परारिन्तनं परारितनमित्यपि ।
पार्श्वे तालव्यदन्त्यान्तमभ्यासं सन्निधानवत् ॥ ४९ ॥

सन्निधिरन्तिकतमे नेदीयो नेदिष्ठं स-ठम् ।
अतिदूरे दवीयः स-ठं दविष्ठमनश्वरे ॥ ५० ॥

सनातनं सदातनं शाश्वतिकं च शाश्वतम् ।
अतिस्थिरे स्थेयं स्थास्नु स-ठं स्थेष्ठं च, जङ्गमे ॥ ५१ ॥

चरं चराचरं तद्वच्चरिष्णुवदिहाऽस्थिरे ।
परिप्लवं पारिप्लवं चञ्चलं च चलाचलम् ॥ ५२ ॥

चलं चपलं चटुलं कमनं कम्प्रमप्यथ ।
अधोमुखेऽवनतं स्यादानतं, कुटिले पुनः ॥ ५३ ॥

वक्रं वङ्कं च वङ्क्रिश्चानुगे चान्वगन्वक्षवत् ।
असहाये चैकाक्येक एककोऽनन्यवृत्तिके ॥ ५४ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एकात्सर्गा–ऽयन–ताना–ऽग्राण्ययनगतं तथा ।
एकाग्रं, पूर्वे त्वाद्या–ऽऽदी आदिमं प्रग्रमग्रवत् ॥ ५५ ॥

चरमेऽन्त्यमन्तिमा–ऽन्तावन्तमं पश्चिमान्वितम् ।
अपश्चिमं स्वरूपे नञ् पाश्चात्यं पश्च–पश्चिमात् ॥ ५६ ॥

अर्द्धा–नुपूर्व्य–भिमुखाः शब्दा योज्याः, दिवोऽचि च ।
पृषोदरादित्वाद् दिवो द्युश्चाऽऽदेशः, यदुच्यते ॥ ५७ ॥

दिवः स्थाने दिवोऽचि स्याद् दिव् च दीर्घे पुनः परे ।
उकारेकारयोरुच्च पश्चातोऽर्धादिके तलुक् ॥ ५८ ॥

मध्यजाते मध्यमीयं मध्यमं माध्यमं तथा ।
मध्यन्दिनं माध्यन्दिनं मध्येऽभ्यन्तरमन्तरम् ॥ ५९ ॥

अन्तरालं, समं तुल्ये समानं सदृशं सदृक् ।
सदृक्षमनुहारे तूपान्मान–मिति–मा–मताः ॥ ६० ॥

औपम्यमुपमामुक्तेऽनुपमं स्यादनोपमम् ।
कथ्यते त्वर्चा प्रतिमा प्रतिमानमयोमयी ॥ ६१ ॥

शूर्मिः शूर्मी च तालव्यदन्त्यादी शूर्म इत्यपि ।
वामे वि–प्रतितो लोममपष्ठूरमपष्ठुरम् ॥ ६२ ॥

प्रसव्यमपसव्यं चोच्छृङ्खले तु निरर्गलम् ।
अनर्गले भिन्ने त्वन्यदन्यतरदपीतरत् ॥ ६३ ॥

मिश्रे करम्बः कबरग्, तूर्णे त्वरित–सत्त्वरे ।
संपातपाटवे झम्पा झम्पोऽजस्रे तु संततम् ॥ ६४ ॥

सततं चानवरता–ऽविरते स्यादनारतम् ।
सङ्कुले त्वाकुलं कीर्णं समाङ्भ्यां कीर्णमित्यपि ॥ ६५ ॥

भरिते प्राणं पूर्णं च पूर्तं पूरितं छादितम् ।
छन्नं, त्यक्ते विधुतवद्धूतं, विन्नं विचारिते ॥ ६६ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वित्तं च, पिहिते छन्नं छादितं संवृताऽऽवृते ।
अपवारित-संवीते पिधाने व्यवधानवत् ॥ ६७ ॥

व्यवधाऽन्तर्द्धिरन्तर्द्धा, नाऽऽदृते मत-मानिते ।
अवादवज्ञायां हेलाऽवहेलमवहेलया ॥ ६८ ॥

असुक्षणमसुर्क्षणमसूर्क्षणमसूक्षणम् ।
कम्पिते तु धुतं धूतं प्रेङ्खोलितं च प्रेङ्खितम् ॥ ६९ ॥

अन्दोलने भवेद् दोला प्रेङ्खा प्रेङ्खोलनं समे ।
दोलके मता दोलेरिते निष्ठ्यूतमात्तठम् ॥ ७० ॥

नुन्न-नुत्ते, मुषिते तु मूषितं, गुणिते पुनः ।
आहताऽऽनाहते मृषार्थके ताडितकेऽपि च ॥ ७१ ॥

तेजिते निशातं शातं निशितं शितमित्यपि ।
वृते तु वृत्त-वावृत्ते, ह्रीतं ह्रीणं च लज्जिते ॥ ७२ ॥

दग्धे तु प्रुष्टं प्लुष्टं च, तष्टं त्वष्टं तनूकृते ।
छिद्रिते वेधितं विद्धं, विलीने विद्रुतं द्रुतम् ॥ ७३ ॥

तन्तुसन्तते स्यूतो-ते ऊतं स्यूनं च स्योनवत् ।
स्फोटने स्फुटनं तद्वद् भिदा, गीर्णो गिरिर्भवेत् ॥ ७४ ॥

उद्यमे तु गूरणं स्याद् गुरणं च संगीर्णके ।
श्रुतं संप्रत्याङ्भ्यः परमुर्यू-र्यु-रीतः कृतम् ॥ ७५ ॥

खण्डिते छेदितं छिन्नं छितं छातं दिताऽन्वितम् ।
प्राप्ते तु भावितं भूतम्, भ्रष्टे पतित-पत्रके ॥ ७६ ॥

अतिक्रान्ते तीताऽतीते, गवेषिते तु मार्गितम् ।
मृगितवदन्विष्टं स्याद्, अन्वेषितमीप्सिते ॥ ७७ ॥

क्लिन्ने कृन्नं सार्द्रमार्द्रं तिमितं स्तिमितं तथा ।
दूते सन्तापितं तप्तं धूपायितं च धूपितम् ॥ ७८ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शीने स्त्यानमन्तर्गते विस्मृतं प्रस्मृतं समे ।
विदिते बुधितं बुद्धं, स्यन्ने स्नुतं स्रुतं स्मृतम् ॥ ७९ ॥

रक्षिते तु त्राणं त्रातं गुप्तं गोपायितं तथा ।
वशक्रिया संवननं संवदनं, स्थितौ पुनः ॥ ८० ॥

आस्याऽऽसना, पर्यटनेऽटाट्याऽटायऽप्यटाट्यया ।
वैपरीत्ये विपर्यासो विपर्यायोऽप्यनुक्रमे ॥ ८१ ॥

क्रमः परिपाटि-परीपाटी स्यादानुपूर्व्यवत् ।
आनुपूर्वी, भवेदिष्टे निकामं च प्रकामवत् ॥ ८२ ॥

कामाप्त्यर्थे तु गाढमुद्गाढं भर-निर्भरौ ।
जृम्भणं त्रिषु जृम्भा स्यात्, परिष्वङ्गेऽङ्कपालिवत् ॥ ८३ ॥

अङ्कपाली परिरम्भः परीरम्भोऽप्यथोत्सवे ।
महो महश्च सान्तं षण्, मेलके सङ्ग-सङ्गमौ ॥ ८४ ॥

साङ्गमोऽथो अनौद्धत्ये प्रश्रयः प्रशरोऽपि च ।
आरम्भे क्रमः प्रोपाभ्यामुपोद्घात उद्घातवत् ॥ ८५ ॥

उत्क्रमे व्युत्क्रमः प्रोक्तोऽक्रमोऽथ विप्रलम्भने ।
विप्रलम्भः, विप्रयोगो वियोगो विरहे स्मृतः ॥ ८६ ॥

सामान्ये तु जातिर्जातम्, स्पर्धायां तु समः परौ ।
हर्ष-घर्षौ च संक्राम-संक्रमौ दुर्गसञ्चरे ॥ ८७ ॥

जलतरणेऽपि, परिणामे विकृति-विक्रिये ।
विकारः, घूर्णने घूर्णिर्भ्रान्तिर्भ्रमि-भ्रमावपि ॥ ८८ ॥

लवने लवा-भिलावौ, निष्पावे पवनं पवः ।
थूत्कृते ष्ठीवनं ष्ठ्यूत-निष्ठेव-ष्ठेवनानि च ॥ ८९ ॥

स्याद् निवृत्तावुपरमो व्युपाव्याङ्भ्यो रतिः परा ।
विधूनने विधुवनं, ग्रहणे ग्राहवद् ग्रहः ॥ ९० ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वेधे व्यधः, क्षये क्षिया, स्फरण-स्फुरणे समे ।
देवतार्थ्ये वर-वृती अथाऽव्ययगणस्मृतिः ॥ ९१ ॥

स्वः स्वर्गे सुखमार्तण्डपरलोकेष्वपि, शनैः ।
शनैश्चरेऽप्यथोर्ध्वे तु उपरिष्ठादुपर्यपि ॥ ९२ ॥

अधरदेशेऽधोऽधस्ताद्, वर्जने त्वन्तरेणवत् ।
अन्तराऽन्तद्र्धा मध्येऽपि हिरुक् कान्तं पृथक् पुनः ॥ ९३ ॥

कान्तं जान्तं च मौने तु तूष्णीकं तूष्णीमित्यपि ।
जोषं जोष्यं च सौख्येऽपि आनन्दे द्वयमिष्यते ॥ ९४ ॥

उपजोषं च समुपजोषं, सर्वासु दिक्ष्विह ।
समन्ततः समन्ताच्च, पुरस्तात् पुरतः पुरः ॥ ९५ ॥

पूर्वदेशेऽस्मिन् तु काले साम्प्रतं सम्प्रति स्मृतम् ।
शीघ्रे झटिति झगिति द्राक् प्राक् कान्ते समे मते ॥ ९६ ॥

सर्वकाले शश्वत् सश्वत् पुनरर्थेपि, सर्वदा ।
सदा सदं सनत् सनात् सना नित्यं च नित्यदा ॥ ९७ ॥

वारवारेण च वारंवारमसकृदर्थके ।
पुनःपुनः पुनर्मुहुमुहुर्मुहुरपि स्मृतम् ॥ ९८ ॥

सायं मान्तं दिनान्ते स्याद्दिने सान्तमुदन्तकम् ।
द्युराकाशेऽपि च दिवा, तत्क्षणे सपदीति च ॥ ९९ ॥

पदन्तं स्यादेकपदे, दीर्घकाले चिराच्चिरम् ।
चिरेण चिररात्राय चिरायाऽपि चिरस्य च ॥ १०० ॥

रात्रौ मान्तं नक्तमुषा दोषा स्यात् पक्षणी निशि ।
उभयेद्युरुभयद्युर्निशान्ते तु उषा उषः ॥ १०१ ॥

अभ्यर्णेऽपि हिरुक् कान्तमल्पे किञ्चिच्च किञ्चन ।
मनाक् कान्तं, वितर्के किं किमूत किमुताऽपि च ॥ १०२ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नुवै नु नुकं किंस्वित् स्विदाऽऽहोस्विदुताहो च ।
आ हौ, हेतौ यद् यतो येन यदि तेन च तत् ततः ॥ १०३ ॥

चैव, संबोधने पाट् प्याट् हंहो आहो अहो अपि ।
है हौ व्यस्तौ समस्तौ च स्मरणाऽऽह्वानयोरपि ॥ १०४ ॥

हो हौ व्यस्तौ समस्तौ च ह्वानेऽपि, अरेरे अरै ।
भोभो भो भो अयि हये ए ऐ च द्वौ स्मृतौ ॥ १०५ ॥

आह्वानेऽपि, ऊ ओ हूतावपि देवहविर्हुतौ ।
श्रौषट् वोषट् वषट् वट् वाट् वड्, मध्ये त्वन्तराऽन्तरे ॥ १०६ ॥

अन्तरेणाऽन्तरभावे, अ ना नो नहिकं नहि ।
नोहि नवा नवै नोचेत् नचेत् मा मास्म वारणे ॥ १०७ ॥

आशङ्केऽथाऽभ्युपगमे ओं अमाऽऽमां द्वे अन्तिमे ।
अवधारणेऽप्युपमाने इव एव च वा इव ॥ १०८ ॥

वत्, पक्षान्तरे चेत्, चाऽवधृतौ वा वैव मेव च ।
द्वौ द्वावित्यर्थे मिथुनं मिथो मिथुश्च सान्तिमे ॥ १०९ ॥

आनुपूर्व्ये अनुषगाऽनुषद्, संशयप्रश्नयोः ।
किम् कीम्, विनियोगाचारातिक्रमयोस्तु हा हवत् ॥ ११० ॥

प्रैषानुमानप्रतीक्षासमाप्तिषु वावदिति ।
त्वावन् वावद् वियोगे च पादपूर्तौ वेद् वाद्-वदौ ॥ १११ ॥

दान्ताः प्रश्ने वितर्के च प्रशंसायामिमौ मतौ ।
कूपत् सूपत्, विशेषे स्यात् न्वै तुवै तु च कुत्सने ॥ ११२ ॥

विनाशे चान्तकादऽऽङ्क, स्यातामद्भुतखेदयोः ।
अहहा अहह उभौ, वर्जने च निषेधने ॥ ११३ ॥

नकिर् नकिस् माकिर् माकिस्, सत्ये हिंसाप्रशंसयोः ।
प्याट् पाट्, कोपे च पीडायां मत् आस् च रहसि त्विमौ ॥ ११४ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मिथो मिथस् कुत्सायां, पुक् पुत् द्वौ पादपूरणे ।
हहि प्रश्ने रोषे, उम् ऊम् द्वौ विस्मयविषादयोः ॥ ११५ ॥

हा है विस्मये ही हे है स्मरणे आ च आस् तथा ।
तुमर्थे क्रन्तुं क्रान्तुं च क्षन्तुं क्षान्तुं सेमे मते ॥ ११६ ॥

गन्तुं गान्तुं दीर्घादीनि गतौ कौ पन्थिके क्रमात् ।
अभिनय-व्याहरणे ईम् कीम् शीम् सीम् निरूपितम् ॥ ११७ ॥

अव्यक्ते ईम् शीम्, मर्षे पादपूर्तौ च, सीमिति ।
भार्यायां क्षम् गम् ऊम्, त्रीण्यूर्यादावङ्गीकृतौ भृशे ॥ ११८ ॥

विस्तारेऽनुकरणे च प्रशंसायामुरर्युरी ।
उररी उरी चत्वारि, हिंसायां कथिता अमी ॥ ११९ ॥

भ्रंशकला ध्वंसकला स्रंसकला समःकला ।
ससकला समकलाऽपि मसमसा च मस्मसा ॥ १२० ॥

गुलुगुधा गुलुगुला पार्दाली च वार्दाल्यपि ।
विचारे आक्ली च विक्ली च तद्विड्वराऽऽकुलीकृतौ ॥ १२१ ॥

ताली विताली आताली क्रियासंपादने फली ।
फल्यू च साक्षादादौ स्यात् सामर्थ्योत्साहयोरमी ॥ १२२ ॥

असहने प्रसहने विसहने त्रयी त्वियम् ।
एदन्ताऽथ च वैरूप्येऽन्ये संतापे वधे क्रमात् ॥ १२३ ॥

प्रकम्पने विकम्पने एदन्तौ रोहशोभयोः ।
प्राजरुहा बीजरुहा जरणे कथिताविमौ ॥ १२४ ॥

प्राजर्या वीजर्या तुल्यौ चिता चित्ता च चेतने ।
इत्यूर्यादौ कतिचिदव्ययाः कुञ्संबुजः स्मृताः ॥ १२५ ॥

अदस् स्पर्शे स्थाने युक्तौ विभक्तिप्रतिरुपकम् ।
षष्ठीतृतीयार्थे तव ते मम मे च क्रमाद् मतौ ॥ १२६ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अधोऽर्थे त्वध अदन्तं हैमादर्शेषु दृश्यते ।
अथ सान्तमथ अथो एष्वर्थेषु त्रयोऽप्यमी ॥ १२७ ॥

कथिताः संशया-ऽऽरम्भ-साकल्येषु समुच्चये ।
अनन्तरार्थे च तथा प्रतिज्ञाप्रश्नयोरपि ॥ १२८ ॥

अन्वादेशेऽधिकारार्थे मङ्गले शं च सं सुखे ॥ १२९ ॥

श्रीमज्जिनदेवमुनीश्वरविरचितः

# ॥ अभिधानचिन्तामणिशिलोञ्छः ॥

## प्रथमकाण्डः

अर्हं बीजं नमस्कृत्य गुरूणामुपदेशतः ।
श्रीहैमनाममालायाः शिलोञ्छः क्रियते मया ॥ १ ॥

सवीर्य इत्यपि जिने संभवः शंभवेऽपि च ।
श्रीसुव्रते मुनिरपि नेमौ नेमीत्यपीक्ष्यते ॥ २ ॥

षष्ठे गणेशे मण्डितपुत्रोऽपि कथितो बुधैः ।
मरुदेव्यपि विज्ञेया युगादिजिनमातरि ॥ ३ ॥

चक्रेश्वर्यामप्रतिचक्राप्यजितापि कविभिरजितबला ।
श्यामा त्वच्युतदेव्यपि सुतारिकोक्ता सुताराऽपि ॥ ४ ॥

भद्रकृद्भद्रकरोऽपि श्रवणः श्रवणोऽपि च ।
भद्रं भन्द्रमपि प्राहुः प्रशस्तमपि कोविदाः ॥ ५ ॥

प्रव्रज्याऽपि परिव्रज्या शिष्योऽन्तेषदपि स्मृतः ।
इति प्रथमकाण्डस्य शिलोञ्छोऽयं समर्पितः ॥ ६ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

## द्वितीय काण्डः

व्योमयानमपि प्रोक्तं विमानं बुधपुङ्गवैः ।
स्यात्समुद्रनवनीतं पेयूषमपि चामृतम् ॥ १ ॥

कथ्यन्ते व्यन्तरा वानमन्तरा अपि सूरिभिः ।
द्योतस्तथा पृष्णिवृष्णी प्रोक्ता रश्म्यभिधायकाः ॥ २ ॥

समुद्रनवनीतं च विदुश्चन्द्रमसं बुधाः ।
चन्द्रिका चन्द्रिमाऽपि स्यादिल्वला इन्वका अपि ॥ ३ ॥

अनुराधाऽप्यनूराधा गुरुः सप्तर्षिजोऽपि च ।
सौरिः सौरोऽपि राहुस्तु ग्रहकल्लोल इत्यपि ॥ ४ ॥

अभ्रपिशाचोऽपि तथा नाडिका नालिकाऽपि च ।
रात्रौ यामवतीतुङ्ग्यौ निःसंपातो निशीथवत् ॥ ५ ॥

तमः स्यादन्धातमसं वर्षाः स्युर्वरिषा अपि ।
खेऽन्तरीक्षं सांसृष्टिकमपि तत्कालजे फले ॥ ६ ॥

मेघमाला कालिकाऽपि वार्दलं चापि दुर्दिने ।
सूत्रामाऽपीन्द्रे शतारः शतधारोऽपि चाशनौ ॥ ७ ॥

आश्विनेयौ स्वर्गवैद्यो हर्यक्षोऽपि धनाधिपे ।
अजगवमजगावमपि शङ्करधन्वनि ॥ ८ ॥

गौर्यां दाक्षायणीश्चर्यौ नारायणे जलेशयः ।
कौमोदकी कौपोदकी आ ईः शब्दौ श्रियां मतौ ॥ ९ ॥

कन्तुः कन्दर्पे सिद्धार्थः सुगते परिकीर्तितः ।
अङ्गे व्याख्याविवाहा(दा) भ्यां प्रज्ञप्तिरपि पञ्चमे ॥ १० ॥

दृष्टिपातो द्वादशाङ्ग्यां कल्याणेऽवन्ध्यमप्यथ ।
निन्दा गर्हा जुगुप्साऽथाक्षारणा रतिगालिषु ॥ ११ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

समाख्यापि समाज्ञावद्दुशतीवदुशत्यपि ।
काल्यापि कल्या संधायां समाधिरपि कथ्यते ॥ १२ ॥

व्रीडः शूका मन्दाक्षं च ह्रियामूहापि चोहवत् ।
तन्द्रिस्तन्द्री च निद्रायामहं प्रथमिकापि च ॥ १३ ॥

अहंपूर्विकायां केलीकिलोऽपि स्याद्विदूषके ।
मार्षवन्मारिषोऽपीति शिलोञ्छो देवकाण्डगः ॥ १४ ॥

## तृतीयः काण्डः

स्तनंधये स्तनपश्च क्षीरपश्चाभिधीयते ।
तारुण्यं स्याद्यौवनिका दशमीस्थो जरत्तरः ॥ १ ॥

कवितापि कविः स्यात्कृतकर्मणि कृतकृत्यकृतिकृतार्थाश्च ।
कुटिलाशयोऽपि कुचरोऽन्धजडशठेष्वप्यनेडमूकस्तु ॥ २ ॥

वदान्यौ पृथगित्यन्ये दानशीलप्रियंवदौ ।
मूर्खे यथोद्गतोऽपीभ्ये श्रीमानपि बुधैः स्मृतः ॥ ३ ॥

विवधिकवीवधिकावपि वैवधिके प्रतिचरोऽपि भृत्ये स्यात् ।
संमार्जको बहुकरे बहुधान्यार्जक इतीष्यते च परैः ॥ ४ ॥

विहङ्गिकायां च विहङ्गमाप्यथोर्ध्वदेहिके ।
और्ध्वदैहिकमप्याहुरनृजौ शण्ठ इत्यपि ॥ ५ ॥

मायाविमायिकौ धूर्ते कपटे तूपधा मता ।
चोरश्चौरोऽपि विज्ञेयः स्तेयं स्तैन्यमपीष्यते ॥ ६ ॥

दाने प्रादेशनमपि क्षमा स्यात् क्षान्तिरित्यपि ।
क्रोधनः कोपनस्तृष्णक् पिपासितोऽपि कथ्यते ॥ ७ ॥

भक्षकः स्यादाशिरोऽपि मर्जितापि च मार्जिता ।
पेयूषमपि पीयूषं कूचिकापि च कूर्चिका ॥ ८ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

द्रप्से द्रप्स्यमपि प्रोक्तं विजिपिलं च पिच्छिले ।
व्योषे त्रिकटुकं जग्धौ जमनं जवनं तथा ॥ ९ ॥

आघ्राणोऽपि भवेत्तृप्तौ शौष्कलः पिशिताशिनि ।
मनोराज्यमनोगव्यावपि स्यातां मनोरथे ॥ १० ॥

कामुके कमनोऽपि स्यादाक्षारितोऽपि दूषिते ।
संशयालुः सांशयिके जागरितापि जागरी ॥ ११ ॥

पूजितेऽपचायितोऽपि तुन्दिभोदरिकावपि ।
तुन्दिले न्युब्जोऽपि कुब्जे खलतोऽप्यैन्द्रलुप्तके ॥ १२ ॥

पामरोऽपि कच्छुरेऽतीसारक्यप्यतिसारकी ।
कण्डूतिरपि खर्जूतिर्विस्फोटः पिटके स्मृतः ॥ १३ ॥

कोठे मण्डलकमपि गुदकीलोऽपि वार्शसि ।
मेहः प्रमेहवदायुर्वेदिकोऽपि चिकित्सके ॥ १४ ॥

आयुष्मानपि दीर्घायुः कथ्यतेऽथ परीक्षकः ।
स्यादाक्षपाटलिकोऽपि पारिषद्योऽपि सभ्यवत् ॥ १५ ॥

स्युर्नैमित्तिकनैमित्तमौहूर्ता गणके लिपौ ।
लिखितापि मषी मेला कुलिके कुलकोऽपि च ॥ १६ ॥

अष्टापदे बुधैः शारिफलकोऽपि निगद्यते ।
मनोजवस्ताततुल्ये प्रभविष्णुरपि क्षमे ॥ १७ ॥

जाङ्घिके जङ्घाकरोऽपि चानुगोऽप्यनुगामिनि ।
पर्येषणोपासनापि शुश्रूषायामधीयते ॥ १८ ॥

आतिथ्योऽप्यतिथौ कुल्येऽभिजो गोत्रे तु संततिः ।
महेला योषिता च स्त्री तरुणी युवतीत्यपि ॥ १९ ॥

स्ववासिनी चरिण्टी च चिरण्टी च चरण्ट्यपि ।
वधूट्यां पत्न्यां करात्ती गेहिनी सहधर्मिणी ॥ २० ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सधर्मचारिणी चापि स्नुषायां तु वधूट्यपि ।
प्रेमवत्यपि कान्तायां पाणिग्राहो विवोढरि ॥ २१ ॥

परिणेतोपयन्ता च यौतके दाय इत्यपि ।
दिधीषूर्दिधिषूर्जीवत्पत्नी जीवत्पतिः समे ॥ २२ ॥

तुल्ये अवीरानिर्वीरे श्रवणाश्रमणे तथा ।
रण्डापि विधवा पुष्पवती स्यात्पुष्पितापि च ॥ २३ ॥

पुष्पे कुसुममप्युक्तं पशुधर्मोऽपि मोहने ।
सहोदरे सगर्भोऽपि स्यादग्रजवदग्रिमः ॥ २४ ॥

शण्ठः शण्ढः पण्डुरपि क्लीबो माता जनित्र्यपि ।
चिहुरा अपि केशाः स्युः कर्णः शब्दग्रहोऽपि च ॥ २५ ॥

नेत्रं विलोचनमपि सृक्विणी सृक्कणी अपि ।
दाढिका द्राढिकापि स्यात्कपोणिस्तु कफोणिवत् ॥ २६ ॥

कूर्परे कुर्परः सिंहतले संहतलोऽपि च ।
चलुकोऽपि चलौ मुष्के स्यादाण्डः पेलकोऽपि च ॥ २७ ॥

पत्पादङ्घ्रिश्च चरणे कीकसं हड्डमित्यपि ।
कपालं शकलमपि पृष्ठास्थनि कशारुका ॥ २८ ॥

मज्जायामस्थितेजोऽपि नाडीषु नाडिनाटिके ।
शिङ्घाणकोऽपि शिङ्घाणः स्तृणीका स्तुणिकापि च ॥ २९ ॥

शान्तः षान्तश्च विड्गूथेऽशुचि वेशोऽपि वेषवत् ।
उत्सादनोच्छादने च प्लवप्लावौ तथा समौ ॥ ३० ॥

वंशकं कृमिजग्धं चागरौ स्यादथ वाल्हिकम् ।
संकोचं पिशुनं वर्ण्यमसृक्संज्ञं च कुङ्कुमे ॥ ३१ ॥

जापके कालानुसार्यं यावनोऽपि च सिल्हके ।
मकुटोऽपि च कोटीरे चित्रकं च विशेषके ॥ ३२ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वतंसोऽप्यवतंसे स्यात्पत्रभङ्ग्यां तु वल्लरी ।
मञ्जरी च पत्रात्पारितथ्या पर्यवतथ्यया ॥ ३३ ॥

कर्णान्दूरपि कर्णान्दुः परिहार्योऽपि कङ्कणम् ।
किङ्किणी किङ्कणी तुल्ये आच्छादाच्छादने समे ॥ ३४ ॥

कुर्पासेऽप्यङ्गिका कक्षापटे कक्षापुटेऽपि च ।
कुथे वर्णपरिस्तोम इत्युखण्डं जगुः परे ॥ ३५ ॥

तत्रास्तरणमिति च पल्यङ्कोऽप्यवसक्थिका ।
यमन्यपि प्रतिसीरा संस्तरः प्रस्तरोऽपि च ॥ ३६ ॥

पतद्ग्राहप्रतिग्रहावपि स्यातां पतद्ग्रहे ।
मकुरोऽप्यात्मदर्शोऽथ कशिपुः कसिपुः समे ॥ ३७ ॥

यावकालक्तकौ यावे तुल्ये व्यजनवीजने ।
गीरीयको गिरिकोऽपि बालक्रीडनके मतौ ॥ ३८ ॥

गेण्डुकोऽपि गन्दुको राट् मूर्धावसिक्त इत्यपि ।
भरतः सर्वदमनोऽप्यथ दाशरथावुभौ ॥ ३९ ॥

रामचन्द्ररामभद्रौ हनूमानपि मारुतौ ।
वालौ सुग्रीवाग्रजोऽपि पार्थे बीभत्सुरित्यपि ॥ ४० ॥

सातवाहनवत् सालवाहनोऽपि प्रकीर्तितः ।
परिच्छदे परिजनः परिवर्हणमित्यपि ॥ ४१ ॥

मन्त्री बुद्धिसहायोऽपि वेत्री वेत्रधरोऽपि च ।
हेमाध्यक्षे हैरिकोऽपि टङ्कपतिस्तु नैष्किके ॥ ४२ ॥

शुद्धान्ताध्यक्ष आन्तर्वेश्मिकान्तःपुरिकावपि ।
सहायसाप्तपदीनौ सख्यावसुहृदप्यरौ ॥ ४३ ॥

नये नीतिरपि स्कन्धावारेऽपि शिबिरो मतः ।
जयन्त्यपि वैजयन्त्यां पटाकापि प्रकीर्त्यते ॥ ४४ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ध्वजः पताकादण्डोऽपि झम्फानं याप्ययानवत् ।
सादी सव्येष्ठोऽपि सूते कवचितोऽपि वर्मिते ॥ ४५ ॥

कवचे दंशनं त्वक्त्रं तनुत्राणमपि स्मृतम् ।
अधियाङ्गं धियाङ्गं चाधिकाङ्गवदुदाहृतम् ॥ ४६ ॥

शिरस्कं खोलमप्याहुः स्यान्निषङ्ग्यपि तूणिनि ।
चापे धनूधनुशरासनान्यपि विदुर्बुधाः ॥ ४७ ॥

फरकस्फुरकौ खेटे क्षुरिका छुरिका छुरी ।
ईल्यां तरवालिकापि परिघः पलिघः समौ ॥ ४८ ॥

ऊर्जस्व्यूर्जस्वान्मगधो मङ्खो बोधकरोऽर्थिकः ।
सौखशायनिकः सौखशाय्यकः सौखसुप्तिके ॥ ४९ ॥

रणे संस्फेटसंफेटौ बले द्रविणमूर्क्तथा ।
अवस्कन्दोऽपि धाट्यां स्यान्नशनं च पलायने ॥ ५० ॥

चारकोऽपि भवेद् गुप्तौ तापसे तु तपस्व्यपि ।
विप्रे ब्रह्मापि चाग्नीध्राऽऽग्नीध्र्यऽप्यथ वृषी वृसी ॥ ५१ ॥

शसने शमनं चाथ दधिप्राज्यं-पृषातके ।
अग्निहोत्र्यग्न्याहितोऽप्यथोऽपवासे समाविमौ ॥ ५२ ॥

उपवस्त्रमौपवस्त्रमुपवीते प्रवक्ष्यते ।
ब्रह्मसूत्रं पवित्रं च वाल्मीकौ द्वाविमावपि ॥ ५३ ॥

मैत्रावरुण्यादिकवी पर्शुरामोऽपि भार्गवे ।
योगीशो याज्ञवल्क्योऽपि दाक्षीपुत्रोऽपि पाणिनौ ॥ ५४ ॥

स्फोटायनः स्फौटायनः कात्यो वररुचौ तथा ।
कारेणवः पालकाप्ये चाणक्यश्चणकात्मजे ॥ ५५ ॥

वैशेषिके कणादोऽपि जैनोऽनेकान्तवाद्यपि ।
चार्वाके लौकायतिकः कृषिः प्रसृतमित्यपि ॥ ५६ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न्यासार्पणे परिदानं वणिक् प्रापणिकः स्मृतः ।
अयुते नियुतं पोते स्मृतं प्रवहणं बुधैः ॥ ५७ ॥

कर्णो ऽप्यरित्रे दुर्गस्य गवेश्वरोऽपि गोमति ।
कर्षके क्षेत्राजीवोऽपि कोटीशो लोष्टभेदनः ॥ ५८ ॥

मार्द्वीकमपि मद्येऽनुतर्षोऽपि चषके स्मृतः ।
कुविन्दे तन्त्रवायोऽपि वेमा वेमोपि कीर्त्यते ॥ ५९ ॥

रजको धावकोऽप्युक्तः पादत्राणं च पादुका ।
तैलिकस्तिलंतुदोऽपि रथकारोऽपि वर्धकिः ॥ ६० ॥

चित्रकारो लिखकश्च लेपकृल्लेपकोऽपि च ।
कुतूहले विनोदोऽपि सौनिकः खट्टिकोऽपि च ॥ ६१ ॥

कूटयन्त्रे पाशयन्त्रं समौ चाण्डालपुक्कसौ ।
इत्थं तृतीयकाण्डस्य शिलोञ्छोऽयं समर्थितः ॥ ६२ ॥

## चतुर्थः काण्डः

रत्नवती भुवि दिवस्पृथिव्यावपि रोदसी ।
माणिबन्धं माणिमन्तं सैन्धवे वसुके वसु ॥ १ ॥

टङ्कनष्टङ्कण उपावर्तनं चापि नीवृति ।
जङ्गलः स्याज्जाङ्गलोऽपि मालवन्मालको मतः ॥ २ ॥

पत्तने पट्टनमपि कुण्डिने कुण्डिनापुरम् ।
स्यात् कुण्डिनपुरमपि विपणौ पण्यवीथिका ॥ ३ ॥

सुरङ्गायां संधिरपि गृहे धाममपि स्मृतम् ।
उपकार्योपकर्यापि प्रासादे च प्रसादनः ॥ ४ ॥

शान्तीगृहं शान्तिगृहे प्राङ्गणं त्वङ्गणं मतम् ।
कपाटवत् कवाटोऽपि पक्षद्वारे खडक्किका ॥ ५ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कुसूलवत् कुशूलोऽपि संपुटे पुट इत्यपि ।
पेटायां स्यात्पेटकोऽपि पेडापि कृतिनां मते ॥ ६ ॥

पवन्यपि समूहन्यामयोनिं मुसलं विदुः ।
कण्डोलके पिटकोऽपि चुल्ल्यामन्तीति कथ्यते ॥ ७ ॥

खजः खजकोऽपि मथि विष्कम्भः कटकोऽस्य तु ।
अगोऽपि पर्वते क्रौञ्चः क्रोञ्चवन्मन्यते बुधैः ॥ ८ ॥

कखट्यपि खटिन्यां स्यात्ताम्रमौदुम्बरं विदुः ।
शातकौम्भमपि स्वर्णे पारदश्चपलोऽपि च ॥ ९ ॥

रसजातं रसाग्र्यं च तुत्थे दार्वीरसोद्भवे ।
माक्षिके वैष्णवोऽपि स्याद्गोपित्तं हरितालके ॥ १० ॥

मनःशिलायां नैपाली शिला च सुधियां मता ।
शृङ्गारमपि सिन्दूरे कुरुविन्दे तु हिङ्गुलुः ॥ ११ ॥

बोलो गोपरसोऽप्युक्तो रत्नं माणिक्यमित्यपि ।
पद्मरागे शोणरत्नं वैराटो राजपट्टवत् ॥ १२ ॥

नीलमणौ महानीलं कमन्धमपि वारिणि ।
धूमिका धूममहिषी धूमर्यो महिकाः समाः ॥ १३ ॥

अकूवारोऽपि जलधौ मकरालय इत्यपि ।
निम्नगायां ह्रादिनी स्याज्जह्नुकन्यापि जाह्नवी ॥ १४ ॥

कलिन्दपुत्री कालिन्दी रेवा मेकलकन्यका ।
चान्द्रभागा चन्द्रभागा गौमती गौतमीत्यपि ॥ १५ ॥

चक्राण्यपि पुटभेदाः पङ्के चिक्खल्ल इत्यपि ।
उद्घातनोद्घाटने च घटीयन्त्रे प्रकीर्तिते ॥ १६ ॥

सरस्तडाकस्तटाकोऽप्यथ तल्लश्च पल्वले ।
आशयाशशुष्मबर्हिर्बहिरुत्थदमूनसः ॥ १७ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अग्नौ क्षणप्रभा विद्युद् गन्धवाहसदागती ।
वायौ चरणपेऽपि द्रुस्त्वक्त्वचा स्तबके पुनः ॥ १८ ॥

गुलुञ्छुलुम्बयौ माकन्दरसालावपि चूतवत् ।
किङ्किराते कुरुण्टककुरुण्डकावपि स्मृतौ ॥ १९ ॥

कर्कन्धूरपि कर्कन्धौ ह्रस्वादिश्चाटरूषकः ।
वाशा च स्नुहिः स्नुहापि प्रियालोपि पियालवत् ॥ २० ॥

नार्यङ्गोऽपि च नारङ्गोऽक्षे बिभेदक इत्यपि ।
भवेत्तमालस्तापिच्छो निर्गुण्टी सिन्दुवारवत् ॥ २१ ॥

जपा जवा मातुलुङ्गो मातुलिङ्गोऽपि कीर्तितः ।
धत्तूर इव धुत्तूरो वंशस्त्वक्सार इत्यपि ॥ २२ ॥

ह्रीबेरं केशसलिलपर्यायैः स्मर्यते बुधैः ।
पङ्कजिन्यां कमलिनी कुमुदिनी कुमुद्वती ॥ २३ ॥

विसप्रसूनं कमले कुमुत्कुमुदवन्मतम् ।
शेपालं च जलनीली सातीनोपि सतीनवत् ॥ २४ ॥

कुम्लासवत्कुल्माषोऽपि गवेधुका गवीधुका ।
कणिशं कनिशं रिद्धे धान्ये त्वावासितं मतम् ॥ २५ ॥

हालाहलं हालहलं मुस्तायां मुस्तकोऽपि च ।
कृमिः क्रिमिरपि गण्डूपदः किंचुलुकोऽपि च ॥ २६ ॥

शम्बुका अपि शम्बूका वृश्चिको द्रुत इत्यपि ।
भसलो मधुकरोऽलिः पिक्को विक्कः करिः करी ॥ २७ ॥

व्यालो व्याडोऽप्यौपवाह्योऽप्युपवाह्योऽप रावरा ।
शृङ्खले निगलोऽन्दूश्च कक्षा कक्ष्यापि वाल्हिके ॥ २८ ॥

वाल्हीकोऽपि वल्गवागे खलिनं च खलीनवत् ।
मऽप्युष्ट्रे गोपतौ तु शण्ड इत्वर इत्यपि ॥ २९ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्थौरी स्थूर्यपि ककुदे ककुत्कुकुदमित्यपि ।
नैचिकं नैचिकी च स्यान्मलिनी बालगर्भिणी ॥ ३० ॥

पवित्रं गोमये छागे शुभोऽथ भषकः शुनि ।
सरमा देवशुन्यां च यमरथोऽपि सैरिभे ॥ ३१ ॥

पारिन्द्र इव पारीन्द्रः शरभेऽष्टापदोऽपि च ।
सृगालवच्छृगालोऽपि प्लवगः प्रवगोऽपि च ॥ ३२ ॥

वानायुरपि वातायुरुन्दरोऽपि च मूषके ।
ह्रीकुर्वन्बिडालोऽपि गोकर्णोऽपि भुजङ्गमे ॥ ३३ ॥

जलव्यालेऽलीगर्दोऽपि शेषः स्यादेककुण्डलः ।
आशीराशी च दंष्ट्रायां निर्मोके निर्लयन्यपि ॥ ३४ ॥

पतत्री पतत्रिरपि पिच्छं पिञ्छमपि स्मृतम् ।
परपुष्टान्यभृतौ च पिके बर्हिणि बर्हिणः ॥ ३५ ॥

वायसे बलिपुष्टोऽपि द्रोणोऽपि द्रोणकाकवत् ।
सारस्यां लक्ष्मणी क्रौञ्च्यां कुञ्चा चाषे दिविः किकिः ॥ ३६ ॥

किकिदीविरपि प्रोक्तष्टिट्टिभे टीटिभोऽपि च ।
कलविङ्के कुलिङ्गोऽपि दात्यूहे कालकण्ठकः ॥ ३७ ॥

दात्योहोऽपि बलाका च बकेरुर्विसकण्ठिका ।
मेधाव्यपि शुके तैलपायिकायां निशाटनी ॥ ३८ ॥

कपोते पारावतोऽपि मत्स्ये मच्छोऽथ तन्तुणे ।
स्मृतो वरुणपाशोऽपि नक्रे शङ्कुमुखोऽपि च ॥ ३९ ॥

उहारः कूर्म इत्येष तिर्यक्काण्डः शिलोञ्छितः

## पञ्चम काण्डः

नारकास्तु नैरयिकाः पाताले तु तलं रसा ॥ १ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति पञ्चमकाण्डस्य शिलोञ्छोऽयं समर्थितः

## षष्ठः काण्डः

जीवोऽपि चेतने जन्तौ प्राणी जन्मोऽपि जन्मनि । ॥ १ ॥

जीवातुर्जिविते ऽथायुः पुंस्युदन्तोऽपि चायुषि
संकल्पे स्याद्विकल्पोऽपि मनोऽनिन्द्रियमप्यथ । ॥ २ ॥

शर्मं सौख्यं पीडा बाधः चर्चा चर्चोऽपि कथ्यते
विप्रतीसारोऽनुशयेऽथार्था अपीन्द्रियार्थवत् । ॥ ३ ॥

सुशीमस्तु सुषीमोऽपि कक्खटे खक्खटोऽपि च
जरटे जरठोऽम्लेऽम्ब्लो रावो रव इव स्मृतः । ॥ ४ ॥

निषाद्गो निषदो गर्जो गर्जा भद्रोऽपि मन्द्रवत्
आकरो निकरे युग्मे जकुटोऽथ कनीयसि । ॥ ५ ॥

कनिष्ठं विग्रहः शब्दप्रपञ्चे निखिले पुनः
स्यान्निःशेषमनूनं च खण्डलं चापि खण्डवत् । ॥ ६ ॥

मलीमसे कल्मषं च निकृष्टे याव्यरेपसी
लडहं रमणीयं च रम्ये नित्ये सदातनम् । ॥ ७ ॥

शाश्वतिकं च नेदीय इत्यन्तिकतमे स्मृतम्
एकाकिन्यवगणोऽपि प्रागप्यादौ प्रकीर्तितम् । ॥ ८ ॥

मध्यमे मध्यंदिनं च निर्गलमनर्गले
बहुरूपपृथग्रूपनानाविधाः पृथग्विधे । ॥ ९ ॥

झम्पा झम्पो व्यवच्छिन्ने छादितं पिहितेऽपि च
प्रकाशिते प्रादुष्कृतमवज्ञायामसूक्षणम् । ॥ १० ॥

बुधैरवमननावगणने अपि कीर्तिते
अन्दोलनमपि प्रेङ्खाथोदस्तमप्युदञ्चितम् । ॥ ११ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भिदा भिच्चोदितमपीरितेऽथाङ्गीकृते पुनः
कक्षीकृतं स्वीकृतं च च्छिन्ने छातमपि स्मृतम् । ॥ १२ ॥

प्राप्ते विन्नं विस्मृते च भवेत्प्रस्मृतमित्यपि
अटाटात्या पर्यटनमानुपूर्व्यमनुक्रमे । ॥ १३ ॥

परीरम्भोऽपि संश्लेषे स्यादुद्घातोऽप्युपक्रमे
जातौ जातमपि स्पर्धा संघर्षोऽप्यथ विक्रिया । ॥ १४ ॥

विकारो विकृतिश्चापि विलम्भस्तु समर्पणम्
दिष्ट्या समुपजोषं सर्वदा सदा सनत् सनात् । ॥ १५ ॥

निर्भरे च स्वती हेतौ येन तेन च कीर्तितौ
अहो सम्बोधनेऽपीति षष्ठः काण्डः शिलोञ्छितः ॥ १६ ॥

वैक्रमेऽब्दे त्रिविस्विन्दुमिते(?) राधाद्यपक्षतौ ।
ग्रन्थोऽयं ददृभे श्रीमज्जिनदेवमुनीश्वरैः ॥ १ ॥

पू.श्री सुधाकलशमुनिविरचिता

## ॥ एकाक्षरनाममाला ॥

श्रीवर्धमानमानम्य सर्वातिशयशालिनम् ।
एकाक्षरनाममालां कीर्तयामि यथाश्रुतम् ॥ १ ॥

अः पुंल्लिङ्गः शार्ङ्गधारिण्यः स्वल्पार्थेऽव्ययः पुनः ।
विरञ्चावाश्च पुंल्लिङ्ग आ वाक्ये स्मरणेऽव्ययः ॥ २ ॥

आः सन्तापेऽव्ययः क्रुध्यामव्ययोऽवधृतौ स्मृतौ ।
इः कामे पुंल्लिङ्ग इ चाव्ययः कोपोक्ति-खेदयोः ॥ ३ ॥

ईः पद्मायामव्ययस्त्वी प्रत्यक्षे दुःखभावने ।
प्रकोपे सन्निधौ चैव पुंल्लिङ्ग उर्वृषध्वजे ॥ ४ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रोषोक्तौ मन्त्रणेऽप्यर्थेऽव्यय उं त्वव्ययस्तथा ।
प्रश्ने चाङ्गीकृतौ रोषे पुंल्लिङ्ग ऊस्तु रक्षणे ॥ ५ ॥

ऊमव्ययः प्रकोपोक्तौ प्रश्ने ऋर्देवमातरि ।
अव्यय ऋ तु कुत्सायां वचनेऽपि तथैव च ॥ ६ ॥

ऋस्त्वजे दानवाञ्छायां ऋश्च स्याद् देवमातरि ।
ऋर्वाराह्यां भवेदेस्तु विष्णावैस्तु वृषध्वजे ॥ ७ ॥

ओरूर्ध्वलिङ्ग आहूतावव्ययः स्यादनन्त ओ ।
संबोधने चाव्यय औ परब्रह्मण्यमः शिवे ॥ ८ ॥

कः सूर्य-मित्र-वाय्वग्नि-ब्रह्मा-ऽऽत्म-यम-केकिषु ।
प्रकाश-वक्त्रयोश्चापि कं नीर-सुख-मूर्धसु ॥ ९ ॥

कुर्भू-कुत्सितशब्देषु पापीयसि निवारणे ।
ईषदर्थे च किंशब्दः कुत्सने क्षेप-प्रश्नयोः ॥ १० ॥

वितर्का-ऽऽश्चर्य-निन्दासु किंशब्दः स्यात् कियानपि ।
खमिन्द्रिय-स्वर्ग-शून्य-भूपा-ऽऽकाश-सुखेषु च ॥ ११ ॥

संविदि शून्यखण्डे च वर्त्तते खश्च भास्करे ।
गो गन्धर्वे गणेशे च गीते गं गश्च गातरि ॥ १२ ॥

गौर्वाणी-बाण-भू-रश्मि-वज्र-स्वर्गा-ऽक्षि-वारिषु ।
दिशि धेनौ श्रुतेश्चर्यां गणेशे चापि गौः स्मृतः ॥ १३ ॥

घः कुम्भे हनने घोषा-ऽन्तर्भाव-किङ्किणीष्वपि ।
ङो विषये भैरवे च चस्तरौ चन्द्र-चौरयोः ॥ १४ ॥

चुश्चकोरे समाख्यातश्चकारः पुनरव्ययः ।
अन्योन्यार्थे विकल्पार्थे समासे पादपूरणे ॥ १५ ॥

पक्षान्तरे समूहार्थे हेताववधृतावपि ।
अन्वाचये तथा तुल्ययोगितायां च कीर्तितः ॥ १६ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

छः सूर्ये छेदके ख्यातस्तथा संवरणे भवेत् ।
छं च छन्दसि तडिति निर्मले च तथा स्मृतः ॥ १७ ॥

जश्च जेतरि जनने विगते जिस्तु जेतरि ।
जूर्विहायसि जवने पिशाच्यां विगतेऽपि च ॥ १८ ॥

झो नक्तं गायने नष्टे घर्घरध्वनिनामनि ।
चारुवाक्-चारयोर्झस्तु व्यूहने गूढरूपके ॥ १९ ॥

टः पृथिव्यां ध्वनौ वायौ करङ्के टं पुनर्भुवि ।
चकोरेऽब्दे तथा ठस्तु घटे शून्ये बृहद्धनौ ॥ २०॥

चन्द्रस्य मण्डले रुद्रे डो वृषाङ्के ध्वनावपि ।
बन्दिवृन्दे तथा डः स्याद् यामिनीपतिमण्डले ॥ २१ ॥

ढो ढक्कायां समाख्यातस्तथा ढा निर्गुणे ध्वनौ ।
णः प्रकटे निष्फले च प्रस्तुते ज्ञान-बन्धयोः ॥ २२ ॥

तकारस्तस्करे युद्धे क्रोडे पुच्छे च ता श्रियाम् ।
तु स्यात् पूर्वनिवृत्तौ च पूर्वस्मादवधारणे ॥ २३ ॥

विलक्षणे विकल्पार्थे थो भवेद् भयरक्षणे ।
भूधरे च तथा भारे दो दाने दायकेऽपि च ॥ २४ ॥

दाने दातरि दा केचिद् विदुर्दा छेद-बन्धयोः ।
दं कलत्रं तथा धं च धीरे च धनदे धने ॥ २५ ॥

धश्च चित्रेऽश्ववारे च धीर्बुद्धाविषुधावपि ।
गुह्यकेशे विरिञ्चौ धा तथा धूर्भार-कम्पयोः ॥ २६ ॥

धूते धुराकम्पने च नो बुद्धौ ज्ञान-बन्धयोः ।
अस्मानस्मभ्यमस्माकमेषां स्थाने भवेच्च नः ॥ २७ ॥

निषेधार्थेऽव्ययौ नो च नकारश्च नरस्तु ना ।
निः श्रुते नेतरि ख्यातो नुः स्तुतौ च प्रकीर्त्तितः ॥ २८ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

निः स्यात् क्षेपे च नित्यार्थे भृशार्था-ऽऽश्रय-राशिषु।
कौशले बन्धने मोक्षे संशये दारुकर्मणि ॥ २९ ॥

अधोभावोपरमयोः सन्निधानेऽव्ययो मतः।
नुः प्रश्ने च वितर्के च विकल्पेऽनुशयेऽव्ययः ॥ ३० ॥

तरण्यां नौस्तथा ख्यातः पः पाने पवने पथि।
प्रौढे च वर्णके पश्च पा पातरि तथा श्रुते ॥ ३१ ॥

फकारो निष्फले जल्पे पुष्करे भयरक्षणे।
फं फा वाते फले फेने फूत्कारे फूस्तथोदितः ॥ ३२ ॥

बः कुम्भे वरुणे पद्मे कलहे विगतौ तथा।
भश्चालि-शुक्रयोर्भावे भा च दीप्तौ भये तु भीः ॥ ३३ ॥

भं धिष्ण्ये भूर्भुवि स्थाने मश्चन्द्रे च विधौ शिवे।
मौलौ च बन्धने मूः स्यान्मा माने वारणेऽव्ययः ॥ ३४ ॥

अस्मच्छब्दे द्वितीयायां मा च षष्ठ्यां च मे पुनः।
मा मातरि तथा लक्ष्म्यां यस्तु वाते यमेऽपि च ॥ ३५ ॥

धातर्यपि पशौ यः स्याद् या याने यातरि श्रियाम्।
खट्वाङ्गेऽपि च रः कामे तीक्ष्णे वैश्वानरे नरे ॥ ३६ ॥

रामे वज्रे च शब्दे स्याद् रा द्रव्ये कनके पुनः।
आश्रये नीरदे च स्याद् रुः सूर्ये रक्षणेऽपि च ॥ ३७ ॥

भये शब्दे च री भ्रान्तौ लकारश्चलने पुनः।
लाऽऽदाने लूश्च लवने लश्च लौश्च बिडौजसि ॥ ३८ ॥

लश्चामृते दिशायां च लीः श्लेषे वलये तथा।
वो वाते वरुणे रुद्रे सान्त्वने चाव्ययः पुनः ॥ ३९ ॥

एवार्थे उपमाने च विकल्पे च समुच्चये।
विः श्रेष्ठेऽतीते नानार्थे वै हेतौ पादपूरणे ॥ ४० ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

द्वितीयायाश्चतुर्थ्याश्च षष्ठ्या युष्मद्बहुत्वके ।
वश्चाऽऽसां च विभक्तीनां द्वित्वे वां कथितो बुधैः ॥ ४१ ॥

आकाशे विहगे विश्व शं श्रेयसि सुखेऽव्ययः ।
शा तु शान्ते च सास्नायां शीः शये हिंसनेऽपि च ॥ ४२ ॥

शुश्चन्द्रे षः सदारः स्यात्तथेष्टे प्रसवे तु षूः ।
सः सूर्ये च परोक्षे च सं शङ्कावव्ययस्तु सम् ॥ ४३ ॥

सङ्गार्थे शोभनार्थे च प्रकृष्टार्थ-समर्थयोः ।
प्रथमान्तस्तदः स्थाने स्मृतौ लक्ष्म्यां च सोच्यते ॥ ४४ ॥

हः शूलिनि करे नीरे क्रोधे गर्भप्रभाषणे ।
निवासेऽथाव्ययो हः स्यात् सम्बुद्धौ पादपूरणे ॥ ४५ ॥

अव्ययो हा स्मृतः शोके तथा दुःख-विषादयोः ।
हि हेतौ पादपूर्त्तौ च विशेषे चावधारणे ॥ ४६ ॥

स्फुटे दानेऽथाव्ययो ही दुःखे हेतौ च विस्मये ।
विषादे चाव्ययो हं त्वनुनये कोपभाषणे ॥ ४७ ॥

हुमव्ययः परिप्रश्ने वितर्के वचने तु हौ ।
हे कुत्सायां तथा हे तु हूतौ सम्बोधने तु हौ ॥ ४८ ॥

राक्षसे क्षस्तथा क्षेत्रे शब्दा ये द्व्यक्षरादयः ।
स्वरान्ता व्यञ्जनान्ताश्च ज्ञेया ग्रन्थान्तरात्तु ते ॥ ४९ ॥

मलधारिगच्छभर्तुः सूरेः श्रीराजशेखरस्य गुरोः ।
शिष्यः सुधाकलश इत्येकाक्षरनाममालिकामतनोत् ॥ ५० ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अमरचन्द्रकविविरचिता

# ।। एकाक्षरनाममालिका ।।

विश्वाभिधानकोशानि प्रविलोक्य प्रभाष्यते ।
अमरेण कवीन्द्रेणैकाक्षरनाममालिका ॥ १ ॥

अः कृष्णः आः स्वयम्भूरिः काम ईः श्रीरुरीश्वरः ।
ऊ रक्षणमृ ऋ ज्ञेये देव-दानवमातरौ ॥ २ ॥

लृर्देवसूर्लृर्वाराही भवेदेर्विष्णुरैः शिवः ।
ओर्वेधा औरनन्तः स्यादं ब्रह्म परमः शिवः ॥ ३ ॥

को ब्रह्मा-ऽऽत्म-प्रकाशा-ऽर्क-केकि-वायु-यमा-ऽग्निषु ।
कं शीर्षेऽप्सु सुखे कुस्तु भूमौ शब्दे च किं पुनः ॥ ४ ॥

स्यात् क्षेप-निन्दयोः प्रश्ने वितर्के च खमिन्द्रिये ।
स्वर्गे व्योम्नि नृपे शून्ये सुखे संविदि खो रवौ ॥ ५ ॥

गस्तु गातरि गन्धर्वे गं गीते गौर्विनायके ।
स्वर्गे दिशि पशौ रश्मौ वज्रे भूमाविषौ गिरि ॥ ६ ॥

जलेऽक्ष्णि घस्तु घण्टीशे घा किङ्किण्यां वधे ध्वनौ ।
ङस्तु भैरव-विषयेच्छयोश्चश्चन्द्र-चौरयोः ॥ ७ ॥

छः सूर्ये छेदके छं तु निर्मले जस्तु जेतरि ।
विगते जूर्नभोवाचि पिशाच्यां जवनेऽपि च ॥ ८ ॥

झो नष्टे चारुवायौ ञो गायने घर्घरध्वनौ ।
टं पृथिव्यां करङ्के च टो ध्वनौ ठो महेश्वरे ॥ ९ ॥

शून्ये बृहद्धनौ चन्द्रमण्डले डः शिवे ध्वनौ ।
जापे ढो निर्गुणे शब्दे ढक्कायां णस्तु निष्फले ॥ १० ॥

ज्ञाने तस्तस्कर-क्रोडपुच्छयोस्ता पुनः श्रियाम् ।
थो भीत्राणे महीध्रे दं पन्त्यां दा दातृ-दानयोः ॥ ११ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

छेदे बन्धे च धा गुह्यकेशे धातरि धीर्मतौ ।
धूर्भार-कम्प-चिन्तासु नः पुनर्बन्ध-बुद्धयोः ॥ १२ ॥

निस्तु नेतरि नुः स्तुत्यां नौस्तर्यां पस्तु पातरि ।
पवने जलपाने च फो झञ्झानिल-फेनयोः ॥ १३ ॥

फूस्तु फूत्कारे निष्फलभाषणे बः प्रचेतसि ।
कलशे बिः खा-ऽण्डजयोर्भमुडौ भोऽलि-शुक्रयोः ॥ १४ ॥

भा कान्तौ भूर्भुवि स्थाने भीर्भये मः शिवे विधौ ।
चन्द्रे शिरसि मा माने श्री-मात्रोर्वारणेऽव्ययम् ॥ १५ ॥

मूः पुनर्बन्धने यस्तु मातरिश्वनि यं पशौ ।
या तु यातरि खट्वाङ्गे याने लक्ष्म्यां च रो ध्वनौ ॥ १६ ॥

तीक्ष्णे वैश्वानरे कामे राः स्वर्णे जलदे धने ।
री भ्रमे रुर्भये सूर्ये ल इन्द्रे चलनेऽपि च ॥ १७ ॥

लूर्लावे लीः पुनः श्लेषे वलये वो महेश्वरे ।
वरुणे मारुते च स्यादौपम्ये पुनरव्ययम् ॥ १८ ॥

शं शुभे शा च सास्नायां शी शयने शुर्निशाकरे ।
षः श्रेष्ठे षूः पुनर्गर्भविमोक्षे सः परोक्षके ॥ १९ ॥

सा लक्ष्म्यां हो निपाते च हस्ते दारुणि शूलिनि ।
क्षः क्षेत्रे रक्षसीत्युक्ता माला प्राक्सूरिसम्मता ॥ २० ॥

पूर्वाचार्यैस्तु ग्रथिता शोध्या सद्गुणशालिभिः ।
नाम्नामेकार्थ-नानार्थैकाक्षराणामियं मया ॥ २१ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कविश्रीधनञ्जयविरचितम्

# ॥ धनञ्जयनाममाला ॥

तन्नमामि परं ज्योति-रवाङ्मनसगोचरम् ।
उन्मूलयत्यविद्यां यद्, विद्यामुन्मीलयत्यपि ॥ १ ॥

द्वयं द्वितय-मुभयं, यमलं युगलं युगम् ।
युग्मं द्वन्द्वं यमं द्वैतं, पादयोः पातु जैनयोः ॥ २ ॥

ऋषिर्यतिर्मुनिर्भिक्षु-स्तापसः संयतो व्रती ।
तपस्वी संयमी योगी, वर्णी साधुश्च पातु वः ॥ ३ ॥

दीक्षितं शैक्षं शिष्यं च, तमन्तेवासिनं विदुः ।
कृतान्ताऽऽगमसिद्धान्तग्रन्थाः शास्त्रमतः परम् ॥ ४ ॥

भूमिर्भूः पृथिवी पृथ्वी, गह्वरी मेदिनी मही ।
धरा वसुमती धात्री, क्षमा विश्वंभराऽवनिः ॥ ५ ॥

वसुधा धरणी क्षोणी, क्ष्मा धरित्री क्षितिश्च कुः ।
कुम्भिनीलोर्वरा चोर्वी, जगती गौर्वसुन्धरा ॥ ६ ॥

तत्पर्याय-धरः शैलस्तत्पर्याय-पतिर्नृपः ।
तत्पर्याय-रुहो वृक्षः, शब्दमन्यं च योजयेत् ॥ ७ ॥

दरीभृदचलः शृङ्गी, पर्वतः सानुमान् गिरिः ।
नगः शिलोच्चयोऽद्रिश्च, शिखरी त्रिककुन् मरुत् ॥ ८ ॥

प्रस्थं पार्श्वं तटं सानु-र्मेखलोपत्यका तटी ।
नितम्बमन्तो दन्तश्च, तद्वानपि गिरिः स्मृतः ॥ ९ ॥

राजाऽधिपः पतिः स्वामी, नाथः परिवृढः प्रभुः ।
ईश्वरो विभुरीशानो, भर्तेन्द्र इन ईशिता ॥ १० ॥

अनोकहस्तरुः शाखी, विटपी फलिनो नगः ।
द्रुमोऽङ्घ्रिपः फलेग्राही, पादपोऽगो वनस्पतिः ॥ ११ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तत्पर्याय-चरो ज्ञेयो, हरिर्बलिमुखः कपिः ।
वानरः प्लवगश्चैव, गोलाङ्गूलोऽथ मर्कटः ॥ १२ ॥

विपिनं गहनं कक्ष-मरण्यं काननं वनम् ।
कान्तारमटवी दुर्गं, तच्चरः स्याद् वनेचरः ॥ १३ ॥

पुलिन्दः शबरो दस्यु-र्निषादो व्याधलुब्धकौ ।
धानुष्कोऽथ किरातश्च, सोऽरण्यानीचरः स्मृतः ॥ १४ ॥

वार्वारि कं पयोऽम्भोऽम्बु, पाथोऽर्णः सलिलं जलम् ।
शरं वनं कुशं नीरं, तोयं जीवनमब्विषम् ॥ १५ ॥

तत्पर्याय-चरो मत्स्य-स्तत्पर्याय-प्रदो घनः ।
तत्पर्यायोद्भवं पद्मं, तत्पर्याय-धिरम्बुधिः ॥ १६ ॥

पृथुरोमा षडक्षीणो, यादो वैसारिणो झषः ।
विसारी शफरो मीनः, पाठीनोऽनिमिषस्तिमिः ॥ १७ ॥

घनाघनो घनो मेघो, जीमूतोऽभ्रं बलाहकः ।
पर्जन्यो मुदिरो नभ्राट् शम्पा सौदामनी तडित् ॥ १८ ॥

आकालिकी क्षणरुचि-र्विद्युत् तत्-पतिरम्बुदः।
निर्घातमशनिर्वज्र-मुल्काशब्दं च योजयेत् ॥ १९ ॥

जम्बालः कर्दमः पङ्क-स्तज्जं तामरसं विदुः ।
कमलं नलिनं पद्मं, सरोजं सरसीरुहम् ॥ २० ॥

खरदण्डं कोकनदं, पुण्डरीकं महोत्पलम् ।
इन्दीवरमरविन्दं, शतपत्रं च पुष्करम् ॥ २१ ॥

स्यादुत्पलं कुवलय-मथ नीलाम्बुजन्म च ।
इन्दीवरं च नीलेऽस्मिन्, सिते कुमुदकैरवे ॥ २२ ॥

तद्-वती बिसिनी ज्ञेया, व्रततिर्वल्लरी लता ।
वल्लीनामानि योज्यानि, वारिधिर्वर्ण्यतेऽधुना ॥ २३ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्रोतस्विनी धुनी सिन्धुः, स्रवन्ती निम्नगाऽऽपगा ।
नदी नदो द्विरेफश्च, सरिन्नाम्नी तरङ्गिणी ॥ २४ ॥

तत्-पतिश्च भवत्यब्धिः, पारावारोऽमृतोद्भवः ।
अवारपारोऽकूपारो, रत्नमीनाऽभिधाऽऽकरः ॥ २५ ॥

समुद्रो वारिराशिश्च, सरस्वान् सागरोऽर्णवः ।
सीमोपकण्ठं तीरं च, पारं रोधोऽवधिस्तटम् ॥ २६ ॥

भङ्गस्तरङ्गकल्लोलौ, वीचिरुत्कलिकाऽऽवलिः ।
पाली वेला तटोच्छ्वासो, विभ्रमोऽयमुदन्वतः ॥ २७ ॥

मनुष्यो मानुषो मर्त्यो, मनुजो मानवो नरः ।
ना पुमान् पुरुषो गोधो, धवः स्यात् तत्-पतिर्नृपः ॥ २८ ॥

भृत्योऽथ भृतकः पत्तिः पदातिः पदगोऽनुगः ।
भटोऽनुजीव्यनुचरः, शस्त्रजीवी च किङ्करः ॥ २९ ॥

स्त्री नारी वनिता मुग्धा, भामिनी भीरुरङ्गना ।
ललना कामिनी योषिद्, योषा सीमन्तिनी वधूः ॥ ३० ॥

नितम्बिन्यबला बाला कामुकी वामलोचना ।
भामा तनूदरी रामा, सुन्दरी युवतिश्चला ॥ ३१ ॥

भार्या जाया जनिः कुल्या, कलत्रं गेहिनी गृहम् ।
महिला मानिनी पत्नी, तथा दाराः पुरन्ध्रयः ॥ ३२ ॥

वल्लभा प्रेयसी प्रेष्ठा, रमणी दयिता प्रिया ।
इष्टा च प्रमदा कान्ता, चण्डी प्रणयिनी तथा ॥ ३३ ॥

सती पतिव्रता साध्वी, पतिवत्न्येकपत्न्यपि ।
मनस्विनी भवत्यार्या, विपरीता निरूप्यते ॥ ३४ ॥

बन्धकी कुलटा मुक्ता, पुनर्भूः पुंश्चली खला ।
स्पर्शाऽभिसारिका दूती, स्वैरिणी शम्भली तथा ॥ ३५ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गणिका लञ्जिका वेश्या, रूपाजीवा विलासिनी ।
पण्यस्त्री दारिका दासी, कामुकी सर्ववल्लभा ॥ ३६ ॥

कान्तेष्टौ दयितः प्रीतः, प्रियः कामी च कामुकः ।
वल्लभोऽसुपतिः प्रेयान्, विट्श्च रमणो वरः ॥ ३७ ॥

सवित्री जननी माता जनकः सविता पिता ।
देहोऽपघनकायाङ्गं, वपुः संहननं तनुः ॥ ३८ ॥

कलेवरं शरीरं च, मूर्तिरस्माद्-भवः सुतः ।
पुत्रः सूनुरपत्यं च, तुक् तोकं चात्मजः प्रजा ॥ ३९ ॥

उद्वहस्तनयः पोतो, दारको नन्दनोऽर्भकः ।
स्तनन्धयोत्तानशयौ, स्त्रीत्वे दुहितरं विदुः ॥ ४० ॥

वयस्याऽऽली सहचरी, सध्रीची सवयाः सखी ।
आलीविवर्जितं मित्रं, सम्बन्धो मित्रयुः सुहृत् ॥ ४१ ॥

सहकृत्वा सहकारी, सहायः सामवायिकः ।
सनाभिः सगोत्रो बन्धुः सोदर्योऽवरजोऽनुजः ॥ ४२ ॥

कनीयानग्रजो ज्येष्ठो, भ्राता जामी स्वसाऽनुजा ।
भर्तुः स्वसा ननान्दा स्याद्, मातुलानी प्रियाम्बिका ॥ ४३ ॥

वैर्यरातिरमित्रोऽरि-र्द्विट् सपत्नो द्विषद् रिपुः ।
असेव्यो दुर्जनः शत्रु-र्दुष्टो द्वेषी खलोऽहितः ॥ ४४ ॥

दीधितिर्भानुरुस्रोंऽशु-र्गभस्तिः किरणः करः ।
पादो रुचिर्मरीचिर्भास्, तेजोऽर्चिर्गौर्द्युतिः प्रभा ॥ ४५ ॥

दीप्तिर्ज्योतिर्महो धाम, रश्मिरूर्जो विभा वसुः ।
शीतोष्णप्रायपूर्वत्वे, तद्-वन्ताविन्दुभास्करौ ॥ ४६ ॥

शशी विधुः सुधासूतिः, कौमुदीकुमुदप्रियः ।
कलाभृच्चन्द्रमाश्चन्द्रः, कान्तिमानोषधीश्वरः ॥ ४७ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

उडूनि भानि तारर्क्षं, नक्षत्रं तत्-पतिर्निशा ।
क्षणदा रजनी नक्तं, दोषा श्यामा क्षपा-करः ॥ ४८ ॥

तरणिस्तपनो भानु-र्ब्रध्नः पूषाऽर्यमा रविः ।
तिग्मः पतङ्गो द्युमणि-र्मार्तण्डोऽर्को ग्रहाधिपः ॥ ४९ ॥

इनः सूर्यस्तमोध्वान्त-तिमिराऽरिर्विरोचनः ।
दिनं दिवाऽहर्दिवसो, वासरस्तत्-करश्च सः ॥ ५० ॥

चक्रवाकाऽब्जपर्याय-बन्धुः कुमुदविप्रियः ।
यमुनायमकानीन-जनकः सविता मतः ॥ ५१ ॥

वाहोऽश्वस्तुरगो वाजी, हयो धुर्यस्तुरङ्गमः ।
सप्तिर्वा हरी रथ्यः, सप्ताद्यश्वो मयूखवान् ॥ ५२ ॥

खं विहायो वियद् व्योम, गगनाऽऽकाशमम्बरम् ।
द्यौर्नभोऽभ्रान्तरिक्षं च, मेघवायु-पथोऽप्यथ ॥ ५३ ॥

तच्-चरः खेचरस्तद्-गः पक्षी पत्री पतत्र्यपि ।
शकुन्तिः शकुनिर्विश्च, पतङ्गो विष्किरो वयः ॥ ५४ ॥

जाङ्गलं पिशितं मांसं, पलं पेशी च तत्-प्रियः ।
यातुधानस्तथा रक्षो, रात्र्यादि-चर इष्यते ॥ ५५ ॥

सुतोऽदितेस्तडिद्धन्वा, सेन्द्रो देवः सुरोऽमरः ।
स्वद्यौः स्वर्गोऽथ नाकश्च, तद्-वासस्त्रिदशो मतः ॥ ५६ ॥

तत्-पतिः शक्र इन्द्रश्च, सूनासीरः शतक्रतुः ।
प्राचीनबर्हिः सूत्रामा, वज्री चाऽऽखण्डलो हरिः ॥ ५७ ॥

शत्रुर्बलस्य गोत्रस्य, पाकस्य नमुचेरपि ।
वृत्रहा च सहस्राक्षो, गीर्वाणेशः पुरन्दरः ॥ ५८ ॥

बिडौजाश्चाऽप्सरोनाथो, वासवो हरिवाहनः
मरुतश्च मरुत्वांश्च, वृषा चैरावणाधिपः ॥ ५९ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शतमन्युस्तुराषाट् च, पुरुहूतश्च कौशिकः ।
सङ्क्रन्दनोऽथ मघवा, पुलोमारिर्मरुत्सखः ॥ ६० ॥

काष्ठा ककुब् दिगाशा च दक्षकन्या तथा हरित् ।
तत्पर्यायपरं योज्यं, प्राज्ञैः पालगजाऽम्बरम् ॥ ६१ ॥

पवनः पवमानश्च, वायुर्वातोऽनिलो मरुत् ।
समीरणो गन्धवाहः, श्वसनश्च सदागतिः ॥ ६२ ॥

नभस्वान् मातरिश्वा च, चरण्युर्जवनश्चलः ।
प्रभञ्जनोऽस्य पर्याय-पुत्रौ भीमाऽञ्जनात्मजौ ॥ ६३ ॥

तत्सखोऽग्निः शिखी वह्निः, पावकश्चाऽऽशुशुक्षणिः ।
हिरण्यरेताः सप्तार्चि-र्जातवेदास्तनूनपात् ॥ ६४ ॥

स्वाहापतिर्हुताशश्च, ज्वलनो दहनोऽनलः ।
वैश्वानरः कृशानुश्च, रोहिताश्वो विभावसुः ॥ ६५ ॥

वृषाकपिः शमीगर्भो, हव्यवाहो हुताशनः ।
तदादि-सूनुः सेनानीः, स्कन्दश्च शिखिवाहनः ॥ ६६ ॥

कार्त्तिकेयो विशाखश्च, कुमारः षण्मुखो गुहः ।
शक्तिमान् क्रौञ्चभेदी च, स्वामी शरवणोद्भवः ॥ ६७ ॥

तत्पिता शङ्करः शम्भुः शिवः स्थाणुर्महेश्वरः ।
त्र्यम्बको धूर्जटिः शर्वः, पिनाकी प्रमथाधिपः ॥ ६८ ॥

त्रिपुरारिर्विशालाक्षो, गिरीशो नीललोहितः ।
रुद्रेन्दुमौलियज्ञारि-त्रिनेत्रा वृषभध्वजः ॥ ६९ ॥

उग्रः शूली कपाली च, शिपिविष्टो भवो हरः ।
उमापतिर्विरूपाक्षो, विश्वरूपः कपर्द्यपि ॥ ७० ॥

भागीरथी त्रिपथगा, जाह्नवी हिमवत्सुता ।
मन्दाकिनी द्युपर्याय-धुनी गङ्गा नदीश्वरः ॥ ७१ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विधिर्वेधा विधाता च, द्रुहिणोऽजश्चतुर्मुखः ।
पद्मपर्याययोनिश्च, पितामहविरञ्चिनौ ॥ ७२ ॥

हिरण्यगर्भः स्रष्टा च, प्रजापतिः सहस्रपात् ।
ब्रह्मात्मभूरनन्तात्मा, कस्तत्पुत्रो हि नारदः ॥ ७३ ॥

कृष्णो दामोदरो विष्णु-रुपेन्द्रः पुरुषोत्तमः ।
केशवश्च हृषीकेशः, शाङ्‌र्गी नारायणो हरिः ॥ ७४ ॥

केशी मधुर्बलिर्बाणो, हिरण्यकशिपुर्मुरः ।
तदादि-सूदनः शौरिः, पद्मनाभोऽप्यधोक्षजः ॥ ७५ ॥

गोविन्दो वासुदेवश्च, लक्ष्मीः श्रीर्गोमिनीन्दिरा ।
तत्पतिः शैलभूम्यादि-धरश्चक्रधरस्तथा ॥ ७६ ॥

तत्पुत्रो मन्मथः कामः, शूर्पकारिरनन्यजः ।
कायपर्याय-रहितो, मदनो मकरध्वजः ॥ ७७ ॥

शिलीमुखः शरो बाणो, मार्गणो रोपणः कणः ।
इषुः काण्डं क्षुरप्रं च, नाराचं तोमरं खगः ॥ ७८ ॥

कार्मुकं धन्व चापं च, धर्मं कोदण्डकं धनुः ।
शिलीमुखादेरासनं, तत्कोटिमटनीं विदुः ॥ ७९ ॥

पुष्पं सुमनसः फुल्लं, लतान्तं प्रसवोद्‌गमौ ।
प्रसूनं कुसुमं ज्ञेयं तदाद्यस्त्रशरः स्मरः ॥ ८० ॥

स्वान्तमास्वनितं चित्तं, चेतोऽन्तःकरणं मनः ।
हृदयं विशिखाऽऽकूतं, मारस्तत्रोद्‌भवो मतः ॥ ८१ ॥

मौर्वी जीवा गुणो गव्या, ज्याऽलिर्भृङ्गः शिलीमुखः
भ्रमरः षट्पदो ज्ञेयो, द्विरेफश्च मधुव्रतः ॥ ८२ ॥

मौर्व्यादिप्रान्तमल्यादि, कन्दर्पस्यैक्षवं धनुः ।
हेतिरस्त्राऽऽयुधं शस्त्रं, पुष्पाद्यस्त्रः स्मरो मतः ॥ ८३ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ध्वजं पताका केतुश्च, चिह्नं तद्वैजयन्त्यपि ।
तत्तदन्तो झषाद्यादिः, शम्भोर्विघ्नकरः स्मरः ॥ ८४ ॥

कौक्षेयकोऽसिर्निस्त्रिंशः, कृपाणः करवालकः ।
तरवारिर्मण्डलाग्रं, खड्गनामावलिं विदुः ॥ ८५ ॥

अक्षौहिणी बलाऽनीकं, वाहिनी साधनं चमूः ।
ध्वजिनी पृतना सेना, सैन्यं दण्डो वरूथिनी ॥ ८६ ॥

कदनं समरं युद्धं, संयुगं कलहं रणम् ।
संग्रामं संपरायाऽऽजी, संयदाहुर्महाहवम् ॥ ८७ ॥

गजो मतङ्गजो हस्ती, वारणोऽनेकपः करी ।
दन्ती स्तम्बेरमः कुम्भी, द्विरदेभ-मतङ्गमाः ॥ ८८ ॥

शुण्डालः सामजो नागो, मातङ्गः पुष्करी द्विपः ।
करेणुः सिन्धुरस्तेषु, यन्ता याता निषाद्यपि ॥ ८९ ॥

नागाद्यरिः कण्ठीरवो, मृगेन्द्रः केसरी हरिः ।
व्याघ्रश्चमूरुः शार्दूलः, शरभोऽष्टापदोऽष्टपात् ॥ ९० ॥

क्रोडो वराहो दंष्ट्री च, घृष्टिः पोत्री च शूकरः ।
उष्ट्रो मयः शृङ्खलकः, करभः शीघ्रगामुकः ॥ ९१ ॥

कौलेयकः सारमेयो, मण्डलः श्वा पुरोगतिः ।
जिह्वापो ग्रामशार्दूलः, कुक्कुरो रात्रिजागरः ॥ ९२ ॥

हेम चाऽष्टापदं स्वर्णं, कनकाऽर्जुनकाञ्चनम् ।
सुवर्णं हिरण्यं भर्मं, जातरूपं च हाटकम् ॥ ९३ ॥

तपनीयं कलधौतं, कार्तस्वरं शिलोद्भवम् ।
रूप्यं रजतं गुलिका, शुक्तिजं मौक्तिकं तथा ॥ ९४ ॥

वित्तं वस्तु वसु द्रव्यं, स्वार्थं रा द्रविणं धनम् ।
कस्वरं तत्पतिं प्राहुः कुबेरं चैकपिङ्गलम् ॥ ९५ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वैश्रवणं राजराज – मुत्तराशापतिं तथा ।
अलकानिलयं श्रीदं, धनपर्यायदायकम् ॥ ९६ ॥

राष्ट्रं जनपदो निर्गो, जनान्तो विषयः स्मृतः ।
पूः पुरं पुरी नगरी, पत्तनं पुटभेदनम् ॥ ९७ ॥

वक्त्रं लपनमास्यं च, वदनं मुखमाननम् ।
श्रवणं श्रोत्रं श्रवश्चापि, कर्णं चैव श्रुतिं विदुः ॥ ९८ ॥

दृगक्षि चक्षुर्नयनं, दृष्टिर्नेत्रं विलोचनम् ।
कटाक्षं केकराऽपाङ्गं, विभ्रमस्तस्य वैकृतम् ॥ ९९ ॥

दोर्दोषा च भुजो बाहुः, पाणिर्हस्तः करस्तथा ।
प्राहुर्बाहुशिरोंऽसं च, हस्तशाखा कराङ्गुलिः ॥ १०० ॥

दन्तवासोऽधरोऽप्योष्ठो, वर्णितो दशनच्छदः ।
शिरोधरा गलो ग्रीवा, कण्ठश्च धमनी धमः ॥ १०१ ॥

नासा घ्राणपुरो वक्षः कुक्षिः स्याज्जठरोदरम् ।
स्तनः पयोधरः कुचो, वक्षोज इति वर्णितः ॥ १०२ ॥

कटिर्नितम्बः श्रोणिश्च, जघनं जानु जह्नु च ।
चलनं चरणं पादं, क्रमोऽङ्घ्रिश्च पदं विदुः ॥ १०३ ॥

शिरो मूर्धोत्तमाङ्गं कं, प्रारभ्यं प्रेरितेरितम् ।
वाग् वचो वचनं वाणी, भारती गीः सरस्वती ॥ १०४ ॥

सिंहद्विपघने गर्जो, हेषाऽश्वे बृंहितं गजे ।
स्फीत्कृतं धेनुकलभे, स्तनितं जलदे तथा ॥ १०५ ॥

स्यन्दने चीत्कृतं मन्त्रे, भटे च हुङ्कृतम् तथा ।
सीत्कृतं मणितं कामे, खन्कृतं शृङ्खलाऽऽयुधे ॥ १०६ ॥

मञ्जीरकं तुलाकोटि-र्नूपुरं तत्र झङ्कृतम् ।
झाङ्कृतं चाथ मरुति, क्रेङ्कृतं क्रौञ्चहंसयोः ॥ १०७ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रतीतं संस्तुतं लब्धं, दृष्टं परिचितं स्मृतम् ।
संस्थितं दशमीस्थं च, परासुं च मृतं विदुः ॥ १०८ ॥

खेदो द्वेषोऽप्यमर्षश्च, रुट् कोपक्रोधमन्यवः ।
हर्षः प्रमोदः प्रमदो, मुत्तोषाऽऽनन्द उत्सवः ॥ १०९ ॥

कृपाऽनुकम्पाऽनुक्रोशोऽहन्तोक्तिः करुणा दया ।
शेमुषी धिषणा प्रज्ञा, मनीषा धीस्तथाऽऽशयः ॥ ११० ॥

प्राज्ञो मेधादिमान् विद्वा-नभिरूपो विचक्षणः ।
पण्डितः सुरिराचार्यो, वाग्मी नैयायिकः स्मृतः ॥ १११ ॥

पारिषद्यो बुधः सभ्यः, सदस्यः सन् सभोचितः ।
आस्थानाधिपती राजा, राजसूयो नृपक्रतुः ॥ ११२ ॥

विष्टरं मल्लिकां पीठ-मासन्दीमासनं विदुः ।
विष्टपं भुवनं लोको, जगत्तस्य पतिर्जिनः ॥ ११३ ॥

सर्वज्ञो वीतरागोऽर्हन् केवली धर्मचक्रभृत् ।
तीर्थङ्करस्तीर्थकर-स्तीर्थकृद् दिव्यवाक्पतिः ॥ ११४ ॥

वर्षीयान् वृषभो ज्यायान्, पुरुषाद्यः प्रजापतिः ।
ऐक्ष्वाकः काश्यपो ब्रह्मा, गौतमो नाभिजोऽग्रजः ॥ ११५ ॥

सन्मतिर्महतिर्वीरो, महावीरोऽन्त्यकाश्यपः ।
ज्ञातान्वयो वर्धमानो, यत्तीर्थमिह साम्प्रतम् ॥ ११६ ॥

चेलं निवसनं वास-श्चीरमम्बरमंशुकम् ।
वस्त्राद्यन्तदिगाद्यादि-संज्ञितो वृषभेश्वरः ॥ ११७ ॥

कुङ्कुमं रुधिरं रक्तं कस्तूरी मृगनाभिजा ।
कर्पूरं घनसारं च, हिमं सेवेत पुण्यवान् ॥ ११८ ॥

समालम्भोऽङ्गरागश्च, प्रसाधनविलेपनम् ।
भूषणाऽऽभरणं रुच्यं, माल्यं मालागुणस्रजः ॥ ११९ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मेखला रसना काञ्ची, हेमपर्यायसूत्रकम् ।
श्रोणीबिम्बं कटिसूत्रं, मानसूत्रमिवाहितम् ॥ १२० ॥

मदिरां मद्यमैरेयं, सीधुं कादम्बरीमिराम् ।
प्रसन्नां वारुणीं हालां, मधुवारां सुरां विदुः ॥ १२१ ॥

शुण्डाऽऽसवस्तद्विधायी, शौण्डो गद्येत मद्यपः ।
शक्तोऽक्षद्यूतपानेषु, विचित्रा शब्दपद्धतिः ॥ १२२ ॥

सर्पिर्हैयङ्गवीनाज्यं, दुग्धं क्षीराऽमृतं पयः ।
उदश्विन्मथितं तक्रं, कालशेयं पिबेद् गुरुः ॥ १२३ ॥

प्रायो वयो दशाऽनेहा, पूर्णं यौवनिकं विदुः ।
तारुण्यं यौवनं चान्त्यो, वार्द्धीनः स्थविरो मतः ॥ १२४ ॥

वंशोऽन्वयोऽन्ववायः स्या-दाम्नायः सन्ततिः कुलम् ।
ओघो वर्गश्च सन्तानः, काव्यमेव कवेः स्थितिः ॥ १२५ ॥

हंसो मरालश्चक्राङ्गो हंसवाहः सनातनः ।
वरटा वारला हंसी, कोक ईहामृगो वृकः ॥ १२६ ॥

मयूरो बर्हिणः केकी, शिखी प्रावृषिकस्तथा ।
नीलकण्ठः कलापी च, शिखण्डी तत्पतिर्गुहः ॥ १२७ ॥

हरिणो मृगः पृषत-स्तदङ्कः शर्वरीकरः ।
खमिन्द्रियं हृषीकं च, स्त्रोतोऽक्षं करणं विदुः ॥ १२८ ॥

पन्नगोऽहिर्विषधरो, लेलिहानो भुजङ्गमः ।
नागोरगौ फणी सर्प-स्तद्वैरी विनतात्मजः ॥ १२९ ॥

सुपर्णो गरुडस्तार्क्ष्यो, गरुत्मान् शकुनीश्वरः ।
इन्द्रजिन्मन्त्रपूतात्मा, वैनतेयो विषक्षयः ॥ १३० ॥

पुण्यं भाग्यं च सुकृतं, भागधेयं च सत्कृतम् ।
अघमंहश्च दुरितं, पाप्मा पापं च किल्बिषम् ॥ १३१ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वृजिनं कलिलमेनो, दुष्कृतं तज्जयी जिनः ।
सदनं सद्म भवनं, धिष्ण्यं वेश्माथ मन्दिरम् ॥ १३२ ॥

गेहं निकेतनाऽगारं, निशान्तं निर्वृत्तं गृहम् ।
वसत्याऽऽवसथाऽऽवासं, स्थानं धामाऽऽस्पदं पदम् ॥ १३३ ॥

निकाय्यं निलयं पस्त्यं, शरणं विदुरालयम् ।
खेयं खातं च परिखा, वप्रः स्याद् धूलिकुट्टिमम् ॥ १३४ ॥

प्राकारः परिधिः सालः, प्रतोली गोपुराकृतिः ।
प्रासादसौधहर्म्याणि, निर्व्यूहो मत्तवारणम् ॥ १३५ ॥

वातायनं मत्तालम्ब-मालम्ब्यं सुखमासताम् ।
तमोऽन्धकारं तिमिरं, ध्वान्तं संतमसं तमम् ॥ १३६ ॥

समः सवर्णः सजातिः, सदृक्षः सदृशः सदृक् ।
तुल्यः सधर्मा सरूप-स्तुला कक्षोपमा विधा ॥ १३७ ॥

विन्मन्यो विद्यमानश्च, गुरुस्थानोऽम्बुजाननः ।
सिंहनादीति च पर्याय-मुपमानेषु योजयेत् ॥ १३८ ॥

व्यपदेशो निभं व्याजः, पदं व्यतिकरश्छलम् ।
छद्म वृत्तान्तमुत्प्रेक्षा, शब्दमन्यं च निर्णयेत् ॥ १३९ ॥

व्रातः पूगः समाजश्च, समूहः सन्ततिर्व्रजः ।
व्यूहो निकायो निकरो, निकुरम्बं कदम्बकम् ॥ १४० ॥

ओघः समुदयः संघः, संघातः समितिस्ततिः ।
निचयः प्रकरः पङ्क्तिः पशूनां समजो व्रजः ॥ १४१ ॥

अविदूरं च निकट-मविलम्बमनन्तरम् ।
समीपाऽभ्याशमासन्न-मभ्यर्णं सन्निधिं विदुः ॥ १४२ ॥

जित्या हलिर्हलः सीरं, लाङ्गलं तत्करो बलः ।
रेवतीदयितो नील-वसनः केशवाग्रजः ॥ १४३ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अर्जुनः फाल्गुनो जिष्णुः, श्वेतवाजी कपिध्वजः ।
गाण्डिवी कार्मुकी सव्य-साची मध्यमपाण्डवः ॥ १४४ ॥

वृषसेनः सुनिर्मोको, दैत्यारिः शक्रनन्दनः ।
कर्णशूली किरीटी च, शब्दभेदी धनञ्जयः ॥ १४५ ॥

कुरुकीचकयोः शत्रु-र्वायुपुत्रो वृकोदरः ।
समवर्ती यमः कालः, कृतान्तो मृत्युरन्तकः ॥ १४६ ॥

धर्मराजः पितृपतिः, सूरसूनुः परेतराट् ।
शमनो यमुनाभ्राता, श्राद्धदेवश्च दण्डभृत् ॥ १४७ ॥

तदात्मजोऽजातरिपुः, कौन्तेयो भरतान्वयः ।
कौरव्यो राजलक्ष्मा च, सोमवंश्यो युधिष्ठिरः ॥ १४८ ॥

श्वेतार्जुनौ शुचिः श्येतो, वलक्षं सितपाण्डुरम् ।
शुक्लावदातं धवलं, पाण्डुः शुभ्रं शशिप्रभम् ॥ १४९ ॥

कृष्णं नीलाऽसितं कालं, धूमं धूम्रमलिप्रभम् ।
लोहितं रक्तमाताम्रं, पाटलं विशदारुणम् ॥ १५० ॥

गौरं पीतं हरिद्राभं, पालाशं हरितं हरित् ।
हरिणी लोहिनी शोणी, गौरी श्येनी पिशङ्ग्यपि ॥ १५१ ॥

सारङ्गी शबली काली, कल्माषी नीलपिङ्गली ।
परागं मधु किञ्जल्कं, मकरन्दं च कौसुमम् ॥ १५२ ॥

उपचाराद् रजः पांसुं, रेणुं धूलीं च योजयेत् ।
कलङ्काऽवद्यमलिनं किञ्जल्कं लक्ष्म लाञ्छनम् ॥ १५३ ॥

निर्वादमधमं पङ्कं, मलीमसमपि त्यजेत् ।
जनोदाहरणं कीर्तिं, साधुवादं यशो विदुः ॥ १५४ ॥

वर्णं गुणावलिं ख्याति-मवदानं तु साहसम् ।
प्रेष्याऽऽदेशनिदेशाऽऽज्ञा-नियोगाः शासनं तथा ॥ १५५ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

संदेशः प्रिययोर्वार्ता, प्रवृत्तिः किंवदन्त्यपि ।
कठोरं कठिनं स्तब्धं, कर्कशं परुषं दृढम् ॥ १५६ ॥

अश्लीलं काहलं फल्गु, कोमलं मृदु पेशलम् ।
प्रत्यग्रं साम्प्रतं नव्यं, नवं नूतनमग्रिमम् ॥ १५७ ॥

पुराणं जरठं जीर्णं, प्राक्तनं सुचिरन्तनम् ।
भो रे हंहो हे चामन्त्रे, कच्चित् किञ्चन संशये ॥ १५८ ॥

द्राक् क्षणेऽह्नाय सपदि, निषेधे मा न खल्वलम् ।
उच्चैरुच्चावचं तुङ्ग-मुच्चमुन्नतमुच्छ्रितम् ॥ १५९ ॥

नीचं न्यग् आनतं कुब्जं, नीचैर्ह्रस्वं नयेत् परम् ।
अमा सह समं साकं, सार्धं सत्रा सजूः समाः ॥ १६० ॥

सर्वदा सततं नित्यं, शश्वद् आत्यन्तिकं सदा ।
शृङ्गी दृतिहरिर्नाथ-हरिस्तिर्यक् च शृङ्गिणः ॥ १६१ ॥

गौश्चतुष्पात् पशुस्तत्र, महिषी नाम देहिका ।
वियोगं मदनावस्थां, विरहं फुल्लकं विदुः ॥ १६२ ॥

संहितं सहितं युक्तं, संपृक्तं संभृतं युतम् ।
संस्कृतं समवेतं च, प्राहुरन्वीतमन्वितम् ॥ १६३ ॥

प्रेमाभिलाषमालम्बं, रागं स्नेहमतः परम् ।
वर्त्माऽध्वा सरणिः पन्थाः, मार्गः प्रचरसञ्चरौ ॥ १६४ ॥

त्रिमार्गनामगा गङ्गा, घोषो गोमण्डलं व्रजः ।
वत्सः शकृत्करिर्जातः षोडन् षड्दशनः स्मृतः ॥ १६५ ॥

कृती नदीष्णो निष्णातः, कुशली निपुणः पटुः ।
क्षुण्णः प्रवीणः प्रगल्भः, कोविदश्च विशारदः ॥ १६६ ॥

विदग्धश्चतुरो धूर्त-श्चाटुकृत् कितवः शठः ।
क्वापि नागरिको ज्ञेयो, गोत्रं संज्ञाङ्कनाम तत् ॥ १६७ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मुग्धो मूढो जडोऽनेडो, मूको मूर्खश्च कद्वदः ।
स देवानांप्रियोऽप्राज्ञो, मन्दो धीनामवर्जितः ॥ १६८ ॥

शौण्डीरो गर्वितः स्तब्धो, मानी चाहंयुरुद्धतः ।
उद्ग्रीव उद्धरो दृप्तो, नीचश्च पिशुनोऽधमः ॥ १६९ ॥

चौरैकागारिकस्तेना–स्तस्करः प्रतिरोधकः ।
निशाचरो गूढचरो, हारकः पारिपन्थिकः ॥ १७० ॥

षष्टिकः कलमः शालि–र्व्रीहिः स्तम्बकरिस्तथा ।
प्रस्तरोपलपाषाण–दृषद्धातुशिलाघनाः ॥ १७१ ॥

तत्र जातमयो लोहं, शातकुम्भं नयेत् परम् ।
साधीयोऽत्यर्थमत्यन्तं, नितान्तं सुष्ठु वै भृशम् ॥ १७२ ॥

स्फुटं साधु खलु स्पष्टं, विशदं पुष्कलामलम् ।
चित्राश्चर्याद्भुतं नोद्यं, विस्मयः कौतुकोऽप्यहो ॥ १७३ ॥

क्षामं क्षान्तं कृशं क्षीणं, हीनं जीर्णं पुरातनम् ।
शीर्णावसानं न्यूनं च, धैर्यं शौर्यं च पौरुषम् ॥ १७४ ॥

क्षिप्राऽऽशु मङ्क्ष्वरं शीघ्रं, सहसा झटिति द्रुतम् ।
तूर्णं जवः स्यदो रंहो, रयो वेगस्तरो लघु ॥ १७५ ॥

पाशनीतः सितो बद्धः, संधानीतो नियन्त्रितः ।
नियमितः शृङ्खलितः पिनद्धः पाशितो रिपुः ॥ १७६ ॥

कान्तं कमनं कम्रं च, कमनीयं मनोहरम् ।
अभिरामं रमणीयं, रम्यं सौम्यं च सुन्दरम् ॥ १७७ ॥

चारु श्लक्ष्णं च रुचिरं, प्रशस्तं हृद्यबन्धुरम् ।
दर्शनीयं मनोज्ञं च, चित्तपर्यायहारि च ॥ १७८ ॥

अवश्यायं तुषारं च, प्रालेयं तुहिनं हिमम् ।
नीहारं तत्करं विद्धि, मृगाङ्कं रोहिणीपतिम् ॥ १७९ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चारोऽवसर्पः प्रणिधि-र्निगूढपुरुषश्चरः ।
तद्वानुक्तः सहस्राक्षः, सत्यार्थे सूनृतं ऋतम् ॥ १८० ॥

अत्यन्ताय चिरायेति, प्राह्वेऽकस्माद् बलादिति ।
प्रायेणेति कृतिश्चेति, विभक्तिप्रतिरूपकम् ॥ १८१ ॥

अभियोगोद्यमोद्योगा, उत्साहो विक्रमो मतः ।
रम्भा स्त्री कदली चिह्नं, मोचा सारतरुश्च सा ॥ १८२ ॥

कीनाशः कृपणो लुब्धो, गृध्नुर्दीनोऽभिलाषुकः ।
रहोऽनुरहसोपांशु, रहस्यं च भिनत्ति कः ? ॥ १८३ ॥

कीचको ध्वनिमद्वेणु-स्तालो गेयक्रमोद्भवः ।
पुष्करं मुरजं पद्मं, हस्तिहस्ताग्रनामकम् ॥ १८४ ॥

निस्तलं वर्तुलं वृत्तं, स्थपुटं विषमोन्नतम् ।
दीर्घं प्रांशु विशालं च, बहुलं पृथुलं पृथु ॥ १८५ ॥

उल्बणं दारुणं तिग्मं, घोरं तीव्रोग्रमुत्कटम् ।
शीतकं तिमिरं याप्यं, मन्दं विद्धि विलम्बितम् ॥ १८६ ॥

सौहार्दं सौहृदं हार्दं, सौहृद्यं सख्यसौरभम् ।
मैत्री मैत्रेयिकाऽजर्यं, साहाय्यं सङ्गतं मतम् ॥ १८७ ॥

स्वभावः प्रकृतिः शीलं, निसर्गो विस्रसा निजः ।
योग्या गुणनिकाऽभ्यासः, स्यादभीक्ष्णं मुहुर्मुहुः ॥ १८८ ॥

मृषाऽलीकं मुधा मोघं, वितथं विफलं वृथा ।
विधुरं व्यसनं कष्टं, कृच्छ्रं गहनमुद्धरेत् ॥ १८९ ॥

समस्तं सकलं सर्वं, कृत्स्नं विश्वं तथाऽखिलम् ।
शकलं विकलं खण्डं, शल्कं लेशं लवं विदुः ॥ १९० ॥

मर्म कोषं च कलहं, परिवादं छलं नयेत् ।
शोणितं लोहितं रक्तं, रुधिरं क्षतजाऽसृजम् ॥ १९१ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सतताऽनारताऽजस्राऽ-न्वहं कन्यापतिर्वरः ।
उद्वाहः परिणयनं, विवाहश्च निवेशनम् ॥ १९२ ॥

शुषिरं विवरं रन्ध्रं छिद्रं गर्ता च गह्वरम् ।
श्वभ्रं रस्यं च पातालं, नरकं यान्त्यमेधसः ॥ १९३ ॥

अदभ्रं भूरि भूयिष्ठं, बंहिष्ठं बहुलं बहु ।
प्रचुरं नैकमानन्त्यं, प्रभूतं प्राज्यपुष्कले ॥ १९४ ॥

भवो भावश्च संसारः, संसरणं च संसृतिः ।
तत्त्वज्ञश्चतुरो धीर-स्त्यजेज्जन्मजवं जवम् ॥ १९५ ॥

ओजस्व्यूर्जस्वी तेजस्वी, तरस्वी च मनस्व्यपि ।
भास्वरो भासुरः शूरः प्रवीरः सुभटो मतः ॥ १९६ ॥

उरीकृतमप्यूरी-कृतमङ्गीकृतं तथा ।
अस्तुङ्कारोऽभ्युपगमे, सत्यङ्कारः पणार्पणे ॥ १९७ ॥

तनुत्रं वर्म कवच-मावृतिर्बाणवारणम् ।
कूर्पासं कञ्चुकं छत्र-मातपत्रोष्णवारणम् ॥ १९८ ॥

केशं शिरोरुहं वालं, कचं चिकुरमीहयेत् ।
चूडापाशं च धम्मिल्लं, कबरी केशबन्धनम् ॥ १९९ ॥

क्षेमं कल्याणमभयं, श्रेयो भद्रं च मङ्गलम् ।
भावुकं भविकं भव्यं, कुशलं च शिवं तथा ॥ २०० ॥

कवेर्धनञ्जयस्येयं, सत्कवीनां शिरोमणेः ।
प्रमाणं नाममालेति, श्लोकानां हि शतद्वयम् ॥ २०१ ॥

वक्ता वाचस्पतिर्यत्र, श्रोता शक्रस्तथापि तौ ।
शब्दपारायणस्यान्तं, न गतौ तत्र के वयम् ? ॥ २०२ ॥

तथापि किञ्चित् कस्मैचित्, प्रतिबोधाय सूचितम् ।
बोधयेत् कियदुक्तिज्ञं, मार्गज्ञः सह याति किम् ? ॥ २०३ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रमाणमकलङ्कस्य, पूज्यपादस्य लक्षणम् ।
द्विसंधान-कवेः काव्यं, रत्नत्रयमपश्चिमम् ॥ २०४ ॥

ब्रह्माणं समुपेत्य वेदनिनदव्याजात्तुषाराचल-
स्थानस्थावरमीश्वरं सुरनदीव्याजात्तथा केशवम् ।
अप्यम्भोनिधिशायिनं जलनिधिध्वानापदेशादहो !,
पूत्कुर्वन्ति धनञ्जयस्य च भिया शब्दाः समुत्पीडिताः ॥ २०५ ॥

कविश्रीधनञ्जयविरचिता

## ॥ अनेकार्थनाममाला ॥

गम्भीरं रुचिरं चित्रं, विस्तीर्णार्थप्रकाशकम् ।
शाब्दं मनाक् प्रवक्ष्यामि, कवीनां हितकाम्यया ॥ १ ॥

अर्हत् पिनाकिनौ शम्भू, जिनावर्हत्तथागतौ ।
वेदसूर्यौ विवस्वन्तौ, विष्णुरुद्रौ वृषाकपी ॥ २ ॥

वैकुण्ठाविन्द्र गोविन्दा, – वनन्तौ शेषशार्ङ्गिणौ ।
जीमूतौ करिकुत्कीलौ, पर्जन्यौ शक्रवारिदौ ॥ ३ ॥

वनमम्भसि कान्तारे, भुवनं विष्टपेऽर्णसि ।
घृतं सर्पिषि पानीये, विषं हालाहले जले ॥ ४ ॥

तल्पं दारेषु शय्यायां, ज्योतिश्चक्षुषि तारके ।
धवले सुन्दरे रामो, वामो वक्रे मनोहरे ॥ ५ ॥

नक्षत्रे मन्दिरे धिष्ण्यं वसने गगनेऽम्बरम् ।
परिधौ पादपे सालः, सिन्धुः स्रोतसि योषिति ॥ ६ ॥

सारसः शकुनौ धूर्ते, केतनं दीधितौ ध्वजे ।
मयूखः कीलके दीप्तौ पतङ्गः शलभे रवौ ॥ ७ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अञ्जनः कज्जले नागे, सारङ्गः पृषते गजे ।
सरलः प्रगुणे वृक्षे, पुन्नागः सन्नरे तरौ ॥ ८ ॥

पाञ्चजन्योऽनले शङ्खे, कम्बुः शङ्खे मतङ्गजे ।
कस्वरो द्युभवे द्युम्ने, स्यन्दनं शकटेऽम्बुनि ॥ ९ ॥

अद्रिर्गिरिवनस्पत्योः, शिखरी तरुभूध्रयोः ।
राजा चन्द्रमहीपत्योः द्विजो दशनविप्रयोः ॥ १० ॥

मोचामरस्त्रियोः रम्भा, कदली ध्वजमोचयोः ।
अशोकः सुमनस्तर्वोः सुमनाः सुरपुष्पयोः ॥ ११ ॥

मुक्तारजतयोस्तारो, भूरि भूयः सुवर्णयोः ।
पानीयदुग्धयोः क्षीरं, पयः सलिलदुग्धयोः ॥ १२ ॥

कालप्रकर्षयोः काष्ठा, कोटिः संख्याप्रकर्षयोः ।
रन्ध्रसंश्लेषयोः सन्धिः, सिन्धुर्नदसमुद्रयोः ॥ १३ ॥

निषेधदुःखयोर्बाधा, व्यामोहो मूर्खमौढ्ययोः ।
कौपीनाकार्ययोर्गुह्यं, कीलालं रुधिराम्भसोः ॥ १४ ॥

मौल्यसत्कारयोरर्घो, जात्यः श्रेष्ठकुलीनयोः ।
मेघवत्सरयोरब्दस्ताक्ष्यों हयगरुन्मतोः ॥ १५ ॥

स्तब्धतास्थूणयोः स्तम्भश्चर्चा चिन्तावितर्कयोः ।
हरकीलकयोः स्थाणुः स्वैरः स्वच्छन्दमन्दयोः ॥ १६ ॥

शङ्कुस्संकीर्णविवरे, पलालाग्नौ च कीलके ।
संख्यायां काननोद्भूते, वह्नौ दावो दवोऽपि च ॥ १७ ॥

कीनाशः कृपणे भृत्ये, कृतान्ते पिशिताशिनि ।
तथा पुण्यजनान् प्राहुः सज्जनान् राक्षसानपि ॥ १८ ॥

विरोचनो रवौ चन्द्रे, दनुसूनौ हुताशने ।
हंसो नारायणे ब्रघ्ने, यतावश्वे सितच्छदे ॥ १९ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सोमश्चन्द्रोऽमृतं सोमः, सोमो राजा युगादिभूः ।
सोमः प्रताननीभेदः सोमः पौलस्त्यदिक्पतिः ॥ २० ॥

अजो विधिरजो विष्णुरजः शम्भुरजस्तमः ।
अजस्त्रैवार्षिको व्रीहिरजो रामपितामहः ॥ २१ ॥

शुद्धेऽनुपहते वह्नौ, ब्राह्मणे सचिवोत्तमे ।
आषाढेऽध्यात्मसंवित्तौ, ब्रह्मचर्य्ये शुचिर्मता ॥ २२ ॥

अर्थोऽभिधेयरैवस्तु, -प्रयोजननिवृत्तिषु ।
भावः पदार्थचेष्टात्म, -सत्ताभिप्रायजन्मसु ॥ २३ ॥

प्रायोभूमोपमार्तक्य, -प्रभृत्यन्ननिवृत्तिषु ।
अन्तः पदार्थसामीप्यधर्मसत्त्वव्यतीतिषु ॥ २४ ॥

अक्षो द्यूते विरूथाङ्गे, नयनादौ बिभीतके ।
सारः श्रेष्ठे बले वित्ते, केशे जलचरे स्थिरे ॥ २५ ॥

वाचि वारि पशौ भूमौ दिशि लोम्नि पवौ दिवि ।
विशिखे दीधितौ दृष्टावेकादशसु गौर्मतः ॥ २६ ॥

चन्द्रे सूर्ये यमे विष्णौ, वासवे दर्दुरे हये ।
मृगेन्द्रे वानरे वायौ दशस्वपि हरिः स्मृतः ॥ २७ ॥

पद्मे करिकरप्रान्ते, व्योम्नि खड्गफले गदे ।
वाद्यभाण्डमुखे तीर्थे, जले पुष्करमष्टसु ॥ २८ ॥

शृङ्गारादौ कषायादौ घृतादौ च विषे जले ।
निर्यासे पारदे रागे वीर्येऽपि रस इष्यते ॥ २९ ॥

तीर्थं प्रवचने पात्रे, लब्धाम्नाये विदाम्बरे ।
पुण्यारण्ये जलोत्तारे, महासत्ये महामुनौ ॥ ३० ॥

धातुः पञ्चसु लोहेषु, शरीरस्य रसादिषु ।
पृथिव्यादिचतुष्के च, स्वभावे प्रकृतावपि ॥ ३१ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रधानशृङ्गलाङ्गूलभूषापुण्ड्रप्रभावना ।
ध्वजलक्ष्मतुरङ्गेषु, ललामो नवसु स्मृतः ॥ ३२ ॥

आकृतावक्षरे रूपे, ब्राह्मणादिषु जातिषु ।
माल्यानुलेपने चैव, वर्णः षट्सु निगद्यते ॥ ३३ ॥

आकारादावुदात्तादौ, षड्जादौ निस्वने स्वरः ।
समयाचारसिद्धान्त-कालेषु समयः स्मृतः ॥ ३४ ॥

तन्त्रं प्रधाने सिद्धान्ते सैन्यं तन्तौ परिच्छिदे ।
सत्त्वमोजसि सत्तायामुत्साहे स्थेम्नि जन्तुषु ॥ ३५ ॥

रूपादौ तन्तुषु ज्याया अप्रधाने नये गुणः ।
ज्ञानचारित्रमोक्षात्मश्रुतिषु ब्रह्मवाग्वरा ॥ ३६ ॥

अवकाशे क्षणे वस्त्रे, बहिर्योगे व्यतिक्रमे ।
मध्येऽन्तःकरणे रन्ध्रे, विशेषे विरहेऽन्तरम् ॥ ३७ ॥

हेतौ निदर्शनं प्रश्ने स्तुतौ कण्ठसमीकृतौ ।
आनन्तर्येऽधिकारार्थे, माङ्गल्ये चाथ इष्यते ॥ ३८ ॥

हेतावेवं प्रकारादौ व्यवच्छेदे विपर्यये ।
प्रादुर्भावे समाप्तौ च इति शब्दः प्रकीर्तितः ॥ ३९ ॥

धर्मो धनुष्यहिंसादावुत्पादादावये नये ।
द्रव्यं क्रियाश्रये वित्ते, जीवादौ दारुवैकृते ॥ ४० ॥

मूर्तिमत्सु पदार्थेषु, संसारिण्यपि पुद्गलः ।
अकर्मकर्मनोकर्मजातिभेदेषु वर्गणा ॥ ४१ ॥

ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः ।
वैराग्यस्यावबोधस्य षण्णां भग इति स्मृतः ॥ ४२ ॥

प्राहुः कैवल्यमार्हन्त्ये विविक्ते निर्वृत्तावपि ।
लब्धिः केवलबोधादाविष्याप्तौ नियतौ श्रियाम् ॥ ४३ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अनेकान्ते च विद्यादौ, स्यान्निपातः शुभे क्वचित् ।
दर्शनादौ मणौ रत्नं भव्यः शस्ते, प्रसेत्स्यति ॥ ४४ ॥

परमात्मा जिने सिद्धे परमेष्ठ्यर्हदादिषु ।
सिद्धः सिद्धनिषद्यायामर्हत्सिद्धश्रियामपि ॥ ४५ ॥

अर्हत्सिद्धमितिद्वावप्यर्हत्सिद्धाभिधायिनौ ।
अर्हदादीनपि प्राहुः शरणोत्तममङ्गलान् ॥ ४६ ॥

महाकविश्रीधनपालविरचिता

## ॥ पाइअलच्छीनाममाला ॥

नमिऊण परमपुरिसं पुरिसुत्तमनाभिसंभवं देवं ।
वुच्छं पाइअलच्छि त्ति नाममालं निसामेह ॥ १ ॥

कमलासणो सयंभू पिआमहो चउमुहो य परमिट्ठी ।
थेरो विही विरिंचो पयावई कमलजोणी य ॥ २ ॥

दक्खायणी भवाणी सेलसुआ पव्वई उमा गोरी ।
अज्जा दुग्गा काली सिवा य कच्चायणी चंडी ॥ ३ ॥

अक्को तरणी मित्तो मत्तंडो दिणमणी पयंगो य ।
अहिमयरो पच्चूहो दिअसयरो अंसुमाली य ॥ ४ ॥

इंदू निसायरो ससहरो विहू गहवई रयणिनाहो ।
मयलंछणो हिमयरो रोहिणिरमणो ससी चंदो ॥ ५ ॥

धूमद्धओ हुअवहो विहावसू पावओ सिही वण्ही ।
अणलो जलणो डहणो हुआसणो हव्ववाहो य ॥ ६ ॥

मयरद्धओ अणंगो रइणाहो वम्महो कुसुमबाणो ।
कंदप्पो पंचसरो मयणो संकप्पजोणी य ॥ ७ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मयरहरो सिंधुवई सिंधू रयणायरो सलिलरासी ।
पारावारो जलही तरंगमाली समुद्दो य ॥ ८ ॥

पीलू गओ मयगलो मायंगो सिंधुरो करेणू य ।
दोघट्टो दंती वारणो करी कुंजरो हत्थी ॥ ९ ॥

अंबुरुहं सयवत्तं सरोरुहं पुंडरीअं अरविंदं ।
राईवं तामरसं महुप्पलं पंकयं नलिणं ॥ १० ॥

फुल्लंधुआ रसाऊ भिंगा भसला य महुअरा अलिणो ।
इंदिंदिरा दुरेहा धुअगाया छप्पया भमरा ॥ ११ ॥

रामा रमणी सीमंतिणी वहू वामलोअणा विलया ।
महिला जुवई अबला निअंबिणी अंगणा नारी ॥ १२ ॥

सच्छंदा उद्दामा निरग्गला मुक्कला विसंखलया ।
निरवग्गहा य सइरा निरंकुसा हुंति अप्पवसा ॥ १३ ॥

रुइरं राहं रम्मं अहिरामं बंधुरं मणुज्जं च ।
लट्ठं कंतं सुहयं मणोरमं चारु रमणिज्जं ॥ १४ ॥

मसिणं सणिअं मट्ठं मंदं अलसं जडं मरालं च ।
खेलं निहुअं सइरं वीसत्थं मंथरं थिमिअं ॥ १५ ॥

संधुक्किअं उद्दीविअं उज्जालिअं पलीविअं जाण ।
संदुमिअं ऊसिक्किअं उब्भुत्तिअयं च तेअविअं ॥ १६ ॥

सयराहं नवरि य दुत्ति झत्ति सहसत्ति इक्कसरिअं च ।
अविहाविअं इक्कवए अतक्किअं तक्खणं सहसा ॥ १७ ॥

उप्पंको ओप्पीलो उक्केरो पहयरो गणो पयरो ।
ओहो निवहो संघो संघाओ संहरो निअरो ॥ १८ ॥

संदोहो निउरंबो भरो निहओ समूह-नामाइं ।
इत्ताहे गाहद्धेहिं वण्णिमो वत्थुपज्जाए ॥ १९ ॥



For Private And Personal Use Only

लोअग्गं परमपयं मुत्ती सिद्धी सिवं च निव्वाणं ।
सुद्धोअणी दसबलो सक्को सुगओ जिणो बुद्धो ॥ २० ॥

सउरी दसारनाहो वइकुंठो महुमहो उविंदो य ।
सूली सिवो पिणाई थाणू गिरिसो भवो संभू ॥ २१ ॥

कुंचारी खंदो छंमुहो विसाहो गुहो कुमारो य ।
अमरा तियसा वंदारया य विबुहा सुरा देवा ॥ २२ ॥

अक्खंडलो सुरवई पुरंदरो वासवो सुणासीरो ।
रामो सीरी मुसलाउहो बलो कामपालो य ॥ २३ ॥

पेआहिवो कयंतो कीणासो अंतओ जमो कालो ।
वेसमणो निहिनाहो जक्खाहिवई कुबेरो य ॥ २४ ॥

अणिलो गंधवहो मारुओ समीरो पहंजणो पवणो ।
विणयसुओ खयराओ तक्खो पण्णयरिऊ गरुलो ॥ २५ ॥

उरओ अही भुअंगो भुअंगमो पण्णओ फणी भुअयो ।
हुंति दइच्चा दणुआ सुररिउणो दाणवा असुरा ॥ २६ ॥

अब्भाइं धूमजोणी बलाहया जलहरा य जीमूआ ।
खं अब्भं अंतरिक्खं वोमं नहं अंबरं गयणं ॥ २७ ॥

अंबु सलिलं वणं वारि नीरं उदयं दयं पयं तोयं ।
सरिआ तरंगिणी निण्णया नई आवया सिंधू ॥ २८ ॥

वसुहा वसुंधरा वसुमई मही मेइणी धरा धरिणी ।
अब्भपिसाओ राहू गहकल्लोलो विडप्पो य ॥ २९ ॥

ढयरा पुयाइणो पिप्पया परेया पिसल्लया भूआ ।
रयणियर-जाउहाणा कव्वाया कोणवा रक्खा ॥ ३० ॥

मंदाइणी सुरणई गंगा भागीरही य जण्हुसुआ ।
मेहा मई मणीसा विण्णाणं धी चिई बुद्धी ॥ ३१ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जइणो तवस्सिणो तावसा रिसी भिक्खुणो मुणी समणा ।
मंगलपाढय-मागह-चारण-वेआलिआ बंदी ॥ ३२ ॥

आसो सत्ती वाहो हओ तुरंगो तुरंगमो तुरओ ।
संगामो संजुअं आहवं रणं संगरं समरं ॥ ३३ ॥

रोलो रावो वयलो हलबोलो कलयलो वमालो य ।
सेणा वरूहिणी वाहिणी अणीअं चमू सिण्णं ॥ ३४ ॥

रोरे अकिंचणो दुव्विहो दरिद्दो य दुग्गओ निस्सो ।
सत्तू अरी अमित्तो रिऊ अराई य पडिवक्खो ॥ ३५ ॥

कणओ सिलीमुहो मग्गणो इसू सायओ सरो विसिहो ।
पक्का सहा समत्था य पक्कला पच्चला पोढा ॥ ३६ ॥

कोयंडं गंडीवं धम्मं धणुहं सरासणं चावं ।
खग्गं असी किवाणं करवालं मंडलग्गं च ॥ ३७ ॥

सिण्हा नीहारो धूमिआ य महिआ य धूममहिसी य ।
कल्लोलो उल्लोलो उम्मी वीई तरंगो य ॥ ३८ ॥

निलुप्पलं वियाणह कुवलयं इंदीवरं च कंदुट्टं ।
चंदुज्जयं तु कुमुअं गद्दहयं केरवं सप्फं ॥ ३९ ॥

धयरट्ठा कायंबा हंसा धवलसउणा मराला य ।
सउला सहरा मीणा तिमी झसा अणिमिसा मच्छा ॥ ४० ॥

सउणा खगा सउंता पत्तरहा अंडया विहंगा य ।
साणा भसणा इंदमहकामुआ मंडला कविला ॥ ४१ ॥

पियमाहवी परहुआ कलयंठी कोइला वणसवाई ।
मोरा सिही बरहिणो सिहंडिणो नीलकंठा य ॥ ४२ ॥

साहामओ बलिमुहो पवंगमो वाणरो कई पवओ ।
पंचाणणो मयारी मयाहिवो केसरी सीहो ॥ ४३ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

बलिउट्ठा रिट्ठा बुक्कणा य ढंका य कायला काया ।
इल्ली पुल्ली वग्घो सद्दूलो पुंडरीओ य ॥ ४४ ॥

नंदी तंबा बहुला गिट्ठी गोला य रोहिणी सुरही ।
एणी हरिणी कमला मयी कुरंगी य सारंगी ॥ ४५ ॥

गोसो रयणिविरामो गोसग्गो दिणमुहं च पच्चूसो ।
घम्मो तावो डाहो उम्हा उण्हं निरोहो य ॥ ४६ ॥

अंसू रस्सी पाया करा मऊहा गहत्थिणो किरणा ।
रयणी विहावरी सव्वरी निसा जामिणी राई ॥ ४७ ॥

आलोओ उज्जोओ दित्ती भासा पहा पयासो य ।
संतमसं अंधयारं धंतं तिमिरं तमिस्सं च ॥ ४८ ॥

भवणं घरं आवासो निलयो वसही निहेलणं अगारं ।
रित्थं दविणं दव्वं सारो वित्तं वसुं अत्थो ॥ ४९ ॥

सेलो अयलो अद्दी सिलोच्चयो महिहरो धरो सिहरी ।
हेमं कणयं चामीअरं पसिंडि च तवणिज्जं ॥ ५० ॥

वाणी वाया भणिई सरस्सई भारई गिरा भासा ।
आयंको आयल्लो वाही तह आमयो रोओ ॥ ५१ ॥

मग्गो पंथो सरणी अद्धाणं वत्तिणी पहो पयवी ।
उत्तंसो अवयंसो कण्णेली कण्णऊरो य ॥ ५२ ॥

दुरिअं कलुसं दुक्कयं अहं अहम्मो य कम्मसं पावं ।
मिच्छा मोहं विहलं अलिअं असच्चं असब्भूअं ॥ ५३ ॥

साही विडवी वच्छो महीरुहो पायवो दुमो य तरु ।
कुंचल कुंपल कोरय छारय कलिआउ मउलं ति ॥ ५४ ॥

अवलेओऽहंकारो मओ मरट्टो मडप्फरो दप्पो ।
उप्पेहडं उड्डामरं उब्भडं आडंबरिल्लं च ॥ ५५ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अहिसारिआ अडयणा य पंसुली छिंछई य दुस्सीला ।
जाया पत्ती दारा घरिणी भज्जा पुरंधी य ॥ ५६ ॥

कबरी कुंतलहारो धम्मिल्लो केसहत्थओ मउडो ।
चूला सिहा सिहंडो सिहलिआ छिंडओ चडओ ॥ ५७ ॥

डहरो डिंभो चुल्लो सिसू सिलंबो य अब्भओ पोओ ।
चेडी दिल्लिदिलिआ य दुद्धगंधिअमुही बाला ॥ ५८ ॥

मुत्ती गत्तं बुंदी संघयणं विग्गहो तणू काओ ।
दुइओ बिइज्जओ अणुअरो सहाओ सहयरो य ॥ ५९ ॥

चउरा निउणा कुसला छेआ विउसा बुहा य पत्तट्ठा ।
मणुआ नरा मणुस्सा मच्चा तह माणवा पुरिसा ॥ ६० ॥

वच्छीउत्तं जाणह य चंडिलं ण्हाविअं च रत्तीअं ।
रमणो कंतो पणई पाणसमो पिययमो दइओ ॥ ६१ ॥

विच्छड्डो समिद्धी रिद्धी विहवो सिरी य संपत्ती ।
जुअलो जुआ जुआणो पुअंडओ वोद्रहो तरुणो ॥ ६२ ॥

विवरं कुहरं रंधं कुच्छिल्लं अंतरं कुडिल्लं च ।
ओली माला राई रिंछोली आवली पंती ॥ ६३ ॥

मइरेअं महुवारो सीहू सरओ महुं अवक्करसो ।
कायंबरी पसण्णा हाला तह वारुणी मइरा ॥ ६४ ॥

घोरा दारुण-भासुर-भइरव-लल्लक्क-भीम-भीसणया ।
दुस्सिक्खिअ-दुच्चंडिअ दुल्ललिआ दुव्विअड्ढा य ॥ ६५ ॥

वाउल्लो जंबुल्लो मुहुलो बहुजंपिरो य वायालो ।
वुत्तंतो य उअंतो वत्ता य पउत्ति-नामाइं ॥ ६६ ॥

कालो वेला समओ पत्थाओ अंतरं अवसरो य ।
इहइं संपइ इण्हिं इत्ताहे संपयं दाणिं ॥ ६७ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चिंधाइं वेजयंतीओ पडाया केउणो धया हुड्डुमा ।
कुप्पासो कंचुअयो गिंधुल्लो वारवाणो य ॥ ६८ ॥

जाण सिचयं कडिल्लं निअंसणं साहुली य परिहणयं ।
चेलं वासं वसणं च अंसुअं अंबरं वत्थं ॥ ६९ ॥

हेला ललिअं लीला बिब्बोओ विब्भमो विलासो य ।
ईहा इच्छा वंछा सद्धा कामो य आसंसा ॥ ७० ॥

बाला मूढा मंदा अयाणया बालिसा जडा मुक्खा ।
पामर गहवइ सेआल कासया दोणया हलिआ ॥ ७१ ॥

पोरच्छो पिसुणो मच्छरी खलो मुहुमुहो य उप्फालो ।
कलमो कुसुमालो तक्करो य पाडच्चरो थेणो ॥ ७२ ॥

निद्धंधसा निसंसा निच्चुड्डा निक्किवा अकरुणा य ।
रुंदा पीणा थूला य मंसला पीवरा थोरा ॥ ७३ ॥

सरिसो समो सरिच्छो संकासो सच्छहो समाणो य ।
कढिणा य कक्कसा निट्ठुरा खरा खप्पुरा फरुसा ॥ ७४ ॥

उत्ताणा उत्तणुआ थिण्णा थड्ढा य गव्विआ दरिआ ।
लोला लालस लोलुअ-उल्लेहड-लंपडा लुद्धा ॥ ७५ ॥

सण्णं किण्णं सुठिअं उव्वायं नीसहं किलंतं च ।
आइग्गं उव्विग्गं उच्चेयं वुण्णं उत्तत्थं ॥ ७६ ॥

घडिअं विणिम्मिअं विहिअं आहिअं विरइअं कयं जणिअं ।
घत्थं कवलिअं असिअं विलुंपिअं वंफिअं खइअं ॥ ७७ ॥

सच्चविअ-दिट्ठ-पुलइअ-निअच्छिआइं निहालिअ-ऽत्थम्मि ।
पव्वालिअं आउंबालिअं च सलिलुच्छयं जाण ॥ ७८ ॥

रोमंचिअं आरेइअं ऊसलिअं पुलइअं च कंटइअं ।
पामुक्कं विच्छड्डिअं अवहत्थिअं उज्झिअं चत्तं ॥ ७९ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

निट्टुइअं खिरिअं छिप्पिअं च नीसंदिअं च पज्झरिअं ।
वेअडिअं पज्झुत्तं खचिअं विच्छुरिअयं जडिअं ॥ ८० ॥

वोलीणं वुक्कंतं अइच्छिअं वोलिअं अइक्कंतं ।
पडिहत्थं उद्धुमायं अहिरेमइअं च अप्फुण्णं ॥ ८१ ॥

हक्खुत्तं उच्छूढं उक्खित्त-उप्पाडिआइं उद्धरिअं ।
कोवासिअं विअसिअं विणिद्दं उम्मिल्लं उप्फुल्लं ॥ ८२ ॥

वज्जरिअ-सिद्ध-सूइअ-उप्फालिअ-पिसुणिआइं साहिअयं ।
पव्वायं वसुआयं सुसिअं वायं मिलाण-ऽत्थे ॥ ८३ ॥

विच्छूढं उच्छित्तं पणुल्लिअं पिल्लिअं गलत्थिअयं ।
पेढाल-निअक्कल वट्टुलाइं परिमंडल-ऽत्थम्मि ॥ ८४ ॥

टिविडिक्किअ-चिंचिल्लिअ-चिंचइअ-पसाहिआइं मंडिअयं ।
आलुंखिअं आलिद्धं छिक्कं छित्तं परामुसिअं ॥ ८५ ॥

सामग्गिअं अवयासिअं आलिंगिअयं उवऊढं ओसत्तं ।
अग्घइ छज्जइ रेहइ विरायए सोहए सहइ ॥ ८६ ॥

सइ अविरयं अविरामं अणुवलं संतयं सया निच्चं ।
छायं छउअं लयणं तणुअं तलिणं किसं खामं ॥ ८७ ॥

ललिअं वग्गुं मंजुं मंजुलयं पेसलं कलं महुरं ।
कोमलयं सुहफंसं सोमालं पेलवं मउ य ॥ ८८ ॥

वियडं विउलं पिहुलं वित्थिण्णं वित्थयं उरु विसालं ।
खउरिअं उच्चिंवलयं पट्टुहिअं जाण कलुसजलं ॥ ८९ ॥

गाढं बाढं बलियं धणियं दढं अइसएण अच्चत्थं ।
सइदंसणं सइसुहं चिंतादिट्ठम्मि सइलंभं ॥ ९० ॥

अब्भासं अब्भणणं आसण्णं सविहं अंतिअं निअडं ।
कलिअं विइअं विण्णायं अहिगयं बुज्झिअं मुणिअं ॥ ९१ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सामलं असिअं सामं कालं कसिणं सिएअरं कण्हं ।
सेअं सिअं वलक्खं अवदायं पंडु धवलं च ॥ ९२ ॥

कविलं कविसं पिंगं पिसंगयं पिंगयं कडारं च ।
अरुणं सोणं रत्तं पाडलं आयंबिरं तंबं ॥ ९३ ॥

फसलं सबलं सारं किम्मीरं चित्तलं च बोगिल्लं ।
इतो नामग्गामं गाहाचलणेसु चिंतेमि ॥ ९४ ॥

अमरावई सुरपुरी, तिविट्ठयं तह सुरालओ नाओ ।
अलया कुबेरनयरी, तित्थाहिवई जिणो अरहा ॥ ९५ ॥

कमला सिरी य लच्छी, हेरंबो गयमुहो गणाहिवई ।
रिक्खं उडु नक्खत्तं, पुण्णयणा गुज्झया जक्खा ॥ ९६ ॥

नंदणं अमरुज्जाणं, कणयगिरी सुरगिरी सुमेरू य ।
फलिहगिरी कइलासो, बिहस्सई सुरगुरू धिसणो ॥ ९७ ॥

वासवसुओ जयंतो, पुलोमतणया सई य इंदाणी ।
अइरावणो सुरगओ, विज्जू सोआमणी य तडी ॥ ९८ ॥

असणी वज्जं कुलिसं, सुराउहं तिअसचावं इंदधणुं ।
अंगारओ य भोमो, उसणो सुक्को दइच्चगुरू ॥ ९९ ॥

भुअणं जयं च लोओ, नरणाहो पत्थिवो निवो राया ।
मित्तो सही वयंसो, मंती सइवो अमच्चो य ॥ १०० ॥

अंतेवासी सीसो, छलओ छप्पण्णओ छइल्लो य ।
अड्ढा इब्भा धणिणो, बंधू सयणो सणाही य ॥ १०१ ॥

विप्पो दिओ दिआई य, अंगया नंदणा सुआ तणया ।
अहिआओ कुलजाओ, अणुजीवी सेवओ भिच्चो ॥ १०२ ॥

नीसामण्णा गरुआ, अहमा इयरा य पायया नीआ ।
रहयारा वट्ढइणो, वच्छीवा वच्छवाला य ॥ १०३ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सासाइं छत्तधण्णाइं, गामणी भोइओ य गामवई ।
कुंभारो य कुलालो, गोवाला वल्लवा गोवा ॥ १०४ ॥

आवणिआ वाणिअया, मायंगा तह जणंगमा पाणा ।
पाउग्गिओ य सहिओ, केवट्टो धीवरो दासो ॥ १०५ ॥

बंदीओ करमरिओ, पुप्फच्चिणिआओ पुप्फलाईओ ।
थंभो थेवो बिंदू, खव्वो हस्सो य वामणओ ॥ १०६ ॥

रोअणिआ लामाओ य, मूओ मूअल्लिओ य तुण्हिक्को ।
वयपरिणामो य जरा, थेरी जरई गयवया य ॥ १०७ ॥

सोवणयं रइमंदिरं, आली तह माउआ सही अत्ता ।
परयत्तो परछंदो, विक्खाओ विस्सुओ पयडो ॥ १०८ ॥

नक्खा नहा कररुहा, केसा चिहुरा सिरोरुहा वाला ।
चलणा कमा य पाया, पयोहरा तह थणा सिहिणा ॥ १०९ ॥

पाणी हत्था य करा, कत्ती चम्मं अइणं छवी खल्ला ।
दसणा रयणा दंता, सिरोहरा कंधरा गीवा ॥ ११० ॥

वयणं मुहं च आणणं, अच्छी नयणं च लोअणं नित्तं ।
नासा घाणं घोणा, सीसं सिरं उत्तमंगं च ॥ १११ ॥

भालं अलिअं निडालं, मंलू खड्डु च मासुरी कुच्चं ।
उअरं जठरं तुंदं, बप्फं बाहो य नयणजलं ॥ ११२ ॥

इंदियं अक्खं करणं, छाया कंती छवी य लायण्णं ।
पिसिअं सुल्लं मंसं, कीलालं सोणिअं रुहिरं ॥ ११३ ॥

खुंखुणओ नक्कसिरा, वच्चं विट्ठा पुरीसं उच्चारो ।
लंछणं अंको चिंधं, घम्मजलं समजलं सेओ ॥ ११४ ॥

रमणं तियं निअंबो, कच्छा कंची य मेहला रसणा ।
मुत्तावली य हारो, मउली मउडो किरीडो य ॥ ११५ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नीरंगी अंगुट्ठी, आहरणं-भूसणं अलंकारो ।
विण्णासो विच्छित्ती, कण्णायंसो य तलवत्तं ॥ ११६ ॥

तलिमं तप्पं सयणं, च अंगराओ विलेवणं चच्चा ।
बाउल्ली पुत्तलिआ, विवणी तह आवणो हट्टो ॥ ११७ ॥

छत्ताइं आवत्ताइं, हंसयं नेउरं च मंजीरं ।
भद्दासणाइं सीहासणाइं, उवहाणं ऊसीसं ॥ ११८ ॥

वायायणो गवक्खो, अद्दाओ दप्पणो य आयरिसो ।
वेरुलिओ वेडुज्जो, कलहोअं रुप्पयं रययं ॥ ११९ ॥

सोवीरं आरनालं, नेहो पिम्मं रसो य अणुराओ ।
पीढं विट्ठरं आसणं, अहिरोहणिआ य निस्सेणी ॥ १२० ॥

सीरं हलं च नंगलं, आउहं अत्थं च पहरणं होइ ।
माढी कवयं उरत्थयं, असिमुट्ठी पालिआ य छरू ॥ १२१ ॥

चक्काइं रहंगाइं, सित्थं जीवा गुणो पडंचा य ।
तलिमं पट्टं च तलं, विवंचिआ वल्लई वीणा ॥ १२२ ॥

छीरं पयं च दुद्धं, सिसिरं दहिअं चिरट्ठिहिल्लं च
अज्जं सप्पिं च घयं, अमयं च सुहा य पीऊसं ॥ १२३ ॥

पारावओ कवोओ, चडओ घरघंटओ य कलविंको ।
चिल्ला घारी सउणी, भिंगारी झिल्लिआ चीरी ॥ १२४ ॥

चक्कायओ रहंगो, कयवाओ कुक्कुडो य तंबसिहो ।
वरलाओ हंसीओ, कणइल्लो पूसओ कीरो ॥ १२५ ॥

गहरो वओ अ गिद्धो, सारंगी चायओ च बप्पीहो ।
पिच्छाइं पेहुणाइं, नीडं निड्डं कुलायं च ॥ १२६ ॥

कोलो किडी वराहो, भुल्लुंकि य भसुआ महासद्दा ।
कलहो बालो हत्थी, करेणुआ गयवहू करिणी ॥ १२७ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

करिमयरो जलहत्थी, कडुयाला कुंबरा य लहुमच्छा ।
रिच्छो य अच्छहल्लो, लंगूलं वालही छिप्पं ॥ १२८ ॥

तालूरो आवत्तो, कुलीर-कुरुविल्लया य कक्कडया ।
उग्गालो छिंछोली, जंबालो खंजणो पंको ॥ १२९ ॥

अयडो अडो य कूवो, मेअलकण्णा य नम्मया रेवा ।
पल्ललं अखायतल्लं, पुक्खरिणी दीहिआ सरसी ॥ १३० ॥

रोहो वप्पो य तडो, सालूरा दद्दुरा य मंडुक्का ।
अरहट्टो घडिजंतं, केआरो वप्पिणं वप्पो ॥ १३१ ॥

नारुट्टो कूसारो, ओहारा कमढ-कच्छहा कुम्मा ।
गोआवरी य गोला, डिंडीरो पुप्फओ फेणो ॥ १३२ ॥

उवलो गावो य सिला, तूहं तित्थं नईए उत्तारो ।
तण्हा तिसा पिवासा, गुहिरं अगाहं च गंभीरम् ॥ १३३ ॥

विरया तणुसरिआओ, सेवालो सेवलं च जंबालो ।
दोणीयो कुट्टिंबा, कोटुंभो जलकरप्फालो ॥ १३४ ॥

जाला अच्चीओ सिंहाउ, अद्धरा सत्ततंतुणो जण्णा ।
पाया कडया साणू, कंतारं काणणं रण्णं ॥ १३५ ॥

सिंगं सिहरं कूडं, साला साहा य साहुली डाला ।
कणई लयणी य लया, कुसुमं पसवं पसूअं च ॥ १३६ ॥

कुसुमरओ मयरंदो, रेणू पंसू रओ पराओ य ।
कोसी समी य सिंबा, दलं पलासं छयं पत्तं । ॥ १३७ ॥

छल्ली तया चुडुप्पं, किसलयाइं पल्लवा पवाला य ।
तिंगिच्छी कमलरओ, मलओ उज्जाणं आरामो । ॥ १३८ ॥

जलहरणं आलवालं, तोमरिगुंडी य मंजरीगुंडी ।
वल्लीउ वल्लरीओ, थवया गुच्छा गुलुच्छा य ॥ १३९ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पत्तसमिद्धं पत्तलं, आमेला चुब्भला य सेहरया।
मल्लं माला दाम, सद्दालं सिंजिरं कणिरं ॥ १४० ॥

उम्मालो निम्मल्लं, गुविलं कलिलं च वल्लरं गहणं।
दावो दवो वणग्गी, खंधग्गी खोडपज्जाली ॥ १४१ ॥

वल्लरं अरण्णछित्तं, गुट्ठं तह गोउलं वओ घोसो।
छिप्पीरं च पलालं, छलं अवएसो निहं च मिसं ॥ १४२ ॥

थूणा दिअली वेली, टंकछिण्णं झसं च छिण्णयडं।
पक्कं पिक्कं परिणयं, इक्खू उच्छू य उच्छुवणं ॥ १४३ ॥

वंसो वेणू वेलू य, वंजुलो वेडसो य वाणीरो।
तह जासुअणो य जवा, फलिणी पियमा पियंगू य ॥ १४४ ॥

सिंदोलं खज्जूरं, अंबा मायंद - चूअ-सहयारा।
तरवट्टो पामाडो, अंबिलिआ चिंचिणी चिंचा ॥ १४५ ॥

कोहलिआ कोहंडी, बरुओ सामुंडुओ भमासो य।
हयमारो कणवीरो, सुलसा तह मंजुआ तुलसी ॥ १४६ ॥

मयणाही कत्थूरी, मलयरुहं चंदणं च इक्कंगं।
घणसारो कप्पूरो, आमोओ परिमलो गंधो ॥ १४७ ॥

बिंबवयं भल्लायं, पोअइआ य वयली मयाली य।
कंटुल्लं कंकोडं, मालूरं सिरिहलं बिल्लं ॥ १४८ ॥

अमिलाणो कोरंटो, नलयं लामंजयं उसीरं च।
पुण्णाओ सुरवण्णी, भिसिणी नलिणी कमलिणी य ॥ १४९ ॥

सुरगोवो इंदोवो, कोलिअया उण्णनाह-मक्कडया।
मज्जारीओ बिरालीओ, रासहो गद्दहो य खरो ॥ १५० ॥

भीओ फडा फण ऽत्थे, कुंदुल्लुआ कोसिआ उलूआ य।
रोमंथो उग्गालो, उक्खा वसहा य वच्छाणा ॥ १५१ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जंतू सत्ता भूआ य, कोल्हुआ जंबुआ य गोमाऊ ।
उडवो तावसगेहं, गामहणं खेडयं पद्दं ॥ १५२ ॥

दुद्दोली दुव्वाली य, फुंफमा कोउआ करीसग्गी ।
पत्थारी सत्थरओ, लेद्दुक्को लेड्डुओ लेड्डू ॥ १५३ ॥

वारिज्जयं विवाहो, तग्गयमण-तप्परा य तल्लिच्छा ।
तुप्पाइं कोउआइं, पईव-पच्चत्थिणो वामा ॥ १५४ ॥

दलिअं दारुं कट्ठं, पत्थयणं संबलं च पाहिज्जं ।
भावो वत्थु पयत्थो, खुज्जं कुडिया कुडिल्लं च ॥ १५५ ॥

इंदमहो कोमारो, कोउअ-कुड्डाइं कोउहल्लम्मि ।
सुरही महु वसंतो, वासारत्तो य घणसमओ ॥ १५६ ॥

माया कवडं कइअवं, अहा दिणा वासरा दिआ दिअहा ।
तुहिणं हिमं तुसारं, घणनिवहो कालिआ महिआ ॥ १५७ ॥

कुणवं सवं च मडयं, पेअवणं पिउवणं मसाणं च ।
इंगालो अंगारो, खायं तह खाइआ परिहा ॥ १५८ ॥

ओवाइअं नवसिअं, विग्घा पच्चूहं अंतराया य ।
वेयल्लं असामत्थं, सुहं आणंदो सुहेल्ली य ॥ १५९ ॥

उग्घाओ आरंभो, संखेवो संगहो समासो य ।
निच्चं निअयं सासयं, अव्वाहारो अणालवओ ॥ १६० ॥

वावडया अक्खणिआ, सण्णा गुत्तं च नामं अहिहाणं ।
अत्ती विअणा पीडा, संरंभो अमरिसो मण्णू ॥ १६१ ॥

मुल्लाइं वेअणाइं, पच्चग्गं अहिणवं च सज्जुक्कं ।
आवायो पमुहं उरो, हेला य अणायरो रीढा ॥ १६२ ॥

जाण करंबं तोत्तडिं, अवरत्तयं अणुसयं च अणुतावं ।
कूरं चंडं ओअणं, ओणयं ओयत्तं ओमत्थं ॥ १६३ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

थामं सारं च बलं, थेवं लेसो लवो कला मत्ता।
सारिच्छं समसीसी, अदिही अरई य रणरणओ ॥ १६४ ॥

इत्तोप्पं एअप्पभिइ, संभमो आयरो पयत्तो य।
मंतुं विलियं विप्पियं, अच्छरियं अब्भुअं चुज्जं ॥ १६५ ॥

दीहत्तणं आयामो, चवलं चडुलं च चंचलं तरलं।
एमेय मुहा मुहिआ, केलो नम्मं च परिहासो ॥ १६६ ॥

पलयो निहणं नासो, पुण्णं सुकयं च भागहेयं च।
हित्थं विलियं लज्जिअं, अत्थाणी तह सहा परिसा ॥ १६७ ॥

उण्णाहो उस्सेहो, विक्खंभो वित्थरो य परिणाहो।
परिरंभणं अवरुंडणं, आमोओ पहरिसो तोसो ॥ १६८ ॥

नट्टं लासं तंडवं, अणुपुव्वि-परंपराउ परिवाडी।
आरक्खो पुरक्खो, अब्भाओ गुणणिआ जुग्गो ॥ १६९ ॥

अवहिअं इक्कग्गमणं, तद्दिअसिअ-दिअसिआइं अणुदिअहं।
ओलुग्गो नित्थामो, दुज्जायं आवया वसणं ॥ १७० ॥

छुट्टं मडहं लहुअं, रप्फा वम्मीअ-वामलूरा य।
पायालं च रसायलं, आउलं आहित्थं उप्पित्थं ॥ १७१ ॥

वेसाहो मंथाणो, सीलुट्टं चिब्भिडं च वालुंकं।
कुंभो कुडो य कलसो, पिढरो ढमरो य कोलंबो ॥ १७२ ॥

कुडिलं वंकं भंगुरं, आएसो सासणं च निद्देसो।
खिप्पं तुरिअं सिग्घं, छेआ पेरंत-अद्धंता ॥ १७३ ॥

दीहं दीहरं आययं, अहिउत्तो उज्जओ य उज्जुत्तो।
कल्लो सत्थो य पड्डू, हढो य मड्डा बलामोडी ॥ १७४ ॥

पउणं निरायं उज्जुयं, ओलइअं परिहिअं पिणद्धं च।
अवरिल्लं उत्तरिज्जं, उअट्टी उच्चओ नीवी ॥ १७५ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दुद्धिअं अलाबु तुंबं, निबंधणं कारणं निआणं च ।
विलओ सूरत्थमणं, संखोहो संभमो तासो ॥ १७६ ॥

उल्लूरिअं उक्कडिअं, जिंघिअं ओसिंघिअं च अग्घायं ।
निव्विट्ठं उवहुत्तं, तिरोहिअं पिहिअं अंतरिअं ॥ १७७ ॥

उद्दालिअं अच्छिण्णं, अक्खित्तं अंछिअं च कट्ढिअयं ।
पण्णाडिअयं परिहट्टिअं, च ओसरिअं ओसक्कं ॥ १७८ ॥

उत्थल्लिअं उच्छलिअं, पच्छाइअ-नूमिआइं वइआइं ।
निद्धाडिअयं नीणिअं, ओहीरंतं च सीअंतं ॥ १७९ ॥

उण्णालिअं उण्णामिअं, उवगयं उवसप्पिअं च अल्लीणं ।
चुण्णइअं चुण्णाहयं, उच्चिडिमं मुक्कमज्जायं ॥ १८० ॥

उद्धंकयं ऊसविअं, फुडिअं फुलिअं च दलिअं उद्धरिअं ।
संवेल्लिअं मउलिअं, परिहायं दुब्बलं झीणं ॥ १८१ ॥

मुसुमूरिअयं चुण्णिअं, उड्डिहिअ-उक्खोडिआइं उक्खित्तं ।
मुरुमुरिअं रूरुइअं, उण्णुइअं भुक्किअं जाण ॥ १८२ ॥

अवचिअं उच्चिणिअ-ऽत्थे, तडिअं तड्डविअयं विरल्लिअयं ।
उव्वमिअं उग्गिलिअं, छुहाइअं भुक्खिअं छायं ॥ १८३ ॥

ताडिअं आओडिअयं, निसुअं आयण्णिअं निसामिअयं ।
पज्जत्तं च पहुत्तं, पणामिअं दिण्णं उवणीअं ॥ १८४ ॥

संदिद्धं संसइअं, घोलिअ-ढुंढुल्लिआइं भमिअ-ऽत्थे ।
संदिट्ठं अप्पाहिअं, उल्लं तित्तं च तण्णायं ॥ १८५ ॥

रंखोलिरं पहोलिरं, उव्वेल्लं पसरिअं पयल्लं च ।
संकोडिअं निउंचिअं, उत्तेजिअयं च तोरविअं ॥ १८६ ॥

ऊसित्तं ओलित्तं, पयारिअं वंचिअं च वेलविअं ।
उब्भालिअं उप्पुणिअं, लहुइअं ओहामिअं तुलिअं ॥ १८७ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पडिवण्णं अब्भुवगयं, चिद्दविअं विउडिअं विणासिअयं ।
अइसइअं च विसेसिअं, उम्मुट्टं पुंछिअं फुसिअं ॥ १८८ ॥

विक्खित्तयं पइण्णं, खित्तं निग्घत्तिअं च आइद्धं ।
उग्गाहिअं उच्चालिअं, अंकुसइअं अंकुसायारं ॥ १८९ ॥

आवडिअं अब्भिडिअं, अहिड्डुयं पीडिअं परद्धं च ।
पम्हुट्टं विम्हरिअं, चुलुचुलिअं फंदिअं फुरिअं ॥ १९० ॥

भट्टं फिडिअं चुक्कं, परिहूअं अहिलिअं पराहूअं ।
परिदेविअं विलविअं, विरोलिअं मंथिअं महिअं ॥ १९१ ॥

धंसाडिअं विमुक्कं, गुंडिअं उद्धूलिअं च धूसरिअं ।
अक्कोसिअं च सविअं, भरिउल्लट्टं च वोसट्टं ॥ १९२ ॥

ओइण्णं ओअरिअं, गविट्टं अण्णेसिअं विमग्गिअयं ।
रेअविअं सुण्णइअं, निमिअं निहिअं च निक्खित्तं ॥ १९३ ॥

भरिअं लढिअं सुमरिअं, ओसद्धं पाडिअं निसुद्धं च ।
निसुढिअं अक्कंतभरोणयं, उब्भडवेसं च उव्विव्वं ॥ १९४ ॥

समुहागयं ओसरिअं, बिंदुइअं कणइअं कणायण्णं ।
विरमालिअं विहीरिअं, ओरालिअयं च मालिअयं ॥ १९५ ॥

तणुईकयं उल्लिहिअं, कप्परिअं दारिअं च निब्भिण्णं ।
उड्डीणं उप्पइअं, जुरिअं उत्तम्मिअं नडिअं ॥ १९६ ॥

नीहरिअं निग्गिण्णं, बद्धं संदाणिअं निअलिअं च ।
ऊअट्टं वासहयं, महमहिअं निग्गयामोअं ॥ १९७ ॥

गुम्मइअं संमूढं, फालिअं ओरंपिअं च ओरत्तं ।
कज्जलइअं कसणिअं, कयपरिवेसं परिक्खित्तं ॥ १९८ ॥

वेढिअयं परिआलिअं, उत्थरिअ- ओवग्गिआइं अक्कंतं
परिलीणं च निलीणं, गंधुग्गिरणम्मि निम्महिअं ॥ १९९ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

निव्वडिअं निम्मायं, दाविअयं दंसिअं च दक्खविअं ।
तिक्खालिअं निसाअं, पुल्लुट्ठयं पउलिअं दड्ढं ॥ २०० ॥

पल्हत्थिअं उल्लंडिअं, उच्छुण्णं मद्दिअं च निद्दलिअं ।
पेसविअं पट्ठविअं, घडिअं लग्गं च संसत्तं ॥ २०१ ॥

पयलाइ ओहीरइ, सक्कइ चयइ य तरेइ पारेइ ।
अव्वोछिण्णं वुच्छं संपइ इक्किक्कं अहिहाणं ॥ २०२ ॥

करडा कुंजरगंडा, आलाणो हत्थिबंधणक्खंभो ।
करिबंधणं अक्खायं उवओ, वारणमओ दाणं ॥ २०३ ॥

रवं अलसं कलमंजुलं, ओरल्लिं महुरदीहरं जाण ।
सुइविरसं गद्दब्भं च गग्गरं कंठदरखलिअं ॥ २०४ ॥

ओऊलं पालंबं, हरिअंदणं अमरचंदणं जाण ।
जच्चतुरंगं भायलं, आयावलयं अरुणतावं ॥ २०५ ॥

सीमंतिअं दुहाविअं, अपच्छिमं चरमं, उद्धुरं उच्चं ।
वायणयं च पहेणयं, इंगाली उच्छुगंडीरी ॥ २०६ ॥

विसढं विसमं, विअलिअं उच्चत्तं, कत्तिया–आसिणा सरओ ।
सिसिरो फग्गुण–माहो, हेमंतो पोस–मग्गसिरो ॥ २०७ ॥

दुप्परियल्लं असक्कं, पुक्काओ अलिअपोरुसालावा ।
पुंजायं पिंडलइअं उऊ रिऊ, चोत्तओ तोत्तो ॥ २०८ ॥

उवयारो पुप्फबली कुसुमं कालिंजणीए ताविच्छं ।
जवसं गवित्तं उलवी वीरणं ओलावओ सेणो ॥ २०९ ॥

अग्गक्खंधो अणिअं पाडुच्ची तुरयदेहपिंजरणं ।
गरलं विसं विसाणं सिंगं रज्जू वरत्ता य ॥ २१० ॥

जगलं पिंगलसरओ बिंटसुरा पिट्ठखउरिआ मइरा ।
हिज्जो कल्लं निव्वं पडलं काहिल्लिआ तवओ ॥ २११ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अणुरोहो दक्खिण्णं लग्गणओ पडिहुओ दरं अद्धं ।
हीरइ जं आणंदे वत्थं तं पुण्णवत्तं त्ति ॥ २१२ ॥

संजविअं संगोविअं अणुहूअं माणिअं सुई वेओ ।
पासायस्सोवरि जा साला सा चंदसाल त्ति ॥ २१३ ॥

निब्भरं अइसयभरिअं पत्थरिअं अत्थुअं छडा छंटा ।
रोसेणं उण्हिक्कं वयणं जं तं थुडंकिअयं ॥ २१४ ॥

साहिज्जं अत्थारो हिरिबेरो वालओ भिसी सारी ।
जं पिच्छइ तं वंछइ जो सो जंपिच्छओ भणिओ ॥ २१५ ॥

पच्चाएसं दिट्ठंतं ओज्झरं निज्झरं दुहं दुक्खं ।
कयगंठि थणोवरि विरइअंसुअं गिंधुअं जाण ॥ २१६ ॥

पडिमा पडिबिंबं कज्जवो कयवरो विआणं उल्लोओ ।
उभओ वासुत्थल्लणं उच्चत्तवरत्तयं भणिअं ॥ २१७ ॥

रिक्कं रित्तं पत्ताइं भायणाइं सिरिद्दहो पविआ ।
मुहविक्कोणो छिच्चोल्लउ त्ति जो निंदणत्थम्मि ॥ २१८ ॥

दिट्ठि विहाविअं मिंढिआओ अविलाओ सेरिही महिसी ।
परिपासउ त्ति छेत्ते जो पुरिसो सुअइ राईए ॥ २१९ ॥

घुसिणं कुंकुमं उक्का चुडुली खाणी खणी कुढं कूवं ।
उच्छंटउ त्ति तुरिअयरचोरिआहत्थवावारो ॥ २२० ॥

बद्धं संगिल्लं तणुरुहाइं रोमाइं चित्तओ दीवी ।
हुत्तवयं जस्संते सुव्वइ तं तस्स सुमुह त्ति ॥ २२१ ॥

कूलं तीरं असोओ कंकेल्ली रंजणो अलिंजरओ ।
खुण्णं च मढिअं ऊढा परिणीआ मिहुणयं जुअलं ॥ २२२ ॥

उअ पिच्छ धरइ जीवइ-दुच्चं दूअत्तणं दिसा आसा ।
संखायं थीणं संदणो रहो-सारही सूओ ॥ २२३ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रोसाणिअं मसिणिअं वणं पहारो पयामं अणुपुव्वं ।
लंचा उक्कोडा सारहं महुं बाहिरं बाहिं ॥ २२४ ॥

वुत्थो वसिओ वत्थी अवाणं आहोरणो गयारोहो ।
खत्तं खण्णं साहू सुअणो खेआलुओ असहो ॥ २२५ ॥

लहुदारु किलिंचं मंथरा कुसुंभी तुरंगिआ वडवा ।
संखो कंबू गेयं गंधव्वं बंधणं बिंटं ॥ २२६ ॥

सीमा मेरा वासं वुट्ठी हालाहलो य बंभणिआ ।
कारू सिप्पी करहो कमेलओ रोहिओ रोज्झो ॥ २२७ ॥

केऊरं अंगयं विद्दुमं पवालं कणेड्डिआ गुंजा ।
झाडं कुडंगओ कलुसं आविलं सित्थयं मयणं ॥ २२८ ॥

बुक्का मुट्ठी सग्गहं उवरत्तं लोट्टयं सुवंतं च ।
परतीरं पारं अट्टयकल्लि जाण कडिखंभं ॥ २२९ ॥

लोहं कालायसं उम्मुअं अलायं विसेसओ तिलओ ।
कोणो लउडो जउणा कालिंदी गज्जिअं थणिअं ॥ २३० ॥

दुव्वा हरिआली कोट्ठओ कुसूलो कडुच्छुओ दव्वी ।
भे तुब्भे कुल्लडयं कोडयं अप्पुल्लयं निअयं ॥ २३१ ॥

डोला पिंखा मायण्हिआ झला पाउसागमो झंझा ।
दुट्ठो कली पयंगो सलहो कलहाइअं रडिअं ॥ २३२ ॥

साहरिअं साहट्टिअं अंसो भाओ पिहाणिआ मंडी ।
तारं दित्तं वेसो नेवत्थं मक्खिअं तुप्पं ॥ २३३ ॥

जाण कडक्खं अवंगं कलहं परिवारं उब्भयं उद्धं ।
सायं पओसं उत्तप्पं उद्धयं दूसहं तिव्वं ॥ २३४ ॥

दाराइं दुवाराइं नेलच्छो पंडओ जडं सिसिरं ।
कोडी अग्गं पंगू पंगुलओ तण्णओ वच्छो ॥ २३५ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

छाया छाही पाहुडं उवायणं सारिया सालहिआ य ।
भद्दं सिवं सयज्झो समोसिओ छिंपओ उंछो ॥ २३६ ॥

सालो पायारो मज्जिआ रसालाउ सोज्झओ रयओ ।
हरिअं सद्दलं अंको उच्छंगो अक्खयं अणहं ॥ २३७ ॥

मणयं ईसि कुविंदो य तंतुवाओ दुरोअरं जूअं ।
पज्जा अहिआरो अइरं अंगणं मज्जिअं ण्हायं ॥ २३८ ॥

आसत्थो वीसंतो वज्जो बद्धो पयट्टयं चलिअं ।
करणी रूवं चलिअं वइकलिअं परिसरो पासा ॥ २३९ ॥

आरद्धं आढत्तं निहयं निक्खयं अवेसिणो फलिहा ।
फरिसो-फंसो तुमुलं मुहलरवो पायसो खीरी ॥ २४० ॥

उम्मलणं उच्चलणं इहरा अण्णह सहासओ सब्भो ।
चित्तं माणसं अक्खो बहेडओ संगमो मेलो ॥ २४१ ॥

समओ मयं विरायं विलीणं उप्पाहलं च उक्कंठा ।
संचारी दूई सालिरक्खिआ कलमगोवि त्ति ॥ २४२ ॥

रुग्गं भग्गं मंगुलं असुंदरं वेविअं च थरहरिअं ।
पप्फोडिअं च पक्खोडिअं विसट्टं विहडिअ-अत्थे ॥ २४३ ॥

परिहत्थो दच्छो कोवणो असहणो पईवओ दीवो ।
इअ एवं रेसणिआ करोडिआ चंदिमा जुण्हा ॥ २४४ ॥

पाडिक्कं पत्तेअं उंबरओ देहली विही दिव्वं ।
तंतू गुणो दुगंछा गरिहा खलिअं पडिप्फलिअं ॥ २४५ ॥

आसारो रयवुट्ठी पम्हलयं रोमसं जओ वेओ ।
कीस किणो हलहलओ तरा विअट्टं विसंवइअं ॥ २४६ ॥

संबाहं संकिण्णं वलग्गं आरूढं अहिअं अइरित्तं ।
आहूओ वाहित्तो विअत्थणं निअगुणसलाहा ॥ २४७ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जाण सवायं डोंबं सोंडं मज्जवं अयंडं अणवसरं ।
सरडं च कंकलासं छणं महं लोद्धयं वाहं ॥ २४८ ॥

लक्खं विजायं इंगिअं आयारो अह इमो इमा अज्जा ।
थाहो थग्घा तोणो तोणीरो, कंदुओ गुलिओ ॥ २४९ ॥

कंठो गलओ अवडू किआडिआ झंपणीउ पम्हाइं ।
गुप्फा खुलुहा जंघा टंका गंडा कवोला य ॥ २५० ॥

रसणा जीहा सवणा कण्णा वच्छं उरं भुआ बाहू ।
भुमआ भमुहा कक्खा भुअमूलं जण्हुआ जाणू ॥ २५१ ॥

कण्णा कुमरी धूआ दुहिआ बहिणी ससा पिआ जणओ ।
माया जणणी सुण्हा पुत्तवहू देअरो दिअरो ॥ २५२ ॥

माउच्छा माउसिआ अत्ता सासू सहोअरो भाया ।
मल्लाणी मामी पुप्फिआ पिउच्छा पई भत्ता ॥ २५३ ॥

रंभा कयली सिंदी खज्जूरी सत्तला य नोमाली ।
गुम्मो जाली बोरी कक्कंधू केसरो बउलो ॥ २५४ ॥

पलही ववणं तूलो रूवो दब्भो कुसो जवो गज्जो ।
थंबा सढा कलंबो नीवो गोल्हाफलं बिंबं ॥ २५५ ॥

अइमुत्तो माहविआ लवओ गुंदो पियंगुणो कंगू ।
कलमो साली य बिसं मुणालं उल्लूढं अंकुरिअं ॥ २५६ ॥

नग्गोहं वडरुक्खं सिग्गु सोहंजणं तलं तालं ।
चारं पियालं अजुअलवण्णं सत्तच्छयं जाण ॥ २५७ ॥

बीअयं असणं पिप्पलं आसत्थं तिंदुअं च टिंबरुअं ।
रायंछुअं च वेडिसं अलंबुसं बोडघेरं च ॥ २५८ ॥

खलिणं कविअं मइलं मलीमसं सीहरा जलतुसारा ।
थाणू खण्णुअं अलया कुरला दंतच्छओ उट्ठो ॥ २५९ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सीलं पयई तत्तं परमत्थं गोउरं पओली य ।
रयणी हत्थो भीओ हित्थो साहीणं अप्पवसं ॥ २६० ॥

दीणो वरओ विड्डिरं आडोवो रग्गयं च नवरंगं ।
लण्हं मसिणं ठाणं ओवासो गोअरो विसओ ॥ २६१ ॥

आरोविअं वलइअं धोअं विच्छोलिअं दसाऽवत्था ।
संकू कीलो रुंटिअं अलिविरुअं सीरिओ भिण्णो ॥ २६२ ॥

असमंजसं अणिबद्धं पडिसिद्धो वारिओ चरो पणिही ।
निहसो कसो समंता सव्वत्तो चारओ कारा ॥ २६३ ॥

विहुलं विसंठुलं जाण सामरिं सिंबलिं थलिं भूमिं ।
घरवाडयं परोहडं आयइं अज्जंतकालं च ॥ २६४ ॥

वालिअयं परिअत्तिअं ऊढिअयं पाउअयं मिअं तुच्छं ।
हुंडी घडा पउट्ठो कलाइआ गंडओ खग्गो ॥ २६५ ॥

खंडं वणं मुइंगो मुरओ य विवज्जओ विवज्जासो ।
पमहा गणा कलावो तिउडो वत्थं दुगुल्लं च ॥ २६६ ॥

महुरं साउं वारी करिधरणट्ठाणं अग्गला फलिहो ।
विसयं फुडं तरंतं परिप्पवंतं हिअं निअं ॥ २६७ ॥

लक्खारुणिअं पल्लविअं आविअं पोइअं घढं थूहं ।
रूढं पउणं जामो पहरो बहुलो कसणपक्खो ॥ २६८ ॥

पडिभेओ पच्चारणं आसंदी पीढिआ रणो सद्दो ।
सयडो गंती तंसं तिरिच्छं असिधेणुआ छुरिआ ॥ २६९ ॥

छोहो विक्खेवो हिअयं आसओ, कंदरो य कप्फाडो ।
कूणिअं अद्धनिमीलिअं अच्छायंतं निसायंतं ॥ २७० ॥

संमद्दो संघट्टो रासो हल्लीसओ खमं उचिअं ।
गुज्झं रहस्सं आसा मणोरहो कोसयं चसयं ॥ २७१ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रंगो पिच्छाभूमी दरी गुहा चूडओ वलयबाहू ।
खंजो खोडो य नडो कुसीलवो, नालिआ घडिआ ॥ २७२ ॥

पासाओ हम्मिअं अणुअघंटिआ किंकिणी कणी फुरणं ।
पोओ वहणं सबरा य किराया मालई जाई ॥ २७३ ॥

जे त्ति य पयपूरणे विम्हयम्मि हो विलविअम्मि अवि हाहा ।
अंतो मज्झे पुरओ य अग्गओ मग्गओ पच्छा ॥ २७४ ॥

खेआइसु अव्वो हंदि उ त्ति, आमंतणम्मि दे-सद्दो ।
इर तच्छीले, इल्लो इत्तो आलो य मउअत्थे ॥ २७५ ॥

विक्कमकालस्स गए अउणत्तीसुत्तरे सहस्सम्मि ।
मालवनरिंदधाडीए लूडिए मण्णखेडम्मि ॥ प्र. १. ॥

धारानयरीए परिट्ठिएण मग्गे ठिआए अणवज्जे ।
कज्जे कणिट्ठबहिणीए सुंदरी नामधिज्जाए ॥ प्र. २. ॥

कइणो अंध जण किवा कुसल त्ति पयाणमंतिमा वण्णा ।
नामम्मि जस्स कमसो तेणेसा विरइया देसी ॥ प्र. ३ ॥

कव्वेसु जे रसड्ढा सद्दा बहुसा कईहि बज्झन्ति ।
ते इत्थ मए रइसा रमंतु हिअए सहिअयाणं ॥ प्र. ४ ॥

महाकविधनञ्जयकृतः

## ॥ अनेकार्थ-निघण्टुः ॥

गम्भीरान् रुचिरांश्चित्रान् विस्तीर्णार्थप्रसाधनान् ।
कष्टशब्दान् प्रवक्ष्यामि कवीनां हितकाम्यया ॥ १ ॥

वाग्दिग्भूरश्मिवज्रेषु पश्वक्षिस्वर्गवारिषु ।
नवस्वर्थेषु मेधावी गोशब्दमुपलक्षयेत् ॥ २ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कः प्रजापतिरुद्दिष्टो को वायुरभिधीयते ।
कः शब्दः स्वर्गमाख्याति क इत्यात्मा मतः क्वचित् ॥ ३ ॥

सलिलं कमिति ज्ञेयं शिरः कमिति चोच्यते ।
देवाननिमिषानाहुर्मत्स्याननिमिषांस्तथा ॥ ४ ॥

अग्निश्च वर्हिणः चैव वृक्षः कुक्कुट एव च ।
शिखिनोऽभिहिताः शस्त्रः पृथुकश्च मतः शिखी ॥ ५ ॥

हंसो नारायणः प्रोक्तः क्वचिद्धंसो दिवाकरः ।
अश्वश्चापि स्मृतो हंसो हंसश्चापि विहंगमः ॥ ६ ॥

सारसस्सरसिजेन्द्वोः पतत्र्यपि च सारसः ।
राजाऽपि नृपतिर्ज्ञेयो राजा चोक्तो निशाकरः ॥ ७ ॥

विभावसुर्हुताशः स्याच्छ्वेतच्छत्रं क्वचिद्भवेत् ।
हिमारातिः स्मृतो वह्निः हिमारातिश्च भास्करः ॥ ८ ॥

धनञ्जयोऽग्निर्व्याख्यातो पार्थश्चापि धनञ्जयः ।
बीभत्सश्च मतः पार्थो बीभत्सो विकृतः स्मृतः ॥ ९ ॥

अग्निर्विरोचनः प्रोक्तो भास्करस्तु विरोचनः ।
विरोचनश्च चन्द्रः स्यात्क्वचिद्दैत्यो विरोचनः ॥ १० ॥

पाञ्चजन्यः क्वचिद्वह्निः क्वचिच्छङ्खो निगद्यते ।
कम्बुश्च गदितः शङ्खः कम्बुरिष्टश्च कुञ्जरः ॥ ११ ॥

भास्करोऽग्निः समुद्दिष्टः सहस्रांशुरपि क्वचित् ।
पतङ्गो दिनकृद् ज्ञेयः पतङ्गः शलभः स्मृतः ॥ १२ ॥

कौशिको देवराजः स्यादुलूकश्चापि कौशिकः ।
शम्भुर्ब्रह्मा च विष्णुश्च शम्भुश्चैव महेश्वरः ॥ १३ ॥

वृषकेतुर्मतः शङ्कुः शङ्कुः कील इहोच्यते ।
जम्बुको वरुणो ज्ञेयः शृगालश्चापि जम्बुकः ॥ १४ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अर्क इष्टस्तु मघवान् घर्मांशुरर्क उच्यते ।
मन्थी राहुश्च चन्द्रश्च ग्रहो मन्थी निरुच्यते ॥ १५ ॥

केतवो रश्मयो ज्ञेयाः केतवश्च महाध्वजाः ।
तमोनुदः सहस्रांशुरग्निश्चापि प्रकीर्त्यते ॥ १६ ॥

मयूखाः किरणा ज्ञेया मयूखाश्चापि कीलकाः ।
सप्तर्षिरुत्सवः प्रोक्तः सप्तान्ये ऋषयः क्वचित् ॥ १७ ॥

वसवः शंवरा उक्ता देवाश्च वसवो मताः ।
नक्षत्रं धिष्ण्यमित्युक्तं गेहं धिष्ण्यं मतं क्वचित् ॥ १८ ॥

वासोऽम्बरमिति ख्यातमम्बरं च नभःस्थलम् ।
पयः सलिलमुद्दिष्टं पयः क्षीरं मतं क्वचित् ॥ १९ ॥

शिवं पानीयमुद्दिष्टं शिवं श्रेयः शिवं सुखम् ।
शिवं व्योमपतिं प्राहुः शिवं श्रेष्ठं प्रचक्षते ॥ २० ॥

क्षरं जलं विजानीयात्क्वचिन्मेघं विदुः क्षरम् ।
स्यन्दनं चाम्बु निर्दिष्टं स्यन्दनश्च महारथः ॥ २१ ॥

कृष्णं तमः समाख्यातं कृष्णश्चाधोक्षजस्तथा ।
अमृतं क्षीरमित्युक्तं क्वचिच्चेष्टं समुद्रजम् ॥ २२ ॥

शवं च सलिलं प्रोक्तं मृतमाहुः शवं तथा ।
तोयं घृतमिति प्रोक्तं घृतं सर्पिः क्वचिद्भवेत् ॥ २३ ॥

पानीयं च विषं प्रोक्तं क्वचिद्धालाहलं विषम् ।
हस्तिहस्तः करः प्रोक्तः करो हस्तः प्रचक्ष्यते ॥ २४ ॥

कीलालं रुधिरं प्रोक्तं नीरं चैव प्रशस्यते ।
भुवनं सलिलं प्रोक्तं आकाशं भुवनं स्मृतम् ॥ २५ ॥

प्रवालं कोमलं ज्ञेयं कोमलं स्पष्टवाचकम् ।
सदनं च स्मृतं तोयं सदनं वेश्म उच्यते ॥ २६ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तोयं सद्मेति गदितं निलयं सद्म निगद्यते ।
संवरं च जलं प्रोक्तं संवरः पर्वतो भवेत् ॥ २७ ॥

संवरश्चाऽसुरः ख्यातो यो बिभर्ति रसां प्रियाम् ।
स्वरवाक्क्ष्मास्विडां प्राहुरिडा चाम्बरदेवताम् ॥ २८ ॥

पत्नीं चन्द्रेरिडां प्राहुरिला तत्समतां गता ।
अदितिः पृथिवी ज्ञेया देवमाताऽदितिः क्वचित् ॥ २९ ॥

अध्यूढा भार्या परित्यक्ता त्वद्भिदिश्च निगद्यते ।
वृषो धर्म्मः क्वचिज्ज्ञेयो गवामपि पतिर्वृषः ॥ ३० ॥

वृषा कर्णश्च गदितो वृषा चोक्तः शतक्रतुः ।
रौहिणेयो बलः प्रोक्तो रौहिणेयो बुधः क्वचित् ॥ ३१ ॥

बलदेवो मतः शेषो नागो वा शेष उच्यते ।
रामस्तु लाङ्गली ज्ञेयो रामो दाशरथिः क्वचित् ॥ ३२ ॥

रामश्च शुक्लो वर्णो रामश्च क्षत्रनाशनः ।
वराहः केशवः ख्यातो वराहो जलदः क्वचित् ॥ ३३ ॥

वराहः शकरो ज्ञेयो विष्णुर्मेघो हरिस्तथा ।
अजाराट्स्मरेन्दवो ज्ञेयास्त्रिनेत्रश्चाप्यजो मतः ॥ ३४ ॥

अजः पशुश्च विख्यातो तथाजौ ब्रह्मकेशवौ ।
शरीरजः स्मृतो रोगः पुत्रश्चापि शरीरजः ॥ ३५ ॥

ज्ञेयं पुष्करमब्जं च नागनासाग्रमेव च ।
कूलं नभः समाख्यातं कूलं रोधः प्रचक्षते ॥ ३६ ॥

खं चानन्तमिति प्रोक्तमनन्तं च बलं क्वचित् ।
विष्णुः क्वचिदनन्तः स्यान्नागश्चानन्त उच्यते ॥ ३७ ॥

प्रजापतिः स्मृतो राजा ब्रह्मा चापि प्रजापतिः ।
प्रजापतिः स्मृतः क्षत्ता क्षत्ता च चर उच्यते ॥ ३८ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वामः पयोधरः प्रोक्तो वामः स्याद्द्रविणं हरः ।
वामश्च मदनः प्रोक्तो वामश्च प्रतिकूलके ॥ ३९ ॥

आगोपो गोपको ज्ञेयः क्वचिदागोपको ध्वजः ।
उरश्चाङ्कः समाख्यातः स्थानमङ्कः स्मृतस्तथा ॥ ४० ॥

वासरस्तु स्मृतो नागो वासरो दिवसो मतः ।
विभावसुर्निशा ज्ञेया गन्धर्वश्च क्वचिन्मतः ॥ ४१ ॥

शर्वर्यो रात्रयः प्रोक्ताः शर्वर्यश्च स्त्रियो मताः ।
सान्द्रं घनमिति प्रोक्तं स्निग्धं सान्द्रं निगद्यते ॥ ४२ ॥

स्वः स्वर्गस्य मतं नाम स्वः सुखं क्वचिदुच्यते ।
स्व आत्मा चैव निर्दिष्टः स्वः प्रोक्तो गृहमूषिकः ॥ ४३ ॥

ककुश्छन्दोविशेषज्ञो मतः शास्त्रेपि ना ककुप् ।
ककुग्महीरुहः प्रोक्तो ज्ञेयास्तु ककुभो दिशः ॥ ४४ ॥

क्षयं वेश्म समुद्दिष्टं क्षयं रोगं प्रचक्षते ।
जलदस्तु प्लवो ज्ञेयः प्लवो ज्ञेयस्तथोडुपः ॥ ४५ ॥

प्रासादो मण्डपः प्रोक्तो विहारश्चापि कथ्यते ।
घनं घनं विजानीयाद् घनं विपुलमुच्यते ॥ ४६ ॥

प्रयुज्यते च कस्मिंश्चिद् घनं सङ्घातवाद्ययोः ।
वरूथं स्यन्दनाग्रं स्याद्वरूथं वेश्म उच्यते ॥ ४७ ॥

चमूश्च वर्म सहसा प्रवदन्ति मनीषिणः ।
असुराश्च सुरा ज्ञेयाः क्वचिद्देवारयोऽसुराः ॥ ४८ ॥

नागाश्च द्विरदा ज्ञेयाः पन्नगाश्च क्वचिन्मताः ।
गन्धर्वश्च तथा वायुः क्वचित्स्याद् देवगायनः ॥ ४९ ॥

तार्क्ष्यो हयः समुद्दिष्टस्तार्क्ष्यश्चापि पतत्रिराट् ।
बालेयानसुरानाहुर्बालेयांश्च क्वचित् खरान् ॥ ५० ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तृणी वनस्पतिः प्रोक्ता क्वचिदार्द्राश्च कथ्यते ।
शिखरी वृक्ष उद्दिष्टः शिखरी पर्व्वतः स्मृतः ॥ ५१ ॥

द्विजो विप्रश्च दन्तश्च द्विजः पक्षी निगद्यते ।
चौरो मलिम्लुचो ज्ञेयोः वातश्चापि मलिम्लुचः ॥ ५२ ॥

आत्मजं रक्तमुद्दिष्टं सुतः कामस्तथैव च ।
कीनाशो मृतको ज्ञेयः कीनाशश्चापि राक्षसः ॥ ५३ ॥

कीनाशोऽग्निः कृतघ्नश्च कृपणो यम एव च ।
कीनाशः कर्षको ज्ञेयः कीनाशश्च वृकोदरः ॥ ५४ ॥

अवदातं प्रधानं स्यादवदातं च पाण्डुरम् ।
ज्योतिर्ल्लोचनमुद्दिष्टं ज्योतिर्नक्षत्रमुच्यते ॥ ५५ ॥

ज्योतिश्च गदितो वह्निः काव्येषु मुनिपुङ्गवैः ।
प्रधानं सज्जनं ज्ञेयं प्रधानं श्वेतमुच्यते ॥ ५६ ॥

अब्दः संवत्सरो ज्ञेयो मेघश्चापि क्वचिन्मतः ।
बलाहका महामेघाः शिखरी च बलाहकः ॥ ५७ ॥

तोयदं जलदं प्राहुस्तोयदं कथ्यते घृतम् ।
जीमूतश्च मतो नागो जीमूतः क्वचिदम्बुदः ॥ ५८ ॥

पौलस्त्यं तु मतं युद्धं पौलस्त्यं पौरुषं विदुः ।
शुचिकृद्रजकश्चैव प्रोक्तो नित्यं बुधै रसः ॥ ५९ ॥

पर्जन्यं जलदं प्राहुः पर्जन्यं तु शतक्रतुः ।
शिलीमुखाः स्मृता बाणा भ्रमराश्च शिलीमुखाः ॥ ६० ॥

लेखा सीमेति विज्ञेया लेखा चित्रकृतौ मता ।
अम्बरीषं क्वचिद्भ्राष्ट्रं क्वचिद्युद्धं निगद्यते ॥ ६१ ॥

पुंस्त्वं चापि मतं युद्धं पुंस्त्वं पौरुषमुच्यते ।
विद्वांसोऽरिपवो ज्ञेया विद्वांसस्त्वसवो मताः ॥ ६२ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मायाऽविद्येति विज्ञेया क्वचिन्माया तु सांवरी ।
मधु द्राक्षीति विज्ञेया क्वचित्स्यान्मधु माक्षिकम् ॥ ६३ ॥

मधु चाम्बु समाख्यातं सुरा च मधुसंज्ञका ।
खं रन्ध्रमिति विज्ञेयं खं गृहं नभ एव च ॥ ६४ ॥

खमिन्द्रियमिति ख्यातं खं च नक्षत्रमुच्यते ।
धार्तराष्ट्रा महाहंसा धृतराष्ट्रसुताः क्वचित् ॥ ६५ ॥

प्रभाकरो मतः सूर्यो वह्निश्चापि प्रभाकरः ।
सितं शुक्लमिति ज्ञेयं सितं बद्धं प्रचक्षते ॥ ६६ ॥

असितं कृष्णमित्युक्तं अशितं भक्षितं स्मृतम् ।
बभ्रुस्तु नकुलो ज्ञेयः पाण्डवो नकुलस्तथा ॥ ६७ ॥

त्रिशङ्कुमाहुर्मार्जारमृषिश्चापि तथेष्यते ।
यमस्तु वायसो ज्ञेयो यमः प्रेताधिपस्तथा ॥ ६८ ॥

लक्ष्मणं सारसं विद्यात्तथा दशरथात्मजम् ।
लक्ष्म चन्द्रस्य कार्ष्ण्यं स्याल्लक्ष्म्यः केतुः प्रकीर्तितः ॥ ६९ ॥

केतुश्चापि मतः काव्ये लक्ष्मेति मुनिपुङ्गवैः ।
आरुणेयः स्मृतो दक्षो दक्षश्चाचेतसः क्वचित् ॥ ७० ॥

आशुकारी भवेद्दक्षः स्यादली तोमरः स्मृतः ।
आदित्यं च रविं विद्याद् दैत्यश्चाप्यदितेः सुतः ॥ ७१ ॥

रोगो रजस्तथा रेणू रजो लोहितमुच्यते ।
स्कन्धो नितम्बसंज्ञः स्यान्नितम्बं जघनं तटम् ॥ ७२ ॥

हेम वस्विति विज्ञेयं वसु तेजो निगद्यते ।
सारङ्गं चातकं प्राहुः स्वर्णे चापि सितासिती ॥ ७३ ॥

रम्भाश्च कदलीः प्राहू रम्भा स्वर्गाङ्गना मता ।
ग्रावाणो गिरिजाः प्रोक्ता मेघाश्चापि मनीषिभिः ॥ ७४ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

.................. .................. निगद्यते ।
औषणं रसमुद्दिष्टमृतं सत्यमपि क्वचित् ॥ ७५ ॥

अक्ष आत्मेति विज्ञेयः केचिदाहुर्बिभीतकम् ।
ज्ञेयमिन्द्रियमक्षं च शाकटं कर्ष एव च ॥ ७६ ॥

अक्षं च पाशकं विद्याद्व्यावहारिकमेव च ।
पद्ममिन्द्रियमित्युक्तं पद्मं तामरसं विदुः ॥ ७७ ॥

चैत्यमायतनं प्रोक्तं नीडमायतनं तथा ।
पुष्पं लोहितमुद्दिष्टं पुष्पं च कुसुमं तथा ॥ ७८ ॥

वाजी तुरङ्गमो ज्ञेयो वाजी श्येनो विहङ्गमः ।
विष्णिवन्द्रसिंहमण्डूकचन्द्रादित्याँस्तु वानरान् ॥ ७९ ॥

बभ्रुशिवानिलहयान् हरीनिच्छन्ति कोविदाः ।
पुरुषध्वजलिङ्गेषु हयभूषणलक्ष्मषु ॥ ८० ॥

रामशेषावनीन्द्रेषु ललामं नवसु स्मृतम् ।
शुक्रा स्मृताऽक्षिदोषोना लवली मञ्जरी तथा ॥ ८१ ॥

वक्रवक्त्रः शुको ज्ञेयः कोकिला वचनप्रिया ।
पुलिनं जलविच्छेदः पङ्कजं स्यात्कुशेशयम् ॥ ८२ ॥

रतं पापमिति ज्ञेयं सत्वरं शीघ्रमुच्यते ।
पिशङ्गं रोचनाभं स्यान्मेचकस्तिलको मतः ॥ ८३ ॥

ललाटेऽवस्थितं चिह्नं विद्वद्भिस्तलकं मतम् ।
परिचर्यं च कटकं निकषस्तु कषो मतः ॥ ८४ ॥

नानारत्नैरुपचिता मञ्जूषा रागिणी स्मृता ।
दिनकृद्वाजिसिंहेषु केसरित्वं विधीयते ॥ ८५ ॥

अव्यक्तो मधुरः शब्दः कल इत्यभिधीयते ।
अलातमुल्मुकं ज्ञेयं छेदो नाम भयङ्करः ॥ ८६ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भावः शृङ्गारमाधुर्यं भावोऽवस्थाप्ररूपणम् ।
विलासः कामजो दोषस्तदेव ललितं मतम् ॥ ८७ ॥

उत्तमाङ्गं विना देहं कबन्धं चेति शस्यते ।
शिरसो वेष्टनं यद्वै तदुष्णीषं निगद्यते ॥ ८८ ॥

आहतं समदीर्घं स्यान्निबिडं पीडितोन्नतम् ।
मण्डूको भेकसंज्ञः स्याद्वर्षाभूश्चातको मतः ॥ ८९ ॥

शिवा पिङ्गवती ज्ञेया विशालं सबलं मतम् ।
दुश्चर्मा शिपिविष्टः स्यात्कर्षकस्तु कृषीबलः ॥ ९० ॥

कन्याजातश्च कानीनो पण्डः क्लीब इति स्मृतः ।
उत्कृष्टः श्वसुरः स्यातां म्लिष्टमव्यक्तवाचकम् ॥ ९१ ॥

रदनो हस्तिदन्तः स्याद्दानं कटकसंज्ञितम् ।
तोदनं चाङ्कुशं विद्यादालानं हस्तिबन्धनम् ॥ ९२ ॥

घनाघन इति ख्यातः शास्त्रेष्वधिकपौरुषः ।
अपाचीनं मनोज्ञं च बुद्धिर्ज्ञेया तु शेमुषी ॥ ९३ ॥

अर्कस्तु पादपे ज्ञेयो नदी स्यात्फेनवाहिनी ।
अश्वारोहो मरुद्यानोऽश्वानां हृदये ध्वनिः ॥ ९४ ॥

आक्रन्द इति विज्ञेयः खुराश्च शफसंज्ञिताः ।
आममासं भवेत्क्रव्यं पक्वं पिशितमुच्यते ॥ ९५ ॥

शुष्कं तुं विरसं ज्ञेयं मृष्टं सरसमुच्यते ।
शङ्खजं शुक्तिजं चैव वाराहं तिमिमौक्तिकम् ॥ ९६ ॥

वंशादाशीविषान्नागाज्जीमूताच्च तथाष्टमम् ।
लोकज्ञो दक्षिणो ज्ञेयो दक्षिणश्च तुरः स्मृतः ॥ ९७ ॥

आकूतं तु मतं विद्यात्कण्टकं गहनं मतम् ।
आननं चाकुले नेत्रे चिकुरं चापि शस्यते ॥ ९८ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पापः श्याम इति प्रोक्तो वभ्रूस्तु कपिलो मतः ।
स्थविष्टं स्थावरे चैव दविष्टं दूरमुच्यते ॥ ९९ ॥

परमेष्ठी मतः श्रेष्ठः प्रेम प्रियमुदाहृतम् ।
प्रकाशः स्त्रीगृहेरक्तः शैलूष इति संज्ञितः ॥ १०० ॥

पदकृच्चर्मकारः स्यान्नापितस्त्वजयः स्मृतः ।
लावण्यमाहुर्माधुर्यं चित्रं च शुभकर्म्मजम् ॥ १०१ ॥

व्याधयश्चामयाः प्रोक्ताः पानीयं तु समुच्चयः ।
आधयस्तु स्मृताः प्राज्ञैश्चित्तोत्पन्ना उपद्रवाः ॥ १०२ ॥

रंहो वेगः समाख्यातः सत्रं सच्चरितं स्मृतम् ।
आलवालं स्मृतं सद्भिरपां वेगनिवारणम् ॥ १०३ ॥

चटकः कलविङ्कः स्यात्तुल्यं सदृशमुच्यते ।
किलासं पाण्डुरं ज्ञेयं दोला प्रेङ्खेति शस्यते ॥ १०४ ॥

मन्दिरं नगरं ज्ञेयं निलयं चापि मन्दिरम् ।
सहस्रनयनोऽगारिः प्रधनं युद्धमुच्यते ॥ १०५ ॥

पलाशो हरितो वर्णो मेचको नीलपिञ्जरः ।
उक्षाणं वृषभं विद्याल्लुलायो महिषो मतः ॥ १०६ ॥

उस्रा वन्ध्या वसा वेहत् पृष्ठोही गर्भिणी हि या ।
व्याख्यातो मस्करो वेणुस्त्वचिसारः परिकीर्तितः ॥ १०७ ॥

हिलं कामं शपं चैव रोषमाहुर्मनीषिणः ।
कलभोऽल्पवयो नागः कलुषं चाविलं मतम् ॥ १०८ ॥

वृजिनं कुटिलं विद्यात्सम्राट् राजा च भूभुजौ ।
रत्नं वज्रं विजानीयात्त्रियामा क्षणदा मता ॥ १०९ ॥

दीर्घं प्राशुं विजानीयात् ह्रस्वं नीचकमुच्यते ।
भूरि प्रभूतमुद्दिष्टमभितः सर्ववाचकम् ॥ ११० ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पवनश्चानिलो ज्ञेय: पवनश्चाधमो जन: ।
प्रियवाक्यो भवेदार्य: स्नातश्च परिकीर्तित: ॥ १११ ॥

आडम्बरश्च पटहो व्यञ्जनं बोधनं मतम् ।
विपञ्ची वल्लकी ख्याता वीणा चैव निगद्यते ॥ ११२ ॥

मालती सुमना ज्ञेया सुमना मुदितो जनः ।
वल्लरी मञ्जरी ख्याता प्रपाऽप्शाला प्रकीर्तिता ॥ ११३ ॥

आयुर्निरुच्यते तोयं तेन जीवति पद्मकम् ।
तस्य पत्राक्षिमानेन रामो राजीवलोचन: ॥ ११४ ॥

उत्कृत्य कवचं देहादसृग्दग्धं च यत्पुरा ।
इन्द्राय दत्तवान्कर्णस्तेन वैकर्त्तन: स्मृत: ॥ ११५ ॥

तीक्ष्णश्चैव प्रचण्डश्च वृको नामानलो मत: ।
स पाण्डवस्य उदरे तेन भीमो वृकोदरः ॥ ११६ ॥

यस्य श्रुतिमुखा वाणी पुण्य-श्लोक: स उच्यते ।
य: खेदी चानिवर्त्ती च युद्धशौण्ड: स उच्यते ॥ ११७ ॥

महासंसर्गसङ्घातं महेष्वासं प्रचक्षते ।
स्वविक्रमैस्तापयेच्च परं... यूथं तापयेत् ॥ ११८ ॥

यूथं तापयेद्यस्तं विज्ञेयश्च स यूथप: ।
तस्मादपि च यो वर्य: स तु यूथपयूथप: ॥ ११९ ॥

सिंहान्वितान्तसौवीरः स नृसिंह इति स्मृत: ।
ये हि स्पष्टप्रवक्तारो मतास्ते व्यक्तवादिन: ॥ १२० ॥

यो यमित्थं च नाम्नाति स कीनाश इति स्मृत: ।
योऽप्रबुद्धोऽल्पबुद्धिश्च स तु मन्द इति स्मृत: ॥ १२१ ॥

उपकारं तु यो हन्ति स कृतघ्न इति स्मृत: ।
हर्षे गर्वे सुखे खेदे वृद्धौ च प्रतिभासते ॥ १२२ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्नेहभाग्यक्षये चैव मन्दशब्दो निगद्यते ।
नातीत्य वर्तते यत्र तदध्यात्मं प्रचक्षते ॥ १२३ ॥

चेतसश्च समाधानं समाधिरिति गद्यते ।
सर्वक्लेशविनिर्मुक्तो स हि दान्त इति स्मृतः ॥ १२४ ॥

निर्ममो निरहङ्कारो विज्ञेयः छिन्नसंशयः ।
प्रदाता देशकालज्ञः समाधिस्थः स उच्यते ॥ १२५ ॥

मुखरोऽल्पमतिर्यस्तु सक्रोधश्चैव कीटकः ।
वृत्तिर्यत्र तु गृह्यानां परोक्षे बहिः तत्क्रिया ॥ १२६ ॥

आहारव्यवहारेषु सा प्रीतिर्निरुपस्करा ।
परस्परं स्वदारेषु सतां येषां प्रवर्तते ॥ १२७ ॥

विश्रम्भात्प्रणयाद्वापि सा प्रीतिर्निरुपद्रवा ।
यशः ख्यातिरिति प्रोक्तं तद्योगात्प्राहुरुच्यते ॥ १२८ ॥

कीर्तिख्यातियशोयोगाद् भगवन्निति चोच्यते ।
प्रियदानेषु यः शुद्धः स उदार इति स्मृतः ॥ १२९ ॥

रजस्वला तु या नारी सा चोदक्या प्रकीर्तिता ।
प्रीतिर्भावक्रिये स्वच्छरक्षालिङ्गितनुं विपुम् ? ॥ १३० ॥

तेजो रेतसि दीप्तौ तपो हि स्याद् वृषार्थकः ।
योऽन्यजातो हनो जीवः स शरारू इति स्मृतः ॥ १३१ ॥

मिथ्यादृष्टिरहंमानी नास्तिकः सः प्रकीर्त्तितः ।
कामः क्रोधश्च वै पूर्वे लोभोऽसत्यं च मध्यमे ॥ १३२ ॥

अन्ते मोहो विषादश्च यस्य ज्ञेयः स षड्वदः ।
अमृते जारजः कुण्डो मृते भर्त्तरि गोलकः ॥ १३३ ॥

अनयोर्योऽन्नमश्नाति स कुण्डाशी निगद्यते ।
भ्रूणस्त्री गर्भिणी बाला ब्राह्मणी बह्मजीविनी ॥ १३४ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

परचित्ते यवीयान् योः ज्येष्ठपत्नीं परामृशन् ।
यः पश्चिमश्च ज्येष्ठोऽपि परचित्तः स उच्यते ॥ १३५ ॥

पुष्पजं क्षोमजं चर्म्मकोशजं भर्म्मजं तथा ।
गुणजं च समुद्दिष्टं तद्भेदा वस्त्रजातिषु ॥ १३६ ॥

बिम्बारक्तधरा या स्त्री बिम्बोष्ठीं तां विनिर्दिशेत् ।
या स्यात् संक्रीडनपरा ललना तां विनिर्दिशेत् ॥ १३७ ॥

दूर्व्वाकाण्डप्रतीकाशा कुम्भौ यस्यास्तनू कुचौ ।
सर्वरूपविविक्ताङ्गी सा भवेद्वरवर्ण्णिनी ॥ १३८ ॥

लावण्ययुक्ता या नारी ललितां तां विनिर्दिशेत् ।
या मत्ता मत्तवज्ज्योतिः सा ज्ञेया मत्तकाशिनी ॥ १३९ ॥

भूरिश्च भूरिमुद्दिष्टम् अन्नं श्रव इति स्मृतम् ।
भूरि श्रवो ददातीह तस्माद् भूरिश्रवो हि सः ॥ १४० ॥

चतुष्पाद्विंशतिभुजो लोहितग्रीव एव च ।
निसर्गाद्दारुणात्क्रूराद्रवणाद् रावणः स्मृतः ॥ १४१ ॥

रोषणा या भवेन्नारी भामिनीं तां विनिर्दिशेत् ।
न्यग्रोधलक्षणं विद्याद्धाना परिमण्डलम् ॥ १४२ ॥

ताभ्यामुपेता वनिता न्यग्रोधपरिमण्डला ।
तत्तुल्ये चाक्षिणी यस्याः सा स्त्री राजीवलोचना ॥ १४३ ॥

वर्णप्रमाणनिर्घोषोऽछिन्नसंपद्भिरन्वितः ।
राजीवमन्ये शंसन्ति स्निग्धवर्णं सितासितम् ॥ १४४ ॥

किंचिदुत्तरतद्योगात्सीता राजीवलोचना ।
बलिभिर्यास्त्रिभिर्युक्ता शङ्खकण्ठी उदाहृता ॥ १४५ ॥

.....जराकराकारं स्पन्दनाग्रमिवाग्रतः ।
वस्त्वे...ति तज्ज्ञेयं तस्यैवाग्रं ..... ॥ १४६ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

.....त्तं मर्मसंयुक्तं तत्तथालिनमुच्यते ।
ग्रहणे धारणे सामे वाहने धर्मसंयुता ॥ १४७ ॥

रमणे क्रीडने सङ्गे भार्या नाम प्रवर्त्तते ।
मूढतायां सविद्यायां सप्ताश्वस्त्वंशुमालिनि ॥ १४८ ॥

विषमाक्षदरा एते ज्ञेयाग्रं तैः विसंस्थिताः ।
कोटरस्था इति ज्ञेयाः सर्प्पकीटखगादयः ॥ १४९ ॥

आताम्रपल्लवो यस्तु वृक्षाणामचिरोद्गमः ।
.......................................... ॥ १५० ॥

सौकुमार्यं किसलयं कोमलत्वं च तत्स्मृतम् ।
शतानां च चतुर्हस्तं नल्वं तदिहसंज्ञितम् ॥ १५१ ॥

कुम्भो वाहः प्रस्थः समं नल्व इति विधीयते ।
विपिनं शून्यमित्युक्तं विपिनं गृहमेव च ॥ १५२ ॥

रुक्म वर्ण्णं च वामं च दर्शनीयार्थवाचकः ।
सर्वार्थश्चाप्युवर्णश्च पानीयं शीतमुच्यते ॥ १५३ ॥

नीहारं शीतमित्युक्तं प्रदोषान्तो निशीयकः ।
....................................................... ॥ १५४ ॥

इति महाकविश्रीधनञ्जयकृते निघण्टुसमये शब्दसंकीर्णे
अनेकार्थप्ररूपणो द्वितीयपरिच्छेदः ॥ २ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पू.आ. श्री हर्षकीर्तिसूरिविरचिता

# ।। शारदीया नाममाला ।।

प्रणम्य परमात्मानं, सच्चिदानन्दमीश्वरम् ।
ग्रथ्नाम्यहं नामामालां, मालामिव मनोरमाम् ॥ १ ॥

परमात्मा परम्ब्रह्म, परञ्ज्योतिरगोचरः ।
निरञ्जनश्चिदानन्दः, परमः परमेश्वरः ॥ २ ॥

देवाधिदेवः सर्वज्ञो, वीतरागो जिनेश्वरः ।
तीर्थङ्करो जगन्नाथो, जिनोऽर्हन् भगवान् प्रभुः ॥ ३ ॥

वाग्देवी शारदा ब्राह्मी, भारती गीः सरस्वती ।
हंसयाना ब्रह्मपुत्री, सा सदा वरदायिनी ॥ ४ ॥

विनायकः पर्शुपाणि-र्विघ्नराजो गजाननः ।
द्वैमातुर एकदन्तो, लम्बोदरगणाधिपौ ॥ ५ ॥

गौरीसुतश्च हेरम्ब-स्तथा मूषकवाहनः ।
कार्यारम्भेषु सर्वेषु सिद्धिबुद्धिप्रदोऽस्तु सः ॥ ६ ॥

सुगतः श्रीधनो बुद्धो, बोधिसत्त्वस्तथागतः ।
द्वयवादी दशबलो, जिनः शौद्धोदनिर्मुनिः ॥ ७ ॥

ब्रह्मा प्रजापतिः स्रष्टा, विधिर्वेधाः पितामहः ।
हिरण्यगर्भो द्रुहिणः, परमेष्ठी चतुर्मुखः ॥ ८ ॥

धाता विधाता लोकेशो, विरञ्चिर्विश्वसृड् ध्रुवः ।
सुरज्येष्ठः कमलभूः, स्वयम्भूर्नाभिभूरजः ॥ ९ ॥

पद्मनाभोऽग्रयोनिः स्या-दात्मभूः कमलासनः ।
तत्पुत्रो नारदो वीणा संयुतो हंसवाहनः ॥ १० ॥

श्रीपतिः केशवः कृष्णो, गोविन्दो माधवोऽच्युतः ।
दामोदरो दैत्यरिपु-र्विष्णुनारायणौ हरिः ॥ ११ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जनार्दनश्चक्रपाणि-र्वासुदेवश्चतुर्भुजः ।
उपेन्द्रः पुण्डरीकाक्षो, मुरारिः पुरुषोत्तमः ॥ १२ ॥

पीताम्बरः पद्मनाभो, मुकुन्दो मधुसूदनः ।
विश्वम्भरो विश्वरूपो, विश्वक्सेनो वृषाकपिः ॥ १३ ॥

यदुनाथो हृषीकेशः, शौरिः श्रीवत्सलाञ्छनः ।
वैकुण्ठ इन्द्रावरजो, वनमाली त्रिविक्रमः ॥ १४ ॥

अब्धिशायी शेषशायी, श्रीधरो गरुडध्वजः ।
जलशायी यज्ञमर्त्यः, पुराणपुरुषः स्वभूः ॥ १५ ॥

अधोक्षजः कैटभजित्, बलिभिद्विष्टरश्रवाः ।
देवकीनन्दनः शार्ङ्गी, कंसारिर्नरकान्तकृत् ॥ १६ ॥

गदाधरश्चक्रधारो, गोवर्धनधरो विधुः ।
गोपीप्रियो गिरिधरः, श्यामो गरुडवाहनः ॥ १७ ॥

यशोदातनयो राधा-वल्लभो नन्दनन्दनः ।
विठलो मोहनः कुञ्ज-विहारी द्वारिकेश्वरः ॥ १८ ॥

महेश्वरो महादेवः, श्रीकण्ठः शंकरः शिवः ।
ऊग्रः शूली मृडः शंभुस्त्र्यम्बकश्चन्द्रशेखरः ॥ १९ ॥

रुद्रस्त्रिलोचनः शर्वः, स्थाणुर्गङ्गाधरो हरः ।
ईशान ईशो गिरिशो, गिरीशः प्रथमाधिपः ॥ २० ॥

मृत्युञ्जयः पशुपतिः, कृत्तिवासाः कपालभृत् ।
वामदेवो भवो भर्गः, पिनाकी वृषभध्वजः ॥ २१ ॥

व्योमकेशः क्रतुध्वंसी, भूतनाथ उमापतिः ।
अष्टमूर्तिनीलकण्ठः, पुरभिन्नीललोहितः ॥ २२ ॥

खञ्जः कपर्दी सर्वज्ञो, धूर्जटिस्त्रिपुरान्तकः ।
कृशानुरेता दिग्वासा, अन्धकारिर्विषान्तकृत् ॥ २३ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

खण्डपर्शुर्विरूपाक्षो, वरदो भाललोचनः ।
इन्दुमौलिः स्मरारिश्च, भीमो वृषभवाहनः ॥ २४ ॥

लक्ष्मीः श्रीः कमला पद्मा, मा रमा कमलालया ।
इन्दिरा हरिपत्नी सा लोकमाताब्धिनन्दिनी ॥ २५ ॥

ईश्वरी पार्वती गौरी, भवानी हिमवत्सुता ।
उमा शिवाम्बिका दुर्गा, काली कात्यायनीश्वरी ॥ २६ ॥

रुद्राणी चण्डिका चण्डी, मृडानी मेनकात्मजा ।
अपर्णार्या सती देवी, गिरिजा सर्वमङ्गला ॥ २७ ॥

दाक्षायणी च शर्वाणी, महामाया महेश्वरी ।
भैरवी भूतनाथा च, शांकरी शिववाहना ॥ २८ ॥

अनङ्गो मदनः कामो, मारः पञ्चशरः स्मरः ।
मनोभवो रतिपतिर्मन्मथो मकरध्वजः ॥ २९ ॥

पुष्पधन्वा मनसिजः, कन्दर्पो विषमायुधः ।
शम्बरारिः सूर्पकारि-र्दर्पको मीनकेतनः ॥ ३० ॥

अनन्यजो मधुसखः, प्रद्युम्नः कुसुमायुधः ।
शृङ्गारयोनिः पुष्पेषुः, संकल्पात्मा रमासुतः ॥ ३१ ॥

हृच्छयः कमनः कन्तु-र्जराभीरुश्च तच्छराः ।
मोहनोन्मादनौ शोष-णश्च ताडनमारणौ ॥ ३२ ॥

कार्तिकेयो गुहः स्कन्दः, सेनानीः पार्वतीसुतः ।
षाण्मातुरो महासेनः षण्मुखः शिखिवाहनः ॥ ३३ ॥

शरजन्माग्निभूः स्वामी, विशाखः क्रौञ्चभेदनः ।
तारकारिः शक्तिधरः, कुमारो बहुलात्मजः ॥ ३४ ॥

विबुधा देवता देवा-स्त्रिदशा निर्जराः सुराः ।
आदित्या मरुतो लेखा, निलिम्पा नाकिनोऽमराः ॥ ३५ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वृन्दारकाः सुमनसः, सुपर्वाणः सुधाभुजः ।
त्रिदिवेशा आदितेया, अमर्त्या दानवारयः ॥ ३६ ॥

दिवौकसो दिविषदो, गीर्वाणा अमृतान्धसः ।
अस्वप्ना ऋभवो वह्नि-मुखाः क्रतुभुजोऽरुजः ॥ ३७ ॥

स्वः स्वर्गस्त्रिदिवं नाकः, सुरलोकस्त्रिविष्टपम् ।
सुरालयश्चोर्ध्वलोको, द्यौर्गौस्तु विषताविषौ ॥ ३८ ॥

इन्द्रः पुरन्दरः शक्रो, वासवः पाकशासनः ।
संक्रन्दनः सहस्राक्षः, सुत्रामा मघवा वृषा ॥ ३९ ॥

आखण्डलः सुनासीरः, पुरुहूतः शतक्रतुः ।
दिवस्पतिर्दुश्च्यवनो, जम्भारातिः शचीपतिः ॥ ४० ॥

जिष्णुर्वृद्धश्रवा वज्री, बिडौजा नाकिनायकः ।
बलारातिः सुरपति-र्मरुत्वान् मेघवाहनः ॥ ४१ ॥

प्राचीनबर्हिर्मघवा, शतमन्युः सुरर्षभः ।
ऋभुक्षा नमुचिद्विट् च, वृत्रहा कौशिको हरिः ॥ ४२ ॥

वास्तोष्पतिस्तुराषाट् तु, पुलोमारिर्मरुत्सखः ।
गोत्रभेदी हरिहयो, देवराजोऽस्य तु प्रिया ॥ ४३ ॥

पुलोमजा शचीन्द्राणी, पीयूषममृतं सुधा ।
हाहा हूहूश्च गन्धर्वौ, विश्वकर्मा तु शिल्पकृत् ॥ ४४ ॥

सुतो जयन्तः प्रासादो, वैजयन्तोऽमरावती ।
पुरी सभा सुधर्मा च, मातलिः सारथिर्हरेः ॥ ४५ ॥

ऐरावतो गजो वज्र-मायुधं नन्दनं वनम् ।
ऊच्चैःश्रवा हयो यानं, विमानं व्योमगामिनी ॥ ४६ ॥

द्वारपालो देवनन्दी, बृहस्पतिः पुरोहितः ।
स्वर्वैद्यावश्विनीपुत्रौ, नारदाद्याः सुरर्षयः ॥ ४७ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

घृताची मेनका रम्भा, मञ्जुघोषा तिलोत्तमा ।
उर्वशी च सुकेशी चेत्याद्या अप्सरसः स्मृता ॥ ४८ ॥

संतानः पारिजातश्च, कल्पश्च हरिचन्दनः ।
मन्दारश्चेति देवानां, वृक्षाः पञ्च बुधैः स्मृताः ॥ ४९ ॥

विद्याधरा अप्सरो यक्षा, रक्षोगन्धर्वकिन्नराः ।
पिशाचो गुह्यकः सिद्धो, भूतोऽमी देवयोनयः ॥ ५० ॥

कुबेरो धनदः श्रीदो, यक्षराजो धनाधिपः ।
किन्नरेशो राजराजः, पौलस्त्यो गुह्यकेश्वरः ॥ ५१ ॥

ऐलविलः शम्भुसखः, कुहः पुण्यजनेश्वरः ।
एकपिङ्गो वैश्रवणो, निधीशो नरवाहनः ॥ ५२ ॥

मनुष्यधर्मा कैलास-नाथः किंपुरुषाधिपः ।
उत्तराशापतिः शक्र-कोशाध्यक्षोऽलकापतिः ॥ ५३ ॥

वरुणः पाशभृच्चैव, प्रचेता अब्धिमन्दिरः ।
यादःपतिर्जलपतिः, पाशी पश्चिमदिग्पतिः ॥ ५४ ॥

यमः कृतान्तः शमनो, धर्मराजः परेतराट् ।
समवर्ती श्राद्धदेवः, कालः सूर्यसुतोन्तकः ॥ ५५ ॥

यमराजः पितृपतिर्मृत्युर्दक्षिणदिक्पतिः ।
कीनाशो यमुनाभ्राता, दण्डभृन्महिषध्वजः ॥ ५६ ॥

असुरा दानवा दैत्याः, शुक्रशिष्याः सुरद्विषः ।
पूर्वदेवा दितिसुता, दैत्येन्द्रा दनुजा अपि ॥ ५७ ॥

असुरा राक्षसा यातु-धाना रक्षांसि नैऋताः ।
रात्रिचराः पुण्यजनाः, पलादासृक्परक्तपाः ॥ ५८ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ इति देववर्गः ॥

आकाशमभ्रं गगनं, व्योम विष्णुपदं नभः ।
अम्बरं पुष्करं खं द्यौरन्तरिक्षं मरुत्पथः ॥ ५९ ॥

वियद्विहायोऽनन्तं च, सुरवर्त्म घनाश्रयः ।
........................................... ॥ ६० ॥

आदित्यः सविता सूर्यो, रविर्भानुर्दिनेश्वरः ।
अर्कः सूरः खगः पुषा, पतङ्गो भास्करो भगः ॥ ६१ ॥

तपनस्तरणिर्मित्र-श्चित्रभानुस्त्रयीतनुः ।
सप्ताश्वोऽहस्करो भास्वान्, द्वादशात्मा विरोचनः ॥ ६२ ॥

प्रभाकरः सहस्रांशु-र्मार्तण्डो मिहिरोऽर्यमा ।
प्रद्योतनो जगच्चक्षुः, कर्मसाक्षी दिवाकरः ॥ ६३ ॥

हरिदश्वो हरिर्हेलि-र्ब्रध्नो हंसो विकर्तनः ।
उष्णरश्मिर्ग्रहपति-र्गभस्तिश्चक्रबान्धवः ॥ ६४ ॥

ईनोंशुमाली तीक्ष्णांशुः, सप्तसप्तिर्विभाकरः ।
नभोमणिर्धामपति-र्द्युमणिः पद्मिनीपतिः । ॥ ६५ ॥

पद्मबन्धुर्विवस्वांश्च, ध्वान्तारातिरहर्पतिः ।
तिमिरारिर्दिनकरो, यमुनाजनकोऽरुणः ॥ ६६ ॥

चन्द्रः सोमो मृगाङ्को ग्लौ-र्हिमांशुश्चन्द्रमाः शशी ।
विधुः शशाङ्कः शीतांशुर्द्विजराजः सुधाकरः ॥ ६७ ॥

जैवातृकः शशधरो, नक्षत्रेशो निशाकरः ।
औषधीशो निशानाथ, इन्दुः कुमुदिनीप्रियः ॥ ६८ ॥

अब्जो राजा चोडुपतिः, कलानाथो हिमद्युतिः ।
रोहिणीरमणो सिन्धु-सुतः कुमुदबान्धवः ॥ ६९ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चन्द्रोद्योतः स्मृता ज्योत्स्ना, चन्द्रिका कौमुदीन्दुरुक् ।
नक्षत्रमृक्षं भं धिष्ण्यं, तारा ज्योतिरुडुर्ग्रहः ॥ ७० ॥

मयूखकिरणौ भानु-र्मरीचिदीधितिकराः ।
पादो गभस्तिरुस्रो गौर्ज्योतिर्धामांशुरश्मयः ॥ ७१ ॥

अर्चिर्धिष्णिर्घृणिस्तेजो, भाः प्रभा त्विट् छविर्द्युतिः ।
शोचिर्दीप्तिर्महो वर्च्चो, रोचिर्भा रुग्रुचिर्वसुः ॥ ७२ ॥

शिशिरः शीतलः शीतस्तुषारश्च हिमो जडः ।
उष्णं तिग्मं खरं तीक्ष्णं, चण्डं तीव्रं तथा पटुः ॥ ७३ ॥

मङ्गलोङ्गारको भौम, आरोवक्रः कुजः स्मृतः ।
बुधस्तु सौम्यो ज्ञश्चान्द्रिः, गुरुर्जीवो बृहस्पतिः ॥ ७४ ॥

वाचस्पतिः सुराचार्यो, गीःपतिर्धिषणोङ्गिराः ।
शुक्रो दैत्यगुरुः काव्य, उषना भार्गवः कविः ॥ ७५ ॥

शनिः शनैश्चरः शौरि-र्मन्दश्छायासुतोऽसितः ।
राहुस्तमः सैंहिकेयः, स्वर्भाणुस्तु विधुन्तुदः ॥ ७६ ॥

केतुः शिखी वाहिकः स्यात्, ध्रुवस्तूत्तानपादजः ।
सप्तर्षयोऽत्रि प्रमुखाः, अगस्तिः कुम्भजोऽब्धिपः ॥ ७७ ॥

अश्विन्यादीनि नक्षत्राण्यष्टाविंशतिसङ्ख्यका ।
लग्नानि राशयश्चैव, मेषाद्या द्वादशः स्मृताः ॥ ७८ ॥

अहर्दिनं दिवं घस्रं, दिवसो वासरो दिवा ।
प्रातः प्रभातः प्रत्यूषोमुखं कलयं महर्मुखम् ॥ ७९ ॥

रजनी यामिनी रात्रि-स्त्रियामा शर्वरी निशा ।
निशीथिनी क्षपा दोषा, क्षणदा च विभावरी ॥ ८० ॥

अन्धकारं च तिमिरं, ध्वान्तं संतमसं तमः ।
तमिस्रमन्धतमसं, भूच्छाया तामसं रजः ॥ ८१ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

क्षणं पलं घटी यामः, दिनमासर्तवोऽयनम् ।
संवत्सरो युगं कल्पः, कालस्येत्यादयोऽभिधाः ॥ ८२ ॥

वसन्तग्रीष्मवर्षाश्च, शरद्धेमन्त एव च ।
शिशिरश्चेति विज्ञेया, ऋतवः षड्द्विमासिकाः ॥ ८३ ॥

अब्दः संवत्सरो वर्षं, वत्सरो हायनं शरत् ।
कल्पो युगान्तः संहारः, कल्पान्तः प्रलयः क्षयः ॥ ८४ ॥

दिशा आशा दिशः काष्ठा, हरितः ककुभश्च ताः ।
चतस्रोऽष्टौ दशधा वा, स्युरिन्द्राद्यास्तदीश्वराः ॥ ८५ ॥

पूर्वाग्नेयी दक्षिणा च, नैऋती पश्चिमा तथा ।
वायवी चोत्तरेशानी, ब्राह्मी नागीति ता दश ॥ ८६ ॥

वारिवाहो घनो मेघः, स्तनयित्नुर्घनाघनः ।
अभ्रं तडिद्वान् मुदिरो, जलमुक् जलदोम्बुभृत् ॥ ८७ ॥

धाराधरो जलधरो, धूमयोनिर्बलाहकः ।
जीमूतो वारिदो नभ्राट्, पर्जन्याम्भोधरोम्बुदः ॥ ८८ ॥

विद्युत्सौदामिनी शम्पा, चञ्चला चपला तडित् ।
ऐरावती क्षणरुचि-र्ह्रादिनी च शतह्रदा ॥ ८९ ॥

गर्जितं स्तनितं गर्जी-रसितं मेघनिस्वनम् ।
बप्पीहश्चातकः सारं- गः स्तोकको नभोम्बुपः ॥ ९० ॥

नीलकण्ठः शिखी केकी, मयूरो जलमुक्सुहृत् ।
शिखण्डी बर्हिणो बर्ही, कलापी च भुजङ्गभुक् ॥ ९१ ॥

परपुष्टा परभृता, ताम्राक्षी कोकिला पिका ।
मधुरालापिनी श्यामा, कलकण्ठी वनप्रिया ॥ ९२ ॥

रथाङ्गाह्वश्चक्रवाकः, कोको द्वन्द्वचरश्च सः ।
यामिनीविरहश्चक्रो, रामशापो निशावियुक् ॥ ९३ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जीवंजीवश्चलचञ्चु-श्चकोरो विषसूचकः ।
ज्योत्स्नाप्रियोऽङ्गारभोजी, गुन्दालो विषभीरुकः ॥ ९४ ॥

ताम्रचूडः कुक्कुटश्च, कृकवाकुः शिखण्डिकः ।
प्रभातज्ञो निशावेदी, वृत्ताक्षश्चरणायुधः ॥ ९५ ॥

अनुवादी रक्ततुण्डः, शुकः कीरः फलादनः ।
खञ्जनः खञ्जरीटश्च, निलश्चाषः किकीदिविः ॥ ९६ ॥

हंसो मरालश्चक्राङ्गो, मानसौकाः सितच्छदः ।
हंसभेदा राजहंसा, कदम्बा धार्तराष्ट्रकाः ॥ ९७ ॥

तार्क्ष्यः सुपर्णो गरुडो, वैनतेयोऽरुणाम्बुजः ।
गरुत्मान् पक्षिराजश्च, सर्पारिः काश्यपात्मजः ॥ ९८ ॥

खगो विहङ्गमः पक्षी, विहङ्गो विहगो द्विजः ।
पत्री पतत्री शकुनिः, शकुन्तः शकुनः पतन् ॥ ९९ ॥

विहायो विः पत्ररथो, विकिरः पतगोण्डजः ।
नगौका नीडनिलयः, खचरो विष्किरो वयः ॥ १०० ॥

पक्षश्छब्दो गरुत्पत्रं, पतत्रं च तनूरुहम् ।
वाजोऽस्य पक्षतिर्मूलं, चञ्चुस्त्रोटिः सृपाटिका ॥ १०१ ॥

वायुः समीरणो वातः, समीरो मारुतो मरुत् ।
गन्धवाहो गन्धवहो, मातरिश्वा प्रभञ्जनः ॥ १०२ ॥

सदागतिर्जगत्प्राणो, नभस्वान् पवनोऽनिलः ।
श्वसनः पवमानश्च, पृषदश्वः प्रकम्पनः ॥ १०३ ॥

अहिप्रियो दैत्यदेव, आशुगः स्पर्शनोऽस्य तु ।
पुत्रौ भीमहनूमन्तौ झञ्झा वृष्टियुतो मरुत् ॥ १०४ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ इति श्रीव्योमवर्गः ॥

विष्टपं भुवनं विश्वं, जगल्लोकश्चराचरः ।
मनुष्यलोकः संसारो, नागलोको रसातलम् ॥ १०५ ॥

भूमिर्भूर्वसुधा पृथ्वी, धरित्री धरणी धरा ।
मही वसुंधरा धात्री, क्षोणी क्ष्मा मेदिनी क्षितिः ॥ १०६ ॥

विश्वम्भरा वसुमती, स्थिरानन्ताऽचलावनिः ।
सर्वंसहा क्षमा गोत्रा, काश्यपी सागराम्बरा ॥ १०७ ॥

ऊर्वी ज्याकुर्भूतधात्री, विपुला जगती रसा ।
इला गौ रत्नगर्भा च, पृथिवी सिन्धुमेखला ॥ १०८ ॥

पर्वतः शिखरी क्ष्माभृ-न्नगः शैलोऽचलो गिरिः ।
अद्रिः शिलोच्चयो गोत्रो, भूधरः सानुमान् धरः ॥ १०९ ॥

मेरुर्हिमालयो विन्ध्यः, कैलाशो मलयाचलः ।
उदयाद्री रोहणश्च, लोकालोकादयो नगाः ॥ ११० ॥

नीरं वारि जलं तोयं, पानीयं सलिलं कुशम् ।
अम्भोऽर्णोम्बु पयः पाथः, शम्बरं जीवनं वनम् ॥ १११ ॥

उदकं पुष्करं क्षीर-ममृतं सर्वतोमुखम् ।
कं कबन्धं घनरसं, आपो वाः कमलं विषम् ॥ ११२ ॥

समुद्रः सागरः सिन्धु-रुदधिः सरितांपतिः ।
वारिराशिरकूपारः, सरस्वान् मकरालयः ॥ ११३ ॥

यादःपतिर्जलनिधि-रुदन्वानब्धिरर्णवः ।
रत्नाकरोऽपारपारः, पारावारो नदीश्वरः ॥ ११४ ॥

वीचिमालिर्मितद्रुश्च, जलराशिरपाम्पतिः ।
.............................................. ॥ ११५ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नदी तरङ्गिणी सिन्धु-स्तटिनी निम्नगा धुनी।
स्रोतस्विनी शैवलिनी, स्रवन्ती ह्रदिनी सरित् ॥ ११६ ॥

कूलङ्कषा निर्झरिणी, कर्षूः स्रोतोवहापगा।
रोधोवका जलधिगा, द्वीपवत्यब्धिवल्लभा ॥ ११७ ॥

स्वर्नदी जाह्नवी गङ्गा, त्रिस्रोताः सुरदीर्घिका।
मन्दाकिनी त्रिपथगा, भीष्मसूर्वियदापगा ॥ ११८ ॥

भागीरथी विष्णुपदी, पवित्रा हरशेखरा।
कालिन्दी यमुना शौरी, सूर्यपुत्री यमस्वसा ॥ ११९ ॥

रेवेन्दुजा पूर्वगङ्गा, नर्मदा मेखलाद्रिजा।
............................................... ॥ १२० ॥

ऊर्मिस्तरङ्गः कल्लोलो, भङ्ग उत्कलिकावलिः।
उल्लोलो लहरी वीचि-रावर्तः पयसां भ्रमः ॥ १२१ ॥

ओघः स्रोतः प्रवाहश्च, वेला स्याद् वृद्धिरम्भसः।
कूलं तीरं तटं रोधः, पुलिनं सैकतं च तत् ॥ १२२ ॥

बोहित्थं वहनं पोतो, यानपात्रं वहित्रकम्।
द्रोणी तु मङ्गिनी बेडा, नौका नौस्तरणी तरी ॥ १२३ ॥

उडुपं तु प्लवः कोल-स्तरण्डो भेल इत्यपि।
निर्यामकः कर्णधारो, नाविकः पोतवाहकः ॥ १२४ ॥

पृथुरोमा सङ्चारी, मत्स्यो मीनो झषोण्डजः।
वैसारिणो विसारी च, शम्बरोऽनिमिषस्तिमिः ॥ १२५ ॥

पाठीनः शकली शल्की, रोहितश्च तिमिङ्गिलः।
भेकमण्डुकवर्षाभू-शालूरप्लवदर्दुराः ॥ १२६ ॥

कच्छपः कमठः कूर्मो, दौलेयः कमठी दुलिः।
यादांसि जलजीवाः स्युस्ते नक्रमकरादयः ॥ १२७ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

उदपानं प्रहिः कूप-श्चान्धुर्वापी तु दीर्घिका ।
पुष्करिणी खातकं च, निपानं तु जलाशयः ॥ १२८ ॥

सरस्तडागः कासारः सरसी च सरोवरम् ।
पद्माकरः स एव स्याद्-वेशन्तः पल्वलं लघु ॥ १२९ ॥

कमलं पुष्करं पद्म-मरविन्दं कुशेशयम् ।
अम्भोरुहं तामरसं, राजीवं च महोत्पलम् ॥ १३० ॥

बिशप्रसूनं नलिनं, शतपत्रं सरोरुहम् ।
सहस्रपत्रं जलजं, सरोजं सरसीरुहम् ॥ १३१ ॥

पङ्केरुहं सरसिज-मब्जं वारिजमम्बुजम ।
नालीकं पङ्कजाम्भोजे, कजं चाह्नि विकाशभाक् ॥ १३२ ॥

रक्तोत्पलं कोकनदं, पुण्डरीकं सिताम्बुजम् ।
पद्मिनी च कमलिनी, नलिनी बिशिनीत्यपि ॥ १३३ ॥

अम्भोजिनी नीरजिनी, पङ्कजिन्यब्जिनी स्मृता ।
.................................................. ॥ १३४ ॥

अथोत्पलं कुवलयं, कुमुदं कैरवं सितम् ।
इन्दीवरं च तन्नीलो-त्पलं रात्रिविकाशभाक् ॥ १३५ ॥

कुमुद्वती कुमुदिनी, कैरविणी शशिप्रिया,
दण्डो नालं मृणालं च, बिशं तन्तुश्च तन्तुलम् ॥ १३६ ॥

द्विरेफो भ्रमरो भृङ्गो, रोलम्बोऽलिः शिलीमुखः ।
इन्दिन्दिरश्चञ्चरीकः, षट्पदश्च मधुव्रतः ॥ १३७ ॥

मधुपोऽलीर्मधुकरो, मधुलिट् पुष्पलिट् स्मृतः ।
वल्ली प्रतानिनी वीरुत्, व्रततिर्वल्लरी वला ॥ १३८ ॥

पुष्पं प्रसूनं कुसुमं, सूनं सुमनसः सुमम् ।
मकरन्दः पुष्परसः, परागः पुष्पजं रजः ॥ १३९ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पत्रं पर्णं दलं बर्हं, पलाशं छदनं छदः ।
नवं तत्स्यात्किशलयं, प्रवालं पल्लवो नलः ॥ १४० ॥

फुल्लं विकसितं स्मेरं, प्रबुद्धं विकचं स्मितम् ।
उज्जृम्भितं चोन्मिषितं, हसितं च विजृम्भितम् ॥ १४१ ॥

स्फुटं प्रफुल्लमुत्फुल्लं, विनिद्रं दलितं तथा ।
संकुचितं मीलितं च, निद्राणं मुद्रितं स्मृतम् ॥ १४२ ॥

खण्डमाराम उद्यानं, विपिनं काननं वनम् ।
वाटिकोपवनं दावः, कक्षः कान्तारनिष्कुटौ ॥ १४३ ॥

अटव्यरण्यं गहनं, सान्द्रेकुञ्जो निकुञ्जवत् ।
वृक्षो द्रुमस्तरुः शाखी, पादपश्च महीरुहः ॥ १४४ ॥

अनोकहोंह्रिपः सालः, पलाशी विटपी कुठः ।
अगो नगो मगो द्रुश्च, फलवांश्च वनस्पतिः ॥ १४५ ॥

केतकः केतकी जाती, चम्पको मल्लिका जपा ।
बन्धूको यूथिका कुन्द, इत्याद्याः पुष्पजातयः ॥ १४६ ॥

आम्रो रसालो माकन्दः, सहकारश्चूतनूतवत् ।
रम्भा तु कदली मोचा, समौ करकदाडिमौ ॥ १४७ ॥

गन्धसारो मलयजः, श्रीखण्डश्चन्दनद्रुमः ।
तैलपर्णिकमेवेदं, गोशीर्षं हरिचन्दनः ॥ १४८ ॥

सर्पो भुञ्जगो भुजगः, पन्नगोऽहिर्भुजङ्गमः ।
उरगो जिह्मगो भोगी, दन्दशूकः सरीसृपः ॥ १४९ ॥

दर्वीकरो विषधरो, द्विजिह्वः पवनाशनः ।
काकोदरो दीर्घपृष्टः, वृदाकुः कुण्डली फणी ॥ १५० ॥

आशीविषो गुप्तपदो, व्यालो नागो बिलेशयः ।
चक्षुःश्रवाः काद्रवेयः, सर्पराजस्तु वासुकिः ॥ १५१ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शेषो नागाधिपोऽनन्तः, सहस्रवदनश्च सः ।
विषस्तु गरलं क्ष्वेडो, रसस्तीक्ष्णश्च तद्भिदः ॥ १५२ ॥

हालाहलः कालकूटो, वत्सनागः प्रदीपनः ।
सौराष्ट्रिको ब्रह्मपुत्रः, काकोलो दारदोऽपि च ॥ १५३ ॥

मृगः कुरङ्गो हरिण, एणः सारङ्ग एव च ।
वातायुः कृष्णसारश्च, रुरुमुख्यास्तु तद्भिदः ॥ १५४ ॥

सिंहो मृगेन्द्रः पारीन्द्रो, हर्यक्षः केसरी हरिः ।
कण्ठीरवो महानादो, मृगारिर्नखरायुधः ॥ १५५ ॥

पञ्चाननो गजारातिः, पुण्डरीकस्तु चित्रकः ।
द्वीपी व्याघ्रश्चित्रकायः, शार्दूलः शरभोऽष्टपात् ॥ १५६ ॥

गजो मतङ्गजो हस्ती, मातङ्गः कुञ्जरः करी,
इभः स्तम्बेरमः कुम्भी, दन्ती दन्तवलो द्विपः ॥ १५७ ॥

द्विरदः सिन्धुरो नागः, सामयोनिर्महामृगः ।
अनेकपश्च करटी, करेणुः पीलुवारणौ ॥ १५८ ॥

घोटकस्तुरगो वाजी, तुरङ्गश्च तुरङ्गमः ।
अर्वा वाहो हयः सप्ति-र्गन्धर्वोऽर्वतिरेव च ॥ १५९ ।

काम्बोजाः सैन्धवा देश्या, आजानेया वनायुजाः ।
अश्वा वामी च वडवा, किशोरो बालघोटकः ॥ १६० ॥

अनश्च शकटो गन्त्री, शताङ्गः स्यन्दनो रथः ।
शिबिका याप्ययानं च, दोला प्रेङ्खा सुखासनम् ॥ १६१ ॥

वाहनं धोरणं यानं, पत्रं युग्यङ्गन्त्र्यध्वगम् ।
ध्वजश्च केतनं केतुः, पताका चिह्नमेव च ॥ १६२ ॥

मार्गोऽध्वा निगमः पन्थाः, पदवी वर्त्म पद्धतिः ।
अयनं सरणिः पद्याः, रथ्या वीथी च सञ्चरः ॥ १६३ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

उक्षा गौर्वृषभोऽनड्वान्, भद्रः शाक्करशाक्वरौ ।
बलीवर्दः सौरभेयः, ककुद्मान् शांकरो वृषः ॥ १६४ ॥

सुरभिर्गौरनड्वाही, सौरभेयी च रोहिणी ।
तम्पा तम्बार्जुनी धेनु-र्माहेयी च निलिम्पिका ॥ १६५ ॥

क्रमेलकोष्ट्रकरभा, दासेरः कण्टकाशनः ।
वराहः शूकरः कोलो, गर्दभो रासभो खरः ॥ १६६ ॥

कुर्कुरः सारमेयः श्वा, भषणः श्वानमण्डलौ ।
शाखामृगो मर्कटश्च, वनौका वानरः कपिः ॥ १६७ ॥

शृगालो जम्बूकः क्रोष्ट्र, फेरुगोमायुफेरवाः ।
उरभ्रो मेण्ढको मेष, एडको विहुडोरुणाः ॥ १६८ ॥

अजस्तुच्छगलश्छाग-श्छगो वस्तः स्तभः पशुः ।
अग्निर्वह्निर्बृहद्भानु-र्दहनो ज्वलनोऽनलः ॥ १६९ ॥

वैश्वानरः कृष्णवर्त्मा, चित्रभानुर्धनञ्जयः ।
आशुशुक्षणिरप्पित्तं, जातवेदा हुताशनः ॥ १७० ॥

हव्यवाहो हुतवहो, बर्हिः शुष्मा विभावसुः ।
आश्रयासो वायुसखः, पावको हुतभुक् शिखी ॥ १७१ ॥

वृषाकपिर्वीतिहोत्रः, कृशानुश्छागवाहनः ।
हिरण्यरेताः सप्तार्चिः, शोचिष्केशस्तनूनपात् ॥ १७२ ॥

कृपीटयोनिर्दमुना, रोहिताश्व उषर्बुधः ।
स्वाहापतिः शुचिः शुक्रः, बर्हिर्ज्योतिर्विरोचनः ॥ १७३ ॥

ज्वालाजिह्वः सप्तमन्त्रः, शुष्मा धूमध्वजोऽपि च ।
वडवानल ऊर्वश्च, वाडवो वडवामुखः ॥ १७४ ॥

संवर्तकः समुद्राग्निः दवो दावो वनानलः ।
सुवर्णं कनकं स्वर्णं, हिरण्यं हेम काञ्चनम् ॥ १७५ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चामीकरं शातकौम्भं, गाङ्गेयं भर्म हाटकम् ।
कार्त्तस्वरं जातरूपं, कलधौतं च कर्बुरम् ॥ १७६ ॥

तपनीयं च कल्याणं, रुक्मं जाम्बूनदं वसु ।
अष्यपदं भूरिचन्द्रो, महारजतभूत्तमे ॥ १७७ ॥

दुर्वर्णं रजतं रूप्यं, तारं खर्जूरमित्यपि ।
रत्नं वसु मणिस्तस्य, भेदा मरकतादयः ॥ १७८ ॥

वैडूर्यवज्रमाणिक्य-नीलमौक्तिकविद्रुमाः ।
द्रव्यं स्वं द्रविणं वित्तं, द्युम्नं रा विभवो धनम् ॥ १७९ ॥

अर्थो लक्ष्मीः स्वापतेयं, रिक्थमृद्धं तथा वसु ।
भूतिर्विभूतिरैश्वर्य-मणिमादिकमष्टधा ॥ १८० ॥

अणिमा महिमा चैव, गरिमा लघिमा तथा ।
प्राप्तिः प्राकाम्यमीशित्वं, वशित्वं चाष्टसिद्धयः ॥ १८१ ॥

महापद्मस्तथा पद्मः, शङ्खो मकरकच्छपौ ।
मुकुन्दकुन्दनीलाश्च, चर्चाश्च निधयो नव ॥ १८२ ॥

॥ इति श्रीधरावर्गः ॥

अस्यां श्रीनामामालायां, हर्षकीर्तिकवेः कृतौ ।
देवव्योमधरावर्गैः, काण्डोऽयं प्रथमोऽजनि ॥ १ ॥

इति श्रीमन्नागपुरीयतपागच्छाधिराजश्रीहर्षकीर्तिसूरि विरचितायां
शारदीयाभिधायां लघुनाममालायां प्रथमः काण्डः समाप्तः ॥

मनुष्यो मानवो मर्त्यो, मनुजो मानुषो नरः ।
ना विट् पञ्चजनो भूस्पृक्, पुरुषः पूरुषः पुमान् ॥ १८३ ॥

स्त्री नारी वनिता योषा, ललना महिलाऽबला ।
कामिनी भामिनी रामा, रमणी च नितम्बिनी ॥ १८४ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अङ्गना मानिनी योषि-द्वर्णिनी वामलोचना ।
कला सीमन्तिनी भीरूः, सुन्दरी युवतिवशा ॥ १८५ ॥

मुगाक्षी प्रमदा भामा, मुग्धा वामा विलासिनी ।
कृशोदरी पुरङ्ध्री च, तन्वी लीलावती वधूः ॥ १८६ ॥

इन्दीवराक्षी तरुणी, श्यामा मन्देक्षणापि च ।
वामाक्षी मदिराक्षी च, सुभगा तरलेक्षणा ॥ १८७ ॥

उपयामः परिणयो, विवाहः पाणिपीडनम् ।
पाणिग्रहणमुद्वाहो, दारकर्म विवाहनम् ॥ १८८ ॥

भर्ता विवोढा रमणो, भोक्ता नाथः पतिर्धवः ।
वरो वरयिता कान्तो, वल्लभो दयितः प्रियः ॥ १८९ ॥

प्राणेशः प्रणयी प्रेयान्, प्रेष्ठः प्राणसमोऽभिकः ।
प्रीतः प्रियतमः सेक्ता, आर्यपुत्रश्च नायकः ॥ १९० ॥

भार्या सहचरी पत्नी, वल्लभा प्रेयसी प्रिया ।
कान्ता जाया जनी जाती, गृहदारा परिग्रहः ॥ १९१ ॥

ऊढा पाणिगृहीती च, कलत्रं गृहिणी वधूः ।
दयिता च प्रियतमा, विनीता च सधर्मिणी ॥ १९२ ॥

हृदयेशा प्राणसमा, प्रेष्ठा प्रणयिनी च सा ।
कुटुम्बिनी गेहिनी च, नायिकाथ स्नुषा वधूः ॥ १९३ ॥

पिता तु जनकस्तातो, वप्ता जनयितापि च ।
अम्बा माता सवित्री च जनयित्री जनन्यपि ॥ १९४ ॥

नन्दनस्तनयः पुत्रो, दारकः सूनुरुद्वहः ।
सुतोङ्गज आत्मश्च, पुत्री तु दुहिता सुता ॥ १९५ ॥

बालः स्तनन्धयः पोतः, पाको डिम्भोऽर्भकः शिशुः ।
कुमारः पृथुकः शावः, क्षीरकण्ठः किशोरकः ॥ १९६ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कुमारी कन्यका कन्या, बालिका दिक्करी कनी ।
तोकापत्ये प्रसूतिस्तुक्, संतानं संततिः प्रजा ॥ १९७ ॥

भ्राता सहोदरो बन्धुः, सहजो बान्धवोऽपि च ।
भगिनी तु स्वसा जामिः, दम्पती दयितापती ॥ १९८ ॥

वंशोऽन्वयः कुलं गोत्रं, जननाभिजने अपि ।
सती पतिव्रता साध्वी, दासी चेटी च चेटिका ॥ १९९ ॥

दूति सञ्चारिका चुन्दी, कुट्टिनी सम्भली समा ।
पण्यस्त्री गणिका वेश्या, रूपाजीवा पणाङ्गना ॥ २०० ॥

असती पांशुलाऽशीला, स्वैरिणी कुलटेत्वरी ।
पुंश्चली बन्धकी धृष्टा, चर्षणी व्यभिचारिणी ॥ २०१ ॥

मित्रं सखा सहचरो, वयस्यः सवयाः सुहृत् ।
आली सखी वयस्या च, सध्रीची सहचारिणी ॥ २०२ ॥

शरीरं विग्रहो देहो, गात्रं क्षेत्रं तनुस्तनूः ।
अङ्गः कायो वपुर्वर्ष्म, मूर्तिर्वेरं कलेवरम् ॥ २०३ ॥

संहननं घनो बन्धः, पुरं पिण्डं च पुद्गलम् ।
हृषीकमक्षं करणं, ग्रहणं च खमिन्द्रियम् ॥ २०४ ॥

आत्मा जीवोऽसुमान् जन्तुर्देही प्राणी च चेतनः ।
जन्तुः शरीरी पुरुषो, हंसः सत्त्वं पुनर्भवी ॥ २०५ ॥

स्वान्तं चित्तं मनश्चेतो, मानसं हृदयं च हृत् ।
अन्तःकरणमप्यस्य, संकल्पश्च मनोरथः ॥ २०६ ॥

शीर्षकं मस्तकं मुण्डं, मौलिर्मस्तं च मस्तकः ।
उत्तमाङ्गं शिरो मूर्धा, करणत्राणमेव च ॥ २०७ ॥

केशा बालाश्च चिकुरा, अलकाः कुन्तलाः कचाः ।
शिरोरुहास्तीर्थवाका, मूर्धजास्तत्समुच्चये ॥ २०८ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

केशात्कलापरचना, पाशभारोच्चया अपि ।
कबरी वेणिका वेणी, धम्मिला गुम्फिताः कचाः ॥ २०९ ॥

केशेषु वर्त्म सीमन्तः, कुरुलो भ्रमरालकः ।
शिखा शिखण्डिका चूडा, बालानं काकपक्षकम् ॥ २१० ॥

मुखकेशाः श्मश्रु कूर्चः, लोमा रोम तनूरुहम् ।
रोमावली रोमलता, रोमराजिर्हृदूदरे ॥ २११ ॥

मुखं तु वदनं वक्त्रं, तुण्डमास्यं तथाननम् ।
ललाटमलिकं भालं, गोध्यलीके ललाटिका ॥ २१२ ॥

कर्णः श्रोत्रं श्रवणं च, शब्दग्राहः श्रुतिः श्रवः ।
नक्रं तु नासिका नाशा, घ्राणं घोणा च शिङ्घिनी ॥ २१३ ॥

नयनं लोचनं नेत्र-मीक्षणं चक्षुरम्बुकम् ।
अक्षि दृग्दृष्टिरस्यान्त – स्तारका च कनीनिका ॥ २१४ ॥

अर्धदृक्वीक्षणं काक्षः, कटाक्षोऽपाङ्गदर्शनम् ।
क्रोधोद्भ्रुवो विकारो यो, भृकुटिर्भ्रुकुटीश्च सा ॥ २१५ ॥

पक्ष्म स्यान्नेत्ररोमाणि, भ्रूरू(धः?)र्ध्वं रोमपद्धतिः ।
गल्लो गण्डो कपोलश्च, चिबुकं त्वधरादयः ॥ २१६ ॥

ओष्ठोऽधरो दन्तवस्त्रं, तथा च रदनच्छदः ।
रदना दशना दन्ता, द्विजा दंशा रदा अपि ॥ २१७ ॥

जिह्वा रसज्ञा रसना, कण्ठो निगरणो गलः ।
अंशः स्कन्धो भुजशिरः, बाहुर्बाहा च दोर्भुजः ॥ २१८ ॥

हस्तः करः शयः पाणिः, पञ्चशाखश्च स स्मृतः ।
अङ्गुल्यः करशाखाः स्युः, तथाङ्गुष्ठाङ्गुलौ समौ ॥ २१० ॥

कामाङ्कुशो महाराजः,, करजो नखरो नखः ।
करशूकः कररुहो, भुजाकण्टः पुनर्भवः ॥ २२० ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शिरोधिः कन्धरा ग्रीवा, धमनिश्च शिरोधरा ।
उरो हृद् हृदयं वक्षः, स्तनान्तरभुजान्तरे ॥ २२१ ॥

स्तनौ कुचावुरोजौ च, वक्षोजौ च पयोधरौ ।
उदरं जठरं तुण्डं, पिचण्डं कुक्षिरेव च ॥ २२२ ॥

त्रिवलिस्तूदरे रेखा, नाभिः स्यात् तुन्दकूपिका ।
अङ्कस्तु क्रोड उत्संगः, पृष्ठं वंशस्त्रिकं तथा ॥ २२३ ॥

मध्योऽवलग्नं विलग्नं, मध्यमो लङ्क एव च ।
काञ्चीपदं कटिः श्रोणिः, कटीरं च ककुद्मती ॥ २२४ ॥

अधो नितम्ब आरोहः, स्त्रीकट्या जघनं पुरः ।
उपस्थं च भगो योनिः, स्त्रीचिन्हं स्मरमन्दिरम् ॥ २२५ ॥

पुंश्चिन्हं मेहनं मेढ्रं, शिश्नं शेफ इति स्मृतम् ।
अपानं तु गुदं पायुः, ऊरुः सक्थि समे उभे ॥ २२६ ॥

जानूरुपर्वा ऽष्ठीवत्, प्रतिजङ्घा तु पिण्डिका ।
पादः पदोंह्रिश्चरणः, चलनः क्रमणः क्रमः ॥ २२७ ॥

मण्डनं स्यादलङ्कारो, भूषणाभरणे अपि ।
शीर्षाभरणं शीर्षण्यश्चूडामणिः शिरोमणिः ॥ २२८ ॥

मौलिः किरीटं कोटीर-मुष्णीषं मुकुटं तथा ।
आपीडशेखरोत्तंसा-वतंसाः शिरसः स्त्रजि ॥ २२९ ॥

ललामकं ललाटस्थं, कर्णपुरं तु कर्मगम् ।
तिलकं तमालपत्रं, चित्रं पुण्ड्रं विशेषकम् ॥ २३० ॥

पत्रलेखा पत्रलता, पत्रभङ्गी ललाटिका ।
ताडङ्कस्तु ताडपत्रं, कुण्डलं कर्णवेष्टनम् ॥ २३१ ॥

नासानामग्रतः पुष्पमाभरणं च मौक्तिकम् ।
अञ्जनं कज्जलं चैव, ताम्बूलं मुखरञ्जनम् ॥ २३२ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ग्रैवेयकण्ठाभरणे, कण्ठसूत्रं च कण्ठिका ।
हारो मुक्तावली मुक्ता-माला मुक्ताकलापकम् ॥ २३३ ॥

हारमध्यमणिः प्रोक्तो, नायकस्तरलोऽपि च ।
केयूरमङ्गदं बाहु-रक्षकं बाहुभूषणम् ॥ २३४ ॥

कटको वलयावापौ, कङ्कणं करभूषणम् ।
ऊर्मिका मुद्रिका मुद्रा, ऽभिज्ञानं चाङ्गुलीयकम् ॥ २३५ ॥

रशना मेखला काञ्ची, कलापश्चापि सप्तकी ।
कटीसूत्रं सारसनं, किङ्किणी क्षुद्रघण्टिका ॥ २३६ ॥

मञ्जीरं पादकटकं, तुलाकोटिश्च नूपुरम् ।
हंसकं शिञ्जिनी चेति, यावकोऽलक्तकः स्मृतः ॥ २३७ ॥

माला स्रग् दाम माल्यं च, स्नानं मज्जनमाप्लवः ।
चार्चिक्यं समालभनं, अङ्गरागो विलेपनम् ॥ २३८ ॥

अंशुकं वसनं वस्त्रं, वासश्चीवरमम्बरम् ।
पटश्च सिचयश्चेलं, वस्त्रस्यान्तोञ्चलः स्मृतः ॥ २३९ ॥

क्षौमं दुकूलं दुगूलं, पट्टकूलं पटोत्तमम् ।
वेषो नेपथ्यमाकल्पं, उष्णीषो मूर्धवेष्टनम् ॥ २४० ॥

प्रावार उत्तरासंगो, वैकक्षं वृतिकापि च ।
परिधानं वेष्टनकं, कच्छा तत्पश्चिमाञ्चलम् ॥ २४१ ॥

कक्षापटस्तु कौपीनं, नक्तकः कर्पटोऽपि च ।
प्रच्छादनं प्रावरणं, संव्यानं चोत्तरीयकम् ॥ २४२ ॥

कूर्पासः कञ्चुकश्चैव, चोलः कञ्चुलिकाङ्गिका ।
चण्डातकं चलनकं, शाटी चोटी च शाटिका ॥ २४३ ॥

अन्तरीयं निवसनं, परिधानमधोंशुकम् ।
नीवी तद्बन्धनं ग्रन्थिः, प्रालम्बं झूम्बणं समे ॥ २४४ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चूर्णानि वासयोगाः स्युः , पिष्टान्तः पटवासकः ।
वस्त्रादेर्यः सुगन्धाद्यैः, संस्कारः सोऽधिवासनम् ॥ २४५ ॥

आमोदश्च परिमलो, गन्धो वासो विमर्दजः ।
इष्टगन्धिः सुगन्धिः स्यात्, सुरभिर्घ्राणतर्पणः ॥ २४६ ॥

कुङ्कुमं घुसृणं वर्णं, रक्तं काश्मीरजन्म च ।
श्रीखण्डो मलयजश्च, गोशीर्षं चन्दनं स्मृतम् ॥ २४७ ॥

कर्पूरो घनसारश्च, चन्द्राख्यो हिमवालुका ।
कस्तूरिका मृगमदो, मृगनाभिर्मृगाण्डकः ॥ २४८ ॥

कस्तूरी गन्धधूली च, मदनी मृगनाभिजा ।
........................................... ॥ २४९ ॥

कृष्णागुरुः काकतुण्डो, राजार्हं वंशिकागुरु ।
चोवाद्वयं तस्य सत्वं, तद्रूपो देववल्लभः ॥ २५० ॥

परिकर्माङ्गसंस्कारो, मण्डनं च प्रसाधनम् ।
दर्पणो मुकुरादर्शौ, व्यजनं तालवृन्तकम् ॥ २५१ ॥

शोभा कान्तिर्विभूषा श्रीर्लक्ष्मीश्छाया द्युतिश्छविः ।
राढाभिख्या च लावण्यं, सुषमा विभ्रमोऽपि च ॥ २५२ ॥

॥ इत्यङ्गवर्गः ॥

मन्दिरं सदनं सद्म, निलयो भवनं गृहम् ।
ओको निवास आवासो, धिष्ण्यं धाम निकेतनम् ॥ २५३ ॥

आगारं वेश्म वसतिर्निशान्तं शरणं क्षयः ।
प्रासाद आलयः सौधं, हर्म्यं गेहं कूटाश्रयौ ॥ २५४ ॥

गर्भागारोऽपवरकः, मण्डपो जनताश्रयः ।
भाण्डागारः कोशकौषौ, प्राङ्गणं चत्वराजिरे ॥ २५५ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अट्टमट्टालकौ क्षौमं, गृहस्योपरिभूमिका ।
चित्रशाला चतुर्द्वारं, चन्द्रशाला शिरोगृहम् ॥ २५६ ॥

शय्यागृहं वासगृहं, क्रीडासद्म रतास्पदम् ।
वातायनं गवाक्षश्च, जालको लघुमण्डपः ॥ २५७ ॥

दीपो गृहमणिर्ज्योतिः, प्रदीपः कज्जलध्वजः ।
आसनं विष्टरं पीठं, भद्रासनं तदुत्तमम् ॥ २५८ ॥

खट्वापर्यङ्कपल्यङ्का-ष्टशल्यामञ्चमञ्चकाः ।
शय्या च शयनं तल्पं,, शयनीयं च तूलिका ॥ २५९ ॥

उच्छीर्षकमुपधान-मुपबर्हं च गिन्दुकः ।
चन्द्रोदयो वितानं चोल्लोचः कन्दक इत्यपि ॥ २६० ॥

आलिङ्गनं परिष्वङ्गः, संश्लेष उपगूहनम् ।
अङ्कपालिः परिरम्भो, मेलकः संगसंगमौ ॥ २६१ ॥

मैथुनं कामकेलिश्च, संभोगः सुरतं रतम् ।
रहोरतिर्निधुवनं, ग्राम्यधर्मश्च मोहनम् ॥ २६२ ॥

क्रीडा लीला विलासश्च, केलिर्नर्मरतिर्द्रवः ।
स्नेहः प्रीतिः प्रेमरागौ,, प्रणयः प्रश्रयोऽपि च ॥ २६३ ॥

अजर्यं सा सप्तपदी, मैत्री सख्यं च सौहृदम् ।
....................................................... ॥ २६४ ॥

लज्जा त्रपा व्रीडा ह्रीश्च, मन्दाक्षं स्यादपत्रपा ।
हासस्तु हासिका हास्यं, हसनं हसितं स्मितम् ॥ २६५ ॥

हर्षः प्रमोद आनन्दा-ह्लादौ मुन्मोदसंमदाः ।
तुष्टः प्रीती रतिः स्वास्थ्यं, संतोषो निर्वृतिर्धृतिः ॥ २६६ ॥

शान्तं सौख्यं सुखं शर्म, शं शाता शुभवेदनम् ।
विधिश्च नियतिर्दिष्टं,, दैवं भाग्यं शुभोच्चयः ॥ २६७ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दयानुकम्पा करुणा-नुक्रोशश्च कृपा घृणा ।
प्रसन्नता प्रसत्तिश्च, प्रसादोऽनुग्रहो हितम् ॥ २६८ ॥

भावो मतमभिप्राय-श्छन्द आकूत आशयः ।
शीलं स्वभावः सहजो, निसर्गः प्रकृती रुचिः ॥ २६९ ॥

आश्चर्यमद्भुतं चित्रं, विस्मयश्चोद्यमित्यपि ।
कौतूहलं च कुतुकं, कौतुकं च कुतूहलम् ॥ २७० ॥

लोभस्तृष्णा स्पृहा लिप्सा, काङ्क्षा स्नेहा च लालसा ।
कामस्तर्षोऽभिलाषस्तृ-डिच्छा वाञ्छा मनोरथः ॥ २७१ ॥

गर्वोऽभिमानोऽहङ्कारो, मानश्चित्तसमुन्नतिः ।
हठो मदः स्मयो दर्प, औद्धत्यमवलिप्तता ॥ २७२ ॥

कोपः क्रोधोऽमर्षरोषौ, प्रतिषो मन्युरुट् क्रुधः ।
ईर्ष्यासूयाभिषङ्गश्च, संरम्भोऽक्षान्तिरक्षमा ॥ २७३ ॥

कैतवं कपटं दम्भः, कूटं छद्मोपधिस्छलम् ।
व्यपदेशो मिषं व्याजं, निभं लक्ष्यं बलं च तत् ॥ २७४ ॥

माया तु शठता शाठ्यं, वञ्चनं विप्रतारणम् ।
शङ्कातङ्कौ दरस्त्रासो, भीतिर्भीः साध्वसं भयम् ॥ २७५ ॥

निद्रा तन्द्रा प्रमीला च, स्वापः संवेशसंलपौ ।
उपांशु छन्नमेकान्तं, विचित्कं विजनं रहः ॥ २७६ ॥

प्रस्तावोऽवसरो वेला, वारश्च समयः क्षणः ।
आगोऽपराधो मन्तुश्च, व्यलीकं विप्रियाहिते ॥ २७७ ॥

विप्रलम्भो विप्रयोगो, वियोगो विरहः स्मृतः ।
रोदनं रुदितं क्रन्दो, विलापः परिदेवनम् ॥ २७८ ॥

बाष्पोऽस्रमश्रु नेत्राम्बु, घर्मः स्वेदः श्रमाम्बु च ।
पुलकः कण्टको रोम, हर्षो रोमाञ्च इत्यपि ॥ २७९ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

उत्कण्ठोत्कलिकौत्सुक्यं, हृल्लेखा ऽऽयल्लकारती ।
मौनं वाऽजल्पनं तूष्णीं, चिन्तनं स्मरणं स्मृतिः ॥ २८० ॥

शोकः शुक् शोचनं खेदः, पश्चात्तापोऽप्यनिर्वृत्तिः ।
विषाद आधिरुद्वेगश्चिन्ता कम्पस्तु वेपथुः ॥ २८१ ॥

दुःखं कष्टं व्यथा पीडा, वेदना यातनाऽसुखम् ।
कृच्छ्रं बाधार्तिराभीलं, विधुरं व्यसनं विपत् ॥ २८२ ॥

प्रयासायासव्यायामाः, ग्लानिः खेदः क्लमः श्रमः ।
व्यर्थं वृथा मुधा मोघं,, निष्फलं च निरर्थकम् ॥ २८३ ॥

शाप आक्रोश आक्षेपः, भर्त्सनं तर्जनं च धिक् ।
परिभाषमुपालम्भः, शपथः शपनं शपः ॥ २८४ ॥

अवधिः पूर्णता सीमा मर्यादा धारणा स्थितिः ।
वार्ता प्रवृत्तिर्वृत्तान्त, उदन्तः किंवदन्त्यपि ॥ २८५ ॥

संदेशो वाचिकं वाच्यं, लेखः पत्रं च पत्रिका ।
प्रसादनमनुनयः, सान्त्वनं चटु चाटु च ॥ २८६ ॥

व्याहारो भाषितं चोक्तिर्वाग्वाक्यं वचनं वचः ।
प्रश्नः पृच्छानुयोगश्च, प्रतिवाच्यं तदुत्तरम् ॥ २८७ ॥

॥ इति संभोगादिवर्गः ॥

गीतं नृत्यं च वादित्रं, त्रयं संगीतमुच्यते ।
गीतं गानं गेयं गीति-र्नादो गान्धर्व एव च ॥ २८८ ॥

नर्तनं नाटकं नृत्यं, लास्यं नाट्यं च ताण्डवम् ।
अङ्गहारोऽङ्गविक्षेपो, व्यञ्जकोऽभिनयो लयः ॥ २८९ ॥

षड्जऋषभगान्धारा, मध्यमः पञ्चमस्तथा ।
धैवतो निषधः सप्त-स्वरास्तन्त्र्यादिषूद्भवाः ॥ २९० ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

द्रुतं विलम्बितं मध्य-मिति गीते त्रयो लयाः ।
ग्रामघोरा मन्दतारा, तालाश्च चपुटादयः ॥ २९१ ॥

सप्तस्वरास्त्रयो ग्रामा-मूर्छनाश्चैकविंशतिः ।
ताना एकोनपञ्चाशत्तालाः स्युर्हि चतुर्मिताः ॥ २९२ ॥

वाद्यं वादित्रमातोद्यं, तूर्यं तूरः स्मरध्वजः ।
ततं वीणाप्रभृतिकं, कांस्यतालादिकं घनम् ॥ २९३ ॥

वंश्यादिकं तु शुषिर-मानद्धं मुरजादिकम् ।
विपञ्ची वल्लकी वीणा, मुरली वंशवेणवः ॥ २९४ ॥

मृदङ्गो मुरजश्चैव, मर्दलः पुष्करस्त्रिधा ।
........................................... ॥ २९५ ॥

स्याद्यशःपटहो ढक्का, भेरी दुन्दुभिरानकः ।
वाद्यभेदाः शंखताल-झल्लरी-पटहादयः ॥ २९६ ॥

शृङ्गारहास्यकरुणा रौद्रवीर भयानकाः ।
बीभत्सश्चाद्भुतशान्ता-वेते नव रसाः स्मृताः ॥ २९७ ॥

मभजसानरयता, गणा अष्ट लघुर्गुरुः ।
एकद्विचतुःषट्स्वरै-र्द्रुतो लघुर्गुरुः प्लुतः ॥ २९८ ॥

आदिमध्यावसानेषु, भजसा यान्ति गौरवम् ।
यरता लाघवं यान्ति, मस्त्रिगुरुर्लघुस्त्रिकः ॥ २९९ ॥

न स्यात्पञ्चस्वरान्न्यूनं, पञ्चभिः षाण्डवं स्मृतम् ।
षट्स्वरैश्चौडवं प्रोक्तं, संपूर्णं चैव सप्तभिः ॥ ३०० ॥

पण्डितः कोविदः प्राज्ञो, धीमान् विद्वान् बुधः सुधीः ।
कृती मनीषी मेधावी, कविः शूरो विशारदः ॥ ३०१ ॥

कृष्टिर्विपश्चित्संख्यावान्, दोषज्ञो ज्ञो विचक्षणः ।
प्रवीणश्चतुरो विज्ञो, विदग्धः कुशलः पटुः ॥ ३०२ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

निष्णातो निपुणो दक्षो, लब्धलक्षः सुशिक्षितः ।
छेको नागरिकः सुज्ञो, वाग्मी व्युत्पन्न एव च ॥ ३०३ ॥

मूर्खो मन्दो जडो मूढो, बालोऽज्ञो जाल्मबालिशौ ।
शठः कुण्ठश्च बठरो, निर्बुद्धिश्च निरक्षरः ॥ ३०४ ॥

उपाध्यायोऽध्यापकश्चो-पदेष्टा पाठको गुरुः ।
अचार्यः शिक्षकः शास्ताऽनूचानः साङ्गशास्त्रवित् ॥ ३०५ ॥

शिष्यश्छात्रो विनेयोन्तेवासी शैक्षश्च दीक्षितः ।
आस्तिकः श्रावकः श्राद्धः, स्यात् श्रद्धालुरुपासकः ॥ ३०६ ॥

यती यतिर्मुनिः साधु-स्तपस्वी संयतो व्रती ।
भिक्षुर्मुमुक्षुर्निर्ग्रन्थः, ऋषिर्योगी च संयमी ॥ ३०७ ॥

नतिः प्रणामः प्रणतिर्नमस्कारोऽभिवादनम् ।
वन्दनं प्रणिपातश्च, नमस्या च नमस्क्रिया ॥ ३०८ ॥

भक्तिः सेवा च शुश्रूषा, परिचर्या प्रसादना ।
वरिवस्याराधनोपास्तिर्विनयः समुपासनम् ॥ ३०९ ॥

पूजार्हणा सपर्यार्चोऽपहारोपचितिर्बलिः ।
सन्मानादरसत्कारा, अभ्युत्थानं च गौरवम् ॥ ३१० ॥

उपाग्राह्यं ढौकनिका, प्राभृतोपायनोपदाः ।
आज्ञा नियोग आदेशो, निर्देशः शासनं वचः ॥ ३११ ॥

वाचा सन्धा प्रतिज्ञाऽऽगूः, संगरः संविदाश्रयः ।
आम्नायः संप्रदायश्च, गुरुक्रमः परम्परा ॥ ३१२ ॥

प्रशंसा वर्णना श्लाघा, स्तवः स्तोत्रं स्तुतिर्नुतिः ।
कीर्तिः श्लोको यशो वर्णं, साधुवादः समज्ञका ॥ ३१३ ॥

अपक्रोशोऽवर्णवादः, कौलीनं वचनीयता ।
जुगुप्सा गर्हणा निन्दा, निर्वादश्चापवादवत् ॥ ३१४ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अनादरः परिभवो, रीढावज्ञा तिरस्क्रिया ।
अवहेलावगणना, स्ताक्ष्णी चापमानता ॥ ३१५ ॥

अभिधानं नामधेयं, नामाख्याह्वाह्वयोभिधा ।
गोत्रं संज्ञाथ संबुद्धिर्हूतिराकारणं हवः ॥ ३१६ ॥

अर्थना प्रार्थना याच्ञा, दानं त्यागो विसर्जनम् ।
विश्राणनं वितरणं, स्पर्शनं प्रतिपादनम् ॥ ३१७ ॥

याचकस्तर्कको ग्राही, मार्गणोऽर्थी वनीपकः ।
धर्मः पुण्यं वृषः श्रेयः, सुकृतं शुभकर्म च ॥ ३१८ ॥

किल्विषं कल्मषं पाप-मेनः पाप्मा च पातकम् ।
दुरितं वृजिनं पङ्क-मघमंहश्च दुष्कृतम् ॥ ३१९ ॥

असत्यं वितथं कूटं, मिथ्यालीकं मृषानृतम् ।
सत्यं तथ्यमृतं सम्यक्, सूनृतं च यथास्थितम् ॥ ३२० ॥

विधिः कल्पाचारमार्गा, वृत्तं शीलं स्वभाववत् ।
क्षान्तिः क्षमा तितिक्षा च,, तपस्या नियमस्तपः ॥ ३२१ ॥

उपवासश्चौपवस्त्रं, व्रतं नियमपालनम् ।
समाधिर्धारणा ध्यानं, प्रणिधानं च चिन्तनम् ॥ ३२२ ॥

बुद्धिर्मेधा मतिः प्रज्ञा, धिषणा धीश्च शेमुषी ।
मनीषा प्रतिभा ज्ञप्तिः, प्रेक्षा पण्डा च चेतना ॥ ३२३ ॥

चित्संविद् ज्ञानसंवित्ती, भगं बोधोपलब्धयः ।
तत्त्वं रहस्यं सारश्च, परमार्थश्च निश्चयः ॥ ३२४ ॥

सिद्धान्तागमराद्धान्त-कृतान्ताप्तोक्तयः श्रुतम् ।
समयः प्रवचनं सूत्रं, ग्रन्थः शास्त्रं च पुस्तकम् ॥ ३२५ ॥

स्वाध्यायः पठनं पाठोऽधीतिरध्ययनं पठः ।
जाप्यं जापो जपो मन्त्रो, मानसे वचनेऽपि च ॥ ३२६ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शब्दो नादः ध्वनिर्ध्वानं, निर्घोषो निस्वनः स्वनः ।
निह्राद आरवो रावो, निनादो निनदोऽपि च ॥ ३२७ ॥

प्रतिनादः प्रतिशब्दः, प्रतिध्वनिः प्रतिश्रुतिः ।
निदानं कारणं हेतुः, कृत्यमर्थः प्रयोजनम् ॥ ३२८ ॥

दैवज्ञो गणको ज्ञानी, मौहूर्तिको निमित्तवित् ।
सांवत्सरो ज्योतिषिको, ज्योतिर्वित् प्रश्नविच्च सः ॥ ३२९ ॥

चिकित्सको भिषग्वैद्योऽगदङ्कारश्च रोगहृत् ।
चिकित्सितज्ञो दोषज्ञ, आयुर्वेदस्तु वैद्यकम् ॥ ३३० ॥

ऋग्वेदश्च यजुर्वेदः, सामवेदोऽप्यथर्वणः ।
शिक्षा कल्पं व्याकरणं, छन्दो ज्योतिर्निरुक्तयः ॥ ३३१ ॥

षडङ्गी वेदाश्चत्वारो, मीमांसान्वीक्षिकी तथा ।
धर्मशास्त्रं पुराणं च, विद्या एताश्चतुर्दश ॥ ३३२ ॥

देवालयो देवगृहं, चैत्यमायतनं मठः ।
बिम्बं मूर्तिः प्रतिमा च, महः पर्व महोत्सवः ॥ ३३३ ॥

जैना मीमांसका बौद्धाः, शैवा वैशेषिका अपि ।
नैयायिकाश्च मुख्यानि, दर्शनानीह सन्ति षट् ॥ ३३४ ॥

मोक्षोऽपवर्गो निर्वाणं, मुक्तिर्निःश्रेयसं शिवः ।
महोदयोऽमृतं सिद्धिः, कैवल्यमपुनर्भवः ॥ ३३५ ॥

कुशलं मङ्गलं मद्रं, कल्याणं भावुकं शुभम् ।
क्षेमं भव्यं शिवं श्रेयः, शस्तं स्वः श्रेयसं स्मृतम् ॥ ३३६ ॥

स्वागतं स्वस्ति भद्रं च, स्वास्थ्यं वार्तमनामयम् ।
सदा ददातु सानन्दं, चिदानन्दो जगत्प्रभुः ॥ ३३७ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अङ्गसम्भोगसङ्गीत-पण्डिताद्यैः सुसंस्कृतैः ।
वर्गैर्द्वितीयकाण्डोऽयं, विदधे हर्षकीर्त्तिना ॥ ३३८ ॥

॥ इति श्रीमन्नागपुरीयतपगच्छे श्रीहर्षकीर्तिसूरिविरचितायां शारदीयाभिधायां लघुनाममालायां द्वितीयः काण्डः समाप्तः ॥

ब्राह्मणाः क्षत्रिया वैश्याः, शूद्रा वर्णचतुष्टयम् ।
ब्रह्मचारी गृही वान-प्रस्थो भिक्षुरिहाश्रमाः ॥ ३३९ ॥

ब्रह्मचारी तु वर्णी स्यात्, गृहस्थः स्नातको गृही ।
वैषानसो वानप्रस्थो, भिक्षुः सांन्यासिको यतिः ॥ ३४० ॥

परिव्राट् पारिरक्षी च, परिव्राजकतापसौ ।
पारासरी मस्करी च, पाखण्डी सर्वलिङ्गिनः ॥ ३४१ ॥

द्विजातिर्ब्राह्मणो विप्रो, भूदेवो वाडवो द्विजः ।
अग्रजन्मा द्विजन्मा च, षट्कर्मा मुखसंभवः ॥ ३४२ ॥

यज्ञो यागः क्रतुः सत्रं, सप्ततन्तुर्मखोऽध्वरः ।
होमो होत्रं वषट्कारो, हवनं देवतर्पणम् ॥ ३४३ ॥

अजिनं चर्म कृत्तिस्त्वक्, चीरं वल्कंवल्कलम् ।
वितर्दिर्वेदिका वेदी, गुहा स्यात्कन्दरा दरी ॥ ३४४ ॥

॥ इति ब्रह्मवर्गः ॥

क्षत्रियो बाहुजः क्षत्री, राजन्यो राजवंशजः ।
राजा राट् पार्थिवः क्ष्माभृन्महीभृन्नृपतिर्नृपः ॥ ३४५ ॥

प्रजापतिः क्षितिपतिर्नरदेवो नराधिपः ।
भूपः क्षितीशो भूपालः,, क्षोणीनाथो नरेश्वरः ॥ ३४६ ॥

नरेन्द्रो भूपति र्भूभुक्, सम्राट् तु शास्ति यो नृपान् ।
चक्रवर्ती सार्वभौमः, सर्वदेशाधिपो हि यः ॥ ३४७ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नाथः प्रभुः पतिः स्वामी, विभुः परिवृढोऽधिपः ।
ईश्वरो नायको नेता, भर्तेन्द्र ईन ईशिता ॥ ३४८ ॥

राजचिह्नं त्वातपत्रं, छत्रमातपवारणम् ।
चामरं वालव्यजनं, सिंहासननृपासने ॥ ३४९ ॥

सभा समज्या परिषत्, संसच्च समितिः सदः ।
गोष्ठ्यास्थानी समाजश्च, पर्षत् सभ्याः समाजिका ॥ ३५० ॥

अन्तःपुरं च शुद्धान्त-मवरोधो नृपस्त्रियः ।
महिषी पट्टराज्ञी स्यात्, सौविदल्लश्च कञ्चुकी ॥ ३५१ ॥

परिवारः परिकरः, परिबर्हः परिच्छदः ।
प्रतीहारो द्वारपालो, दौवारिकश्च वेत्रभृत् ॥ ३५२ ॥

अवसर्प्यः स्पशश्चारो, हेरिकः प्रणिधिश्चरः ।
संदेशहारको दूतः, पान्थस्तु पथिकोऽध्वगः ॥ ३५३ ॥

सेवकः किङ्करो भृत्योऽनुजीव्यनुचरोऽनुगः ।
दासः प्रेष्यो भृतकश्च, चेटः कर्मकरोऽपि च ॥ ३५४ ॥

पत्तिः पदातिः पदगः, पुरोगामी पदातिकः ।
भट्टा योधाश्चायोद्धारः, सैन्याश्च सैनिका अपि ॥ ३५५ ॥

शूरो वीरो चारभटो, विक्रान्तः सुभटो बली ।
कातरो भीरुको भीरुः, कान्दिशीको भयद्रुतः ॥ ३५६ ॥

पराक्रमः पौरुषं च, बलं शौर्यं च विक्रमः ।
ओजः प्राणः स्तरः स्थाम, शक्तिवीर्यं तथोर्जवत् ॥ ३५७ ॥

अरिर्वैरी रिपुः शत्रु-र्विपक्षो द्विट् द्विषत् परः ।
प्रत्यर्थी प्रत्यवस्थाता, संपत्नशात्रवोऽहितः ॥ ३५८ ॥

परिपन्थी प्रत्यनीको, दस्युदुर्हृदरातयः ।
अनीकं कटकं सैन्यं, चक्रं दण्डं बलं चमूः ॥ ३५९ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वाहिनी ध्वजिनी सेना, पृतना च वरूथिनी ।
अनीकिन्यक्षौहिणी च, स्कन्धावारः पताकिनी ॥ ३६० ॥

हस्त्यश्वरथपत्ताश्च, चतुरङ्गबलं स्मृतम् ।
स्यात्सेनाक्षौहिणी नाम, खागाष्टैकद्विकैर्गजैः ॥ ३६१ ॥

रथैश्चेभ्योहयैस्त्रिघ्नैः, पञ्चघ्नैश्च पदातिभिः ।
आधोरणो हस्तिपको, महामात्रो निषाद्यपि ॥ ३६२ ॥

यन्ता सादी त्वश्ववारो, नियन्ता सूतसारथी ।
सन्नाहः कवचं दंशस्तनुत्रं वर्मकण्टकः ॥ ३६३ ॥

सारसनं त्वधिकाङ्गं, वारबाणस्तु कञ्चुकः ।
शिरस्त्राणं तु शीर्षण्यं, जालिका त्वङ्गरक्षिका ॥ ३६४ ॥

शस्त्रमायुधमस्त्रं च, हेतिः प्रहरणं स्मृतम् ।
धनुः कोदण्डमिष्वासः श्चापो धन्वशरासनम् ॥ ३६५ ॥

कार्मुकं जीवा प्रत्यञ्चा, ज्या मौर्वी सिञ्जिनी गुणः ।
निषङ्गस्तूणस्तूणीर, उपासंगस्तथेषुधिः ॥ ३६६ ॥

इषुर्बाणः शरः पत्री, काण्डो विशिख आशुगः ।
पृषत्कः सायको रोपः, कङ्कपत्रः शिलीमुखः ॥ ३६७ ॥

कलम्बाजिह्मगखगा, नाराचश्च क्षुरप्रवत् ।
करवालासिनिस्त्रिंश-कृपाणतरवारयः ॥ ३६८ ॥

मण्डलाग्रश्चन्द्रहासः, खड्गकौक्षेयरिष्टयः ।
खेटकः फलकं चर्म, शस्त्रिका तु कृपाणिका ॥ ३६९ ॥

असिधेनुरसिपुत्री, छुरिका क्षुरिका च सा ।
कुन्तः प्रासस्तथा भल्लो, द्रुघणो मुद्गरो घनः ॥ ३७० ॥

कुठारः परशुः पर्शुः, स्वधितिश्च परश्वधः ।
संग्रामः समरं युद्धं, प्रधनं संयुगं रणः ॥ ३७१ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जन्यमायोधनं संख्यमाहवः सांपरायिकम् ।
संयत्समितिराजिर्युध्, द्वन्द्वमास्कन्दनं मृधम् ॥ ३७२ ॥

राटिः समीकं संस्फोटो, विग्रहः कलहं कलिः ।
वैतालिका बोधकरा, बन्दिनः स्तुतिपाठकाः ॥ ३७३ ॥

देशो जनपदो राष्ट्रं, निवृद्विषयमण्डले ।
पूः पुरं नगरं द्रङ्गो, निवेशो नगरी पुरी ॥ ३७४ ॥

स्थानीयं निगमो ग्रामः, पत्तनं पुटभेदनम् ।
वप्रः शालः कोट्टदुर्गौ, प्राकारो वरणश्च यः ॥ ३७५ ॥

प्रतोली विशिखा रथ्या, पुरद्वारं च गोपुरम् ।
तुरुष्कयवना म्लेच्छाः, पारसीकाः शकास्तथा ॥ ३७६ ॥

प्रष्थाना मुद्गलाश्चैव, स साहिस्तेषु योऽधिपः ।
सीतापतिर्दाशरथिः, काकुत्स्थो भरताग्रजः ॥ ३७७ ॥

रघुनाथो रामचन्द्रः, स्यात्सौमित्रिस्तु लक्ष्मणः ।
वैदेही मैथिली सीता, जानकी पृथिवीसुता ॥ ३७८ ॥

पौलस्त्यो रावणो रक्षो, लङ्केशो दशकन्धरः ।
धर्मात्मजोऽजातशत्रुः, शल्यारिश्च युधिष्ठिरः ॥ ३७९ ॥

भीमोऽरिबककीचको, वायुपुत्रो वृकोदरः ।
धनञ्जयोऽर्जुनः पार्थ, इन्द्रपुत्रः कपिध्वजः ॥ ३८० ॥

श्वेताश्वः फाल्गुनो जिष्णुः, सव्यसाची च कर्णजित् ।
पाञ्चाली द्रौपद्री कृष्णा, याज्ञसेनी च वेदिजा ॥ ३८१ ॥

हनुमानञ्जनापुत्रो, मारुतिर्वज्रकण्टकः ।
वैदेहिकश्चापणिको, नैगमो वाणिजो वणिक् ॥ ३८२ ॥

पण्याजीवः सार्थवाहः, क्रयविक्रयकः क्रयी ।
आपणो विपणिर्हट्टः, तन्मार्गः स्याच्चतुःपथम् ॥ ३८३ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

धान्यं शस्यं च तद्भेदा, मुद्गगोधूमतण्डुला ।
अमत्रं भाजनं पात्रं, पण्यं भाण्डक्रयाणके ॥ ३८४ ॥

वर्तनं जीवनं वृत्ति-र्वार्ता जीवश्च जीविका ।
मूलद्रव्यं परिपणो, नीवीलाभोऽधिकं फलम् ॥ ३८५ ॥

सत्यापनं सत्यंकारो, मूल्यं वस्नोऽप्यवक्रयः ।
संपत्तिः श्रीर्विभूतिश्च, लक्ष्मीसंपत्समृद्धयः ॥ ३८६ ॥

श्रीमान् समृद्धो लक्ष्मीवानिभ्य आढ्यो धनेश्वरः ।
आपद्विपद्विपत्तिश्च, दरिद्रो निःस्वनिर्धनौ ॥ ३८७ ॥

कदर्यः कृपणो लोभी, बद्धमुष्टिर्मितंपचः ।
गोकुलं तु व्रजो घोषो, गोष्टं गोपालवल्लभः ॥ ३८८ ॥

दुग्धं पयोऽमृतं क्षीरं, गोरसः क्षीरजं दधि ।
घृतमाज्यं हविः सर्पिः, नवनीतं तु म्रक्षणम् ॥ ३८९ ॥

उदश्विन्मथितं तक्रं, आरनालं तु काञ्जिकम् ।
हविष्यान्नं च क्षैरेयी, परमान्नं च पायसम् ॥ ३९० ॥

घृतपक्वं तु पक्वान्नं, घृतपूरादिभेदवत् ।
सूपः स्यात्प्रहितं सूदोन्धः कूरं भक्तमोदनम् ॥ ३९१ ॥

व्यञ्जनं तेमनं शाकः, पूपऽपूपौ च पोलिका ।
भोजनं जेमनाहारौ, भक्षणं खादनाशने ॥ ३९२ ॥

पिपासा तृट् तृषोदन्या, बुभुक्षा क्षुत् क्षुधा रुचिः ।
खण्डस्तु मधुधूलिः स्यात्, मत्स्यण्डी फाणितं वरा ॥ ३९३ ॥

सितोपला शर्करा च, सिताथेक्षुरसो गुडः ।
प्रजा लोकाः प्रकृतयो, जनाः पौराश्च नागराः ॥ ३९४ ॥

क्षेत्राजीवी कृषिकश्च, कर्षकश्च कृषीवलः ।
क्षेत्रं वप्रश्च केदारो, हलं सीरश्च लाङ्गलम् ॥ ३९५ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कुम्भकारः कुलालश्च, कुम्भस्तु कलसो घटः ।
स्वर्णकारः कलादश्च, मालाकारस्तु मालिकः ॥ ३९६ ॥

क्षुरमर्दी दिवाकीर्तिर्नापि-तान्तेऽवसाय्यपि ।
मुण्डनं भद्राकरणं, वपनं परिवापनम् ॥ ३९७ ॥

वार्धकिः स्थपतिस्तक्षा, रथकारश्च काष्टभित् ।
अयःकारो लोहकारः, शस्त्रमार्जोऽसिधावकः ॥ ३९८ ॥

रङ्गाजीवश्चित्रकारः, तन्तुवायस्तु सौचिकः ।
निर्णेजकस्तु रजकः, तन्तुवायः कुविन्दकः ॥ ३९९ ॥

चाक्रिकस्तैलिकस्तैली, शिल्पिकारुककारवः ।
कल्यपालः सुराजीवी, शौण्डिको मण्डहारकः ॥ ४०० ॥

मदिरा वारुणी मद्यं, सुरा कादम्बरी मधु ।
सुण्डा हालासवः सीधु-र्माध्वीकं कापिसायनम् ॥ ४०१ ॥

आमिषं पिशितं मांसं, पलं क्रव्यं च जाङ्गलम् ।
रुधिरं शोणितं रक्त-मस्रं क्षतजमप्यसृक् ॥ ४०२ ॥

द्यूतकारोऽक्षवेदी चा-क्षधूर्तः कितवश्च सः ।
द्यूतं दुरोदरं चाक्ष-वती पण्या च कैतवम् ॥ ४०३ ॥

पाशका देवना अक्षा, सारयोऽष्टापदं फलम् ।
स्तेनः पाटच्चरो दस्यु-श्चौरस्तस्करमोषकौ ॥ ४०४ ॥

कैवर्तो धीवरो दासो, वागुरिकस्तु जालिकः ।
लुब्धको मृगयुर्व्याध-मृगयाखेटकौ समौ ॥ ४०५ ॥

जीवान्तकः शाकुनिकः, वैतंसिकस्तु सौनिकः ।
पादुकाकृच् चर्मकार, उपानत् पादुपादुके ॥ ४०६ ॥

चाण्डालस्तु दिवाकीर्ति-र्निषादश्च जनङ्गमः ।
मातङ्गः श्वपचोऽस्पर्श्योन्तेवासी प्लवबुक्कसौ ॥ ४०७ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इतरः प्राकृतो नीचः, पामरश्च पृथग्जनः ।
पुलिन्दः शबरो भिल्लः, किरातश्च वनेचरः ॥ ४०८ ॥

उत्पत्तिर्जन्म जनन-मुत्पातो जनिरुद्भवः ।
जीवितं चासवः प्राणाः, श्वासश्च श्वसितं मरुत् ॥ ४०९ ॥

युवा वयस्थस्तरुणः, तारुण्यं यौवनं वयः ।
जरीयान् स्थविरो वृद्धः, वार्धक्यं विश्रसा जरा ॥ ४१० ॥

गुणवानुत्तमः श्रेष्ठो, योग्यः पूज्यो महान् गुणी ।
श्रेयान् शिष्टः सदाचारः, साधुसभ्यार्यसज्जनाः ॥ ४११ ॥

विख्यातः प्रथितो ज्ञातः, प्रतीतो विश्रुतोऽपि च ।
दातोदारो वदान्यश्च, त्राता गोप्ता च रक्षकः ॥ ४१२ ॥

कर्णेजपश्च पिशुनो, द्विजिह्वो दुर्जनः खलः ।
पापो धूर्तः शठः क्रूरः, क्षुद्रो नीचोऽधमोऽनृजुः ॥ ४१३ ॥

दृप्तोऽभिमानी गर्विष्ठो, गर्वितः स्तब्ध उन्नतः ।
कलङ्को लाञ्छनं लक्ष्म, चिह्नमङ्कश्च लक्षणम् ॥ ४१४ ॥

वैरं विरोधो विद्वेषः, शृङ्खलो निगडोण्डुकः ।
विघ्नान्तरायप्रत्यूहाः, रोगातङ्कगदामयाः ॥ ४१५ ॥

पाषाणः प्रस्तरो ग्रावो, दृषदश्मोपलः शिला ।
रेणुः धूली रजः पांशुः, पङ्कश्चिखिल्लकर्दमौ ॥ ४१६ ॥

व्यवसायोद्यमोद्योगाऽभियोगोत्साहविक्रमाः ।
खुरली तु श्रमोऽभ्यासः, संवाहनं तु मर्दनम् ॥ ४१७ ॥

मिष्टः स्वादुश्च मधुरः, कषायस्तुवरो रसः ।
पाचनोऽम्लो दन्तशठः, कटुकः कटुरूषणौ ॥ ४१८ ॥

स्याल्लवणः सर्वरसः, क्षारस्तिक्तं तु तीक्ष्णवत् ।
रक्तः शोणोऽरुणस्ताम्रो लोहितः पाटलोऽपि च ॥ ४१९ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्वेतः शुक्लः सितः शुभ्रो, वलक्षो धवलः शुचिः ।
गौरोऽवदातो विशदः पाण्डुः पाण्डुर उज्ज्वलः ॥ ४२० ॥

पीतो गौरो हरिद्राभः, पालाशो हरितो हरित् ।
कालः श्यामः शिति कृष्णं, श्यामलो मेचकोऽसितः ॥ ४२१ ॥

नीलो रागोऽञ्जनाभश्च, कर्बुराद्यास्तु मिश्रिताः ।
युग्मं द्वयं युगं द्वन्द्व-मुभयो युगलं द्वयी ॥ ४२२ ॥

यमलं मिथुनं द्वैतं, त्रयं च त्रितयं त्रयी ।
समूहो निवहो व्यूहो, वृन्दं चक्रं कदम्बकम् ॥ ४२३ ॥

ओघः संघो व्रजो व्रातो, निकरः प्रकरश्च सः ।
संदोहः संहतिः स्तोमो, वारः समुदयो गणः ॥ ४२४ ॥

समुदायः समवायो, निकुरम्बश्च सञ्चयः ।
जालः कलापः पटलः, संघातः पूगमण्डलौ ॥ ४२५ ॥

राशिः पुञ्जोत्करः कूटं, जातं यूथं भरः कुलम् ।
ग्रामो वर्गः समाहारो, निकायो निचयोऽपि च ॥ ४२६ ॥

राजिर्मालावलिः श्रेणिस्ततिः पङ्क्तिश्च धोरणी ।
सर्वं समस्तं सकलं, समग्रं निखिलाखिले ॥ ४२७ ॥

विश्वं कृत्स्नं तथाशेषं, खण्डोऽर्धं शकलं दलम् ।
बहिष्ठं प्रचुरं प्राज्यं, पुष्कलं बहुलं बहु ॥ ४२८ ॥

अदभ्रं भूरि भूयिष्ठं, भूयश्च प्रबलोऽधिकः ।
स्तोकं तुच्छं दभ्रमल्पं, मात्रं लेशो कणो लवः ॥ ४२९ ॥

अणु सूक्ष्मं लघु श्लक्ष्णं, क्षामः क्षीणः कृशस्तनुः ।
खर्वं ह्रस्वं वामनं च, प्रलम्बं दीर्घमायतम् ॥ ४३० ॥

उच्चं प्रांशून्नतं तुङ्गं, निम्नं नीचं न्यगानतम् ।
विवरं कुहरं छिद्रं, रन्ध्रगर्ताऽवटा बिलम् ॥ ४३१ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विचालं त्वन्तरं मध्य-मन्तरालं च मध्यमम् ।
अरालं कुटिलं वक्रं, सरलप्रगुणर्जवः ॥ ४३२ ॥

बृहद्विशालं विस्तीर्णं, महच्च विपुलं पृथुः ।
स्फारं गरिष्ठं वितत-मुरु व्यूढं गुरु स्मृतम् ॥ ४३३ ॥

कठोरः कठिनो रुक्षो, निष्ठुरः कर्कशः खरः ।
तीव्रोग्रौ दारुणं घोरं, दृढमुद्दाममुत्कटम् ॥ ४३४ ॥

सुकुमारः सुखस्पर्शः, कोमलो मृदुलो मृदुः ।
सुन्दरं रुचिरं रुच्य-मभिरामं मनोहरम् ॥ ४३५ ॥

मनोज्ञं मञ्जुलं मञ्जु, पेशलं वल्गु बन्धुरम् ।
कान्तं रम्यं चारु हरि, कमनीयं मनोरमम् ॥ ४३६ ॥

हृद्यं काम्यं रमणीयं, प्रशस्तं साधु शोभनम् ।
मुख्यः प्रधानप्रवरौ, व्ययौऽग्र्योऽग्रेसरोऽग्रणीः ॥ ४३७ ॥

प्रकृष्टश्च परार्ध्यं च, पुङ्गवः सत्तमः परः ।
पौरस्त्यः प्रथमः पूर्व, आदिराद्यादिमोऽग्रिमः ॥ ४३८ ॥

जघन्यः पश्चिमोन्त्यश्च, पाश्चात्यश्चरमोन्तिमः ।
पूतं पवित्रं मेध्यं च, मलिनं च मलीमसम् ॥ ४३९ ॥

निर्णिक्तं क्षालितं धौतं, उज्ज्वलं निर्मलं शुचि ।
समानं सदृशस्तुल्यं, संकाशः सन्निभः समः ॥ ४४० ॥

अनुहारश्चोपमानं, साम्यकक्षा तुलोपमाः ।
समीपं निकटं पार्श्वं, समयाभ्यर्णमन्तिकम् ॥ ४४१ ॥

उपकण्ठं सन्निधानोपान्ते सविधः सन्निधिः ।
विप्रकृष्टं परं दूरं, ध्रुवं नित्यं च शाश्वतम् ॥ ४४२ ॥

चञ्चलं चपलं लोलं, तरलं चटुलं चलम् ।
वेल्लितं प्रेङ्खितं धूत-मान्दोलितं च वर्जितम् ॥ ४४३ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दोला प्रेङ्खोलनं प्रेङ्खा, हिन्दोलश्चापि हिञ्चितम् ।
सघनं मेदुरं सान्द्रं, नीरन्ध्रं निबिडं दृढम् ॥ ४४४ ॥

प्रकटं तु स्फुटं स्पष्टं, प्रकाश्यं व्यक्तमुल्बणम् ।
त्वरितं सत्वरं शीघ्रं, तूर्णं क्षिप्रं द्रुतं लघु ॥ ४४५ ॥

जवो वेगो रयो रंह-स्त्वरो मन्दे तु मन्थरः ।
अत्यन्तं निर्भरं तीव्रं, गाढं बाढं दृढं भृशम् ॥ ४४६ ॥

पूरितं भरितं पूर्णं, शून्यं रिक्तखिलोद्वसाः ।
संकुलाकुलसंकीर्णा-कीर्णसंबाधसंकटाः ॥ ४४७ ॥

परीतं निचितं व्याप्तं, दिग्धलिप्ताक्तगुण्डिताः ।
संपृक्तः खचितो मिश्रः, संवलितः करम्बितः ॥ ४४८ ॥

आश्रितः सहितो युक्तः, समवेतः समन्वितः ।
सिद्धो निर्वृत्तनिष्पन्नौ, निर्मितं विहितः कृतः ॥ ४४९ ॥

लब्धमासादितं प्राप्तं, त्यक्तमुत्सृष्टमुज्झितम् ।
उरीकृतं प्रतिज्ञात-मङ्गीकृतं प्रतिश्रुतम् ॥ ४५० ॥

प्रस्थापितं प्रतिष्ठितं, प्रहितं प्रेषितोऽपि च ।
रुद्धं तिरोहितं छन्नं, छादितं पिहितावृते ॥ ४५१ ॥

उत्पाटितमुन्मूलित-मुत्खातं भग्नमुद्धृतम् ।
उक्तं जल्पितमाख्यातं, भाषितं कथितोदिते ॥ ४५५ ॥

ज्ञातं बुद्धमवसितं, विदितावगते अपि ।
व्यत्यासस्तु विपर्यासो, वैपरीत्यं विपर्ययः ॥ ४५३ ॥

प्रतिकूलं विलोमं च, प्रतीपं वाडमेव च ।
प्रत्यादिष्टं प्रतिक्षिप्तं, निरस्तं नुन्नमीरितम् ॥ ४५४ ॥

स्रस्तं भ्रष्टं च प्रस्कन्नं, पतितं गलितं च्युतम् ।
अन्वेषितं गवेषित-मन्विष्टं मार्गितं तथा ॥ ४५५ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

छेदितं खण्डितं कृत्तं, छिन्नं लूनं छितं दितम् ।
पाटितं दारितं भिन्नं, विद्धं छिद्रितवेधितौ ॥ ४५६ ॥

बद्धो निगडितो नद्धः, कीलितो यन्त्रितः सितः ।
दग्धः प्रज्वलितः प्लुष्टः, हेतिर्ज्वाला शिखार्चिषी ॥ ४५७ ॥

अङ्गारेङ्गालौ रक्षा तु, भस्मितं भस्मभृतिवत् ।
आर्द्रं तु स्तिमितं क्लिन्नं, शुष्कमाश्याननीरसे ॥ ४५८ ॥

निशितं तेजितं तीक्ष्णं, कुण्ठितं वेगवर्जितम् ।
वर्तुलं मण्डलं वृत्तं, निस्तलं वलयाकृति ॥ ४५९ ॥

अश्रिः कोटिरणिः कोणं, प्रान्तं पर्यन्तमन्तवत् ।
सन्देहः संशयो रेको, निश्चयो निर्णयोऽपि च ॥ ४६० ॥

तथा विश्रम्भविश्वास-प्रतीतिप्रत्ययाः समाः ।
आर्भट्याडम्बराटोपाः, व्यापप्रसरमूर्च्छनाः ॥ ४६१ ॥

आधारः स्यादवष्टम्भः, स्यादालम्बनमाश्रयः ।
स्वरूपं लक्षणं भावो, रूपधर्मत्वरीतयः ॥ ४६२ ॥

सृष्टिः सर्गश्च निर्माणं, करणं घटनं कृतिः ।
जम्बूः प्लक्षः शाल्मलिश्च, कुशः क्रौञ्चाभिधस्तथा ॥ ४६३ ॥

शाकद्वीपः पुष्कराख्यः, सप्त द्वीपा इमे स्मृताः ।
लवणक्षीरोदध्याज्य-सुरेक्षुस्वादुसागराः ॥ ४६४ ॥

भारताख्यं किंपुरुषं, हरिवर्षमिलावृतम् ।
रम्यकाख्यं पञ्चमकं, खण्डं षष्टं हिरण्मयम् ॥ ४६५ ॥

कुरुखण्डं च भद्राश्वः, केतुमालमिति स्मृतम् ।
एतानि नवखण्डानि, जम्बूद्वीपविभागतः ॥ ४६६ ॥

माहेन्द्रो मलयो सह्यो, हिमवान् पारियात्रिकः ।
गन्धमादनमुदयश्च, सप्तैते कुलपर्वताः ॥ ४६७ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भृङ्गी धूर्तवधूः प्रोक्ता, मातुलानी च मातुली ।
मैत्र्या मैत्री सुमित्रा च, कृतरागानुरागिणी ॥ ४६८ ॥

हरीतक्यभया पथ्या, चम्पको हेमपुष्पकः ।
वीणावारणवाजिसिंहहरिणानङ्गप्रवाला-
चलाश्चन्द्रश्चातकचञ्चरीकजलमुक्चापासिवज्रादयः ।
हंसः कोकिलकेकिकीरगरुडस्वर्णाऽनिलार्कास्तमो,
गुञ्जा श्रीफलपद्मदीपघटिकाः सारङ्गशब्दा इमे ॥ ४६९ ॥

श्रीसिंहे च कपौ शुके हरिहरे चामीकरे भार्गवे,
चन्द्रे भेकविराजवाजिवहने वंशे यमे पारदे ।
नागे वर्णसमीरणेऽपि दहने स्कन्दे च संक्रन्दने,
मार्तण्डेऽशनिपत्रगेश्वरदिने खड्गे हरिः कीर्तितः ॥ ४७० ॥

अर्कमर्कटमण्डुक-विष्णुवासववायवः ।
तुरङ्गः सिंहशीतांशु-यमाश्च हरयो दश ॥ ४७१ ॥

दिग्दृष्टिदीधितिस्वर्ग-वर्जवाग्बाणवारिषु ।
भूमौ पशौ च गोशब्दो, विद्वद्भिर्दशधा मतः ॥ ४७२ ॥

ब्रह्मक्षत्रियविट्शूद्र-संकीर्णाख्यैर्मनोरमैः
वर्गैस्तृतीयकाण्डोऽयं, पूरितो हर्षकीर्तिना ॥ ४७३ ॥

॥ इति श्रीमन्नागपुरीयतपागच्छे
श्रीचन्द्रकीर्तिसूरिशिष्यश्रीहर्षकीर्तिसूरिविरचितायां शारदीयाभिधायां
लघुनाममालायां तृतीयः काण्डः समाप्तः ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

महोपाध्याय श्रीविनयसागरजी विरचितः

# ।। विद्वच्चिन्तामणिः ।।

श्रीमद्वागीश्वरीवक्त्रान्मूलसूत्रमवाप्य हि ।
कृतं सारस्वतं येन ततोऽनुभूतये नमः ॥ १ ॥

अ इ उ ऋ लृ समानाः सूत्रमष्टाक्षरं परम् ।
ह्रस्वदीर्घप्लुतभेदाः सवर्णा हि परस्परम् ॥ २ ॥

ए ऐ ओ औ सन्ध्यक्षरा - ण्यत्रोभये स्वरा अथ ।
अवर्जा नामिनो ह य वरादी सान्तमित्यथ ॥ ३ ॥

आद्यन्ताभ्यां च सूत्राणि संज्ञायाः सप्त सन्ति च ।
इ यं स्वर उ वमृ रम् लृ लमे अय् ततः परम् ॥ ४ ॥

ऐ आय् ओ अव् औ आव् य्वोर्लो - पश् वा पदान्त एव च ।
एदोतोऽतो ङस्य सव-र्णे दीर्घः सह चा इ ए ॥ ५ ॥

उ ओ ऋ अर् लृ अल् ए ऐ ऐ ओ औ औ ततोऽस्ति च ।
ओष्ठोत्वोर्वौ स्वरसन्धेः सूत्राण्येकोनविंशतिः ॥ ६ ॥

नामी अथ च य्वे द्वित्वे औ निपातः प्लुतः पुनः ।
प्रकृतिभावस्य चत्वारि स्युश्च चपा अबे जबाः ॥ ७ ॥

ततो ञमे ञमा वा च-पाच्छः शो हो झभास्तथा ।
स्तोःश्चुभिःश्चुर्नशाच्च ष्टु-भिः ष्टुश्च तोर्लि लो न षि ॥ ८ ॥

टोरन्त्यात् त्र्यक्षरं सूत्रं सस्वरं च न सक् छते ।
भवेत्तथैव शे चग्वा ङ्णनो ह्रस्वाद् द्विःस्वरे पुनः ॥ ९ ॥

छश्च हसेऽर्हहसो मोऽनुस्वारश्च चतुरक्षरम् ।
नश्चापदान्ते झसे स्यात् यमा यपेऽस्य वा त्वथ ॥ १० ॥

इति व्यञ्जनसन्धेश्च सूत्राण्यष्टाधिका दश ।
सप्ताक्षरं तु विसर्ज-नीयस्य सो भवेदथ ॥ ११ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कृप्वोः क पौ वा त्वतोऽत्यु-स्त्रिपदं द्व्यक्षरं हबे ।
आदबे लोपश् भोसश्च नामिनो रो र एककम् ॥ १२ ॥

भवेद् रिलोपो दीर्घश्च सैषाद्धसे दशैव हि ।
सन्धौ सूत्राणि पूर्णानि ह्यष्टपञ्चाशदेव हि ॥ १३ ॥

अथाऽविभक्ति नाम स्यात् तस्मात् सिऔजसादयः ।
समानाद्धेर्लोपोऽधातोरम्शसोरस्य पञ्च च ॥ १४ ॥

सो नः पुंसो नुडामः स्याद् रः सङ्ख्याया ष्ण एककम् ।
त्रेरयङ् ड्णो जस्शसोर्लुक् अष्टनो डौ च वाऽऽसु च ॥ १५ ॥

रैस्मि चाद्धि तथा ब्भ्यःस्याद् एस्भि बहुत्व ओसि च ।
ङसिरत् ङस्स्य एवं टे-न ङेअक् द्विपदं त्वदः ॥ १६ ॥

सर्वादेः स्मडतो ङिस्मिंश्च जसी स्यात् सुडाम आयश्च ।
तदनु यटेच्च हसेपः सेर्लोपश्चाप इत्यपरम् ॥ १७ ॥

टौसोरे धिरि रौ स्यान्ङितां यडाम्ङे यतः पृथक् ।
नियश्व स्त्रियां य्योर्धौ ह्रस्वो ङितामटु वेयुवः ॥ १८ ॥

इदुभ्यामौयु टा नाऽस्त्रि-यामथै ओ जसीति च ।
धौ ङित्यथ च डेरामित् त्रिपदं स्याद् ऋतो ङउः ॥ १९ ॥

सेरा धेरर् तथा डौ च पञ्च स्वरक्षरं स्तुरार् ।
पुंसोऽसुङ्च व्रितो नुम् च वादीपोः शतुरेव च ॥ २० ॥

भवेदप्ययोराण्णित्यम् इदं सूत्रं षडक्षरम् ।
त्रिपदं च न्सम्महतोऽधौ दीर्घः शौ च चान्तकम् ॥ २१ ॥

नोपधायास्तदन्वस्त्य-त्वसोः सौ शसि नामि च ।
एकाक्षरमिनां शौ सावस्मिन् सूत्रे पदत्रयी ॥ २२ ॥

अल्लोपः स्वरेऽम्वयुक्ता-च्छसादौ तु चतुःपदम् ।
वेड्योरञ्चेर्दीर्घश्च स्यात् तिरश्चादय एककम् ॥ २३ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चतुःपदं ष्रुर्णोणोऽन्तेऽवकुप्वन्तरेऽपि च ।
क्विलात्षः सः कृतस्येतत् सप्ताक्षरं चतुःपदम् ॥ २४ ॥

स्यात् प्रादेश्च तथा तौ सुनमां नपुंसकात् स्यमोः ।
लुगधातोम् च श्त्वन्यादेरीमौ स्याद् द्विपदं त्विदम् ॥ २५ ॥

जस्शसोः शिर्नुमयमो द्विपदं नामिनः स्वरे ।
स्यादच्चास्थ्नां शसादौ च चतुःपदं वसोर्व उम ॥ २६ ॥

श्वादेरातो धातोर्लोपस्त्रिपदमेव च पथां टेः ।
हीतोत्पञ्चसु थो नुट् आ सौ दिव औ भवेदु रसे ॥ २७ ॥

चतुराम् शौ चौरो वाम्शसि पुनरै सख्युरेव सेर्डाऽधेः ।
चोशनसां तदनु य्वो र्धातोरियुवौ स्वरेऽष्टवर्णं च ॥ २८ ॥

स्यात् स्त्रीभ्रुवोरथ य्वौ वा नुधातोस्त्र्यधिकं शतम् ।
विभक्तिसत्कसूत्राणि स्वरूपं युष्मदस्मदोः ॥ २९ ॥

प्राक् युष्मदस्मदोः षष्ठीचतुर्थ्यादि न सत्तकम् ।
एकविशाक्षरं त्वा मा मा नादौ चादिभिश्च वै ॥ ३० ॥

त्वन्मदेकत्वे युवावौ द्विवचने पदं द्विकम् ।
तत आमौ च त्वमहं सिना यूयं वयं जसा ॥ ३१ ॥

तुभ्यंमह्यं ङया तव-मम ङसा ङसिभ्यसोः ।
श्तुर्भ्यस् श्भ्यमथ सामाकम् भवेदाम्स्भौ द्विकं पदम् ॥ ३२ ॥

ए टाङ्योः सखिपत्योरीक् ङे अक् ङे द्व्यक्षरं त्विदम् ।
त्रिचतुरोः स्त्रियां तिसृ-चतसृवच्च काप्यतः ॥ ३३ ॥

ह्रस्वो वाऽन्यार्थ एकपदं गोर्नपुंसकस्य च ।
त्यदादेष्टेरः स्यादौ च दस्य मःसौ स एव तः ॥ ३४ ॥

भवेदिदमोऽयं पुंसि चेयं स्त्रियां स्त एव हि ।
अन टैसोस्तथा भिस् भिस् अदसः पदमेककम् ॥ ३५ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सेरौ मादू भवेदेरी बहुत्वे भि दपां ततः ।
वसां रसे पुनश्चोः कुर्दिशाम् षो डः पदं द्विकम् ॥ ३६ ॥

नाम्नो नो लोपशधौ सं-योगान्तस्यैककं पदम् ।
स्कोराद्योश्च स्रोर्विसर्गः सस्तावङ्णश्च द्व्यक्षरम् ॥ ३७ ॥

ओडीतिः हि पदान्ते च तु रो रात्रिषु दोषामथ च धातोश्च ।
झस एव च नशे हो ढो दादेर्घो नहो ध इत्यपि च ॥ ३८ ॥

भवेच्छशषराजादेः षः षढोः कस्स एव च ।
सस्तोनपि दिपि स्याच्च सिपि वा दः स इत्यपि ॥ ३९ ॥

खसे चपा झसानां स्यात् त्रिपदं च झबे जबाः ।
वावसाने इदं सूत्रं द्विपदं चतुरक्षरम् ॥ ४० ॥

आदिजबानां झभान्तस्य झभाः स्ध्वोश्च चतुःपदम् ।
तथोर्धोऽधोऽव्ययाद्विभ - क्तेर्लुग्वाऽस्मिन् पदत्रयम् ॥ ४१ ॥

एकपदं समासप्र - त्यययोः स्यादलुक्क्वचित् ।
भवेदयाऽव्ययीभावादतोमनत एव तत् ॥ ४२ ॥

पञ्चाक्षरं च वा टाङ्योर्द्विपदं स नपुंसकम् ।
एकत्वे द्विगुद्वन्द्वौ च सूत्राणि युष्मदस्मदी ॥ ४३ ॥

षट्सप्ततिश्च वर्तन्ते लिङ्गार्थे प्रथमा मता ।
आमन्त्रणे ततः सिर्धि-र्द्विपदं भो भगो अघोस् ॥ ४४ ॥

शेषाः कार्ये इतीदं यद् अष्टाविंशतिरक्षरम् ।
विना सहेति सूत्रं यत् तच्च सप्तदशाक्षरम् ॥ ४५ ॥

कर्तृकारणयोरक्ता-दौ कृति षष्ठी चतुःपदं सूत्रम् ।
अन्योक्ते प्रथमा स्युः कारकसूत्राणि चाऽष्टौ हि ॥ ४६ ॥

अपत्येऽण् अत इञनृ-षेण्यायनणित्यदः ।
अष्टादशाक्षरं सूत्रं लुग्बहुत्वे क्वचित्ततः ॥ ४७ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

देवतेदमर्थे चाऽथ णितो वा द्विपदं ह्यदः ।
स्यात कारकात् क्रियायुक्ते ततः केनेयका अथ ॥ ४८ ॥

भवेत् स्वार्थेऽपि वत्तुल्ये भावे तत्त्वयणः परम् ।
अस्त्यर्थे मतुर्मान्तो-पधाद्वत्विनौ द्विकं पदम् ॥ ४९ ॥

तरतमेयस्विष्ठाः प्र-कर्षे वोव्यस्वरे ततः ।
यस्य लोपो भवेदीपि डिति टेर्द्विपदं त्विदम् ॥ ५० ॥

स्यान्नोवाऽन्त्यस्वरादिष्टिः कार्यायेच्च पदं द्विकम् ।
तथादिस्वरस्य ञ्णिति वृद्धिस्ततः क्वचिद् द्वयोः ॥ ५१ ॥

भवेन्नसन्धिर्य्वोर्युट् च धातोर्नामिन एव च ।
ततोऽत उपधाया आ-तो युक् हनो घदेव च ॥ ५२ ॥

त्रिपदं स्यात् हनो घ्ने च रातो ञौ पुक् तथा मिताम् ।
ह्रस्व आरै औ वृद्धिः स्याद् अरेदो नामिनो गुणः ॥ ५३ ॥

त्रयस्त्रिंशच्च सूत्राणि तद्धितस्याबतः स्त्रियाम् ।
न्रण ईप् च ष्ट्रिव्रतः स्यान्न-दादेर्जातेरयोपधात् ॥ ५४ ॥

स्वाङ्गाद्वा द्विपदं सूत्रं पुंशब्दात् पदमेककम् ।
त्रिपदं ह्यै च मन्वादेः पत्न्यादयश्व वोर्गुणात् ॥ ५५ ॥

ऊत ऊङ् च समाप्तानि सूत्राण्येकादश स्त्रियः ।
समासश्चान्वये नाम्नां समाहारेऽत ईप् द्विगुः ॥ ५६ ॥

पूर्वेऽव्ययेऽव्ययीभावोऽ-मादौ तत्पुरुषो नञि ।
चाऽर्थे द्वन्द्वो बहुव्रीहि-रन्यार्थे कर्मधारयः ॥ ५७ ॥

तुल्यार्थे टाडका पुंव-द्वाऽनेकस्वरमन्स्वरे ।
सहादेः सादिरेव प्रा-देरुपसर्ग इत्यपि ॥ ५८ ॥

प्राग्धातोः कृतासमासो नाम्नश्व पदमेककम् ।
चादिर्निपातस्तत्रादि-र्विभक्त्यर्थे द्विकं पदम् ॥ ५९ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्यात् सद्य आदिःकाले त-दव्ययं चैकविंशतिः ।
स्युः समासस्य सूत्राणि प्रथमवृत्तिरित्यथ ॥ ६० ॥

धातोश्च वर्त्तमाने तिप् - तस् अन्त्यादिमहेपरम् ।
यावत् सस्वरवर्णाः स्युरष्टाविंशतिरेव च ॥ ६१ ॥

विधिसम्भावनयोर्यात्-यातामादीमहीति च ।
सस्वराण्यक्षराणि स्यु-स्त्रिचत्वारिंशदेव च ॥ ६२ ॥

आशीःप्रेरणयोस्तुप्ताम्-अन्वित्याधामहैस्त्विह ।
पञ्चत्रिंशदक्षराणि सस्वराणि ततोऽप्यथ ॥ ६३ ॥

अनद्यतनेऽतीते दिप्-तामन्-सिबिति चाऽऽमहि ।
एकत्रिंशदक्षराणि वर्तन्ते सस्वराणि च ॥ ६४ ॥

परोक्षे णबतुसादि-महेयावच्च सस्वराः ।
अष्टाविंशति वर्णाः स्यु-र्द्विश्व ह्याशिषि यादिति ॥ ६५ ॥

सीमह्येस्यैकचत्वारिं-शदक्षराणि सन्ति च ।
सस्वराणि श्वस्तने ता-तारावादि च तास्महे ॥ ६६ ॥

यावदस्मिंश्च वर्णाः स्यु-श्चत्वारिंशच्च सस्वराः ।
यक् चतुर्षु तथा कर्त-र्यदादेर्लुक् पदं द्विकम् ॥ ६७ ॥

अदो दिस्योर्ह्वादेद्विश्च दिवादेर्यो द्विकं पदम् ।
स्वादेर्नुश्च रुधादेर्नम् तनोदेरुप् पदद्वयम् ॥ ६८ ॥

तुदादेरोऽपि तदच्च ना क्र्यादेर्द्विपदं ह्यदः ।
स्याद्धसादान हौ त्यादौ भविष्यति स्यबेव च ॥ ६९ ॥

दिवादावट् स्वरादेश्च स्यप् क्रियातिक्रमे पुनः ।
स्याद् भूते सिस्ततो णित्पेऽ-निटे नामिवतोऽपि च ॥ ७० ॥

द्विपदं हशषान्तात् सक् त्रेरङ् द्विश्च चतुःपदम् ।
भवेल्लित्पुषादेर्ङ इरितो वेणतन्यकर्त्तरि ॥ ७१ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लोपो दिस्योर्हसादस्ते-रीट् सेरदाद एव च।
लोपो ह्रस्वाज्झसे चेटि झसाद् दादेः प इत्यपि ॥ ७२ ॥

स्यान्मेटस्तत और्वा हे-तो द्व्यक्षरमदेऽपि च।
व्योरा द्विपदमादाथ ई यात्येकं च यामियम् ॥ ७३ ॥

पुंस इडोर्वमोर्वा लो-पः कृञो ये च ङित्यदुः।
नातःस्यादी हसे द्वेस्तौ नमसोऽस्य सि सः पुनः ॥ ७४ ॥

आतोऽन्तोदनतो द्वेश्चाऽ-न उस् स्याविद एव वै
आतो णप् डौ झसाद्धिर्हे-र्होरित्येकाक्षरं परम् ॥ ७५ ॥

नव परस्मैपदानि पराण्यात्मन इत्यथ।
नाम्नि च युष्मदि चास्म-दि च भागैस्तथाऽऽद्भुवि ॥ ७६ ॥

कर्मणि, कर्तरिपंचाऽऽ-दनुदात्तङितस्ततः
भवेच्च निविशादेर्ञित्-स्वरितेत उभे पुनः ॥ ७७ ॥

परतोऽन्यदपित्तादि-ङिण्णादिः कित पदं द्विकम्।
ऋसंयोगात्र क्त्वा सेड रुदां क्तो वा द्विकं पदम् ॥ ७८ ॥

अतिशये हसादेर्यङ् द्विश्च पञ्चपदं त्वदः।
इच्छायामात्मनः सश्च गुभ्य आयो द्विवर्णकम् ॥ ७९ ॥

भवेन्नाम्नो य ईच्चास्य सूत्रं पञ्चपदं त्विदम्।
आचार उपमानाच्च कर्तुर्यङ् च पदं द्विकम् ॥ ८० ॥

ञिर्डित्करण एतस्मिन् सूत्रे स्याच्च पदं त्रिकम्।
धातोः प्रेरण इत्यस्य सूत्रस्य च पदद्वयम् ॥ ८१ ॥

एकपदं चुरादेश्च स धातुर्भ्वादिरेव च।
से दीर्घो य्वोर्विहसे ये दादेरिश्च पदद्वयम् ॥ ८२ ॥

सस्वरआदिर्द्विरद्विः स्वरादेः पर इत्यपि।
पूर्वस्य हसादिः शेषः शसात् खपा द्विकं पदम् ॥ ८३ ॥



For Private And Personal Use Only

कुहोश्चुः स्याज्झपानां ज-वचपा एककं च रः ।
ह्रस्वो यः सेऽक्षरे द्वे च भृज्जां लुकि निजां गुणः ॥ ८४ ॥

यङिन्वाऽऽतो ञमजपां नुक् रीगृदुपधस्य च ।
अङिलघौ ह्रस्व उप धाया अस्य चतुःपदम् ॥ ८५ ॥

लघो दीर्घो न रितः स्याद् आभ्वोर्णादौ पदद्वयम् ।
नृगशां च लोपः पचां कित्ये चाऽस्य पदानि षट् ॥ ८६ ॥

दां हौ इस्से च जह्वेधि-शाधिः स्याद् द्व्यक्षरं गुणः ।
नूपः शीङ उपधाया लघोर्नानिटि से ततः ॥ ८७ ॥

सिस्योः क्ङित्यद्व्युसि नो लोपो नमो गमां स्वरे ।
आतोऽनपि यतो ञे-र्य्योरस्मिंश्च पदद्वयम् ॥ ८८ ॥

असादेर्भ्वादिः सन्ध्यक्ष-राणामिदं षडक्षरम् ।
आदेः ष्णः स्नः इदं सूत्रं त्रिपदं चतुरक्षरम् ॥ ८९ ॥

विदो नवानां त्यादीनां णादि चैकादशाक्षरम् ।
ब्रुव आहश्च पञ्चानां तथेस्मिंश्च पदद्वयम् ॥ ९० ॥

अवादावीप् पितितित्स्मि द्वा यङ्लुकि ह्युरौ गमाम्- ।
छश्च दृशादेः पश्यादि-र्ज्ञाजनोर्जा पदद्वयम् ॥ ९१ ॥

प्वादेर्ह्रस्वो मुचादेर्मुम् खितिपदस्य चेदितः ।
शमां दीर्घो ञमस्य क्त्वि-ति झसे त्रिपदं त्विदम् ॥ ९२ ॥

लोपस्त्वनुदात्ततनाम् ऋत इर् पोरुरेव च ।
सिसतासीस्यपामिट् चाऽ-स्मिंश्च सूत्रे पदद्वयम् ॥ ९३ ॥

रुदादेश्चतुर्णां ह्वसा-देः कृतो हनृतः स्यपः ।
उदितो वोदितश्चैकं पदं क्तिरेकवर्णकम् ॥ ९४ ॥

नैकस्वरादनुदात्ताद् वुः से पदं द्विकं कितः ।
आदीदितो हबत्योश्च क्रादेर्णादिः पदं द्विकम् ॥ ९५ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कासादिप्रत्यययादाम् कस्-भूपरोऽस्य पदत्रयम् ।
पदं द्विकं भुवो वुक् स्याद् ईटो ग्रहां द्विकं पदम् ॥ ९६ ॥

नामिनोऽचतुर्णां धो ढ आख्यातस्य भवन्ति च ।
सम्पूर्णानि च सूत्राणि ह्यष्टसप्ततिसंहितम् ॥ ९७ ॥

कृत्कर्तरि तृवुणौच नाम्युपधात् क एव च ।
पचिनन्दिग्रहादेर-युणिन्येकादशाक्षरम् ॥ ९८ ॥

दृशादेः शो ज्वलादेर्णः कार्येऽणस्य पदद्वयम् ।
आतो डो नाम्नि चाय्व-थेखःख्येजां खशेव वै ॥ ९९ ॥

ख्युट् करणे भजां विण् च द्वे सूत्रे द्विपदे अमू ।
आतो मनिप्क्वनिप् वनि-पः क्विप् दृशस्तो दृशेः ॥ १०० ॥

टक्सकौ चोपमाने का-र्येऽस्मिन् पञ्च पदानि च ।
आ सर्वादेः किमिदमः कीश् सूत्रं द्विपदं ह्यदः ॥ १०१ ॥

अदसोऽमू णिनिश्वैक-पदमतीत एव च ।
क्विब्वनिब्डाः पदं चैकं तथा क्तक्तवतू भवेत् ॥ १०२ ॥

क्वसुक्वानौ णवेवच्च सप्ताक्षरं पदं द्विकम् ।
स्यात् शतृशानौ तिसेवत् क्रियायां च दशाक्षरम् ॥ १०३ ॥

स्याद् विदेर्वा वसुश्चाऽथ मुगानेतः पदं त्रिकम् ।
शीले तृन्निष्णुस्नुक्नुः षा-कोकणः पदमेककम् ॥ १०४ ॥

यङऊकस्तथाऽलुक्च वाऽन्यत्र पुनरादृतः ।
किर्द्विश्च भूते ञीतां तक् सदोणादय इत्यथ ॥ १०५ ॥

भवेच्च तुम् तदर्थायां भविष्यति पदं त्रिकम् ।
घञ् भावे आतः संज्ञाया-मकर्तरि च सप्तकम् ॥ १०६ ॥

स्वरादेर्मदां मूर्तौ घ-नो ट्वितोऽथुर्ड्वितस्त्रिमक् ।
तत्कृते सप्त नङ्की स्यात् क्तो नपुंसक इत्यपि ॥ १०७ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

युडित्येकपदं सूत्रं साधनाधारयोः पुनः ।
गत्यर्थादकर्मकात्क-र्त्तरि क्तो भावकार्ययोः ॥ १०८ ॥

ईषद्दुःसुषु खल्यू च तव्यानीयौ ततः परम् ।
स्वराद्यः पुशकाच्चेच्चा-तस्त्र्यक्षरं पदं त्रिकम् ॥ १०९ ॥

ऋहसान्तात् घ्यणोरा-वश्यके फले ऋदुपधात् क्यबेव ।
भवेत्तदनु स्त्रियां भावे क्तिः स्या-षिद्भिदामडेव हि ॥ ११० ॥

गुरोर्हसात् प्रत्ययान्तात् चजोः कगौ घिति त्रिकम् ।
ह्रस्वस्य पिति तुक् स्याच्च शिति चतुर्वदित्यथ ॥ १११ ॥

दशवर्णमोदौतोर्य-प्रत्ययः स्वरवत् पुनः ।
ढि ढो लोपो दीर्घश्च हसां चेरेकवर्णकम् ॥ ११२ ॥

द्विपदं युवोरनाकौ ततो रारे झसे दृशाम् ।
वै यजां यवराणां य्वृ-तः सम्प्रसारणं किति ॥ ११३ ॥

ग्रहां क्ङिति च णवादौ पूर्वस्याऽस्य पदद्वयम् ।
दो दत्तिश्च स्वरात्तो वा स्यात् स्थामी द्विपदं ह्यदः ॥ ११४ ॥

स्याद् दस्तस्य नो दश्वाऽथ रस्त्राणाद्यास्ततः परम् ।
ल्वाद्योदितस्तथेच्छार्थे-षु कर्तृकेषु तुम् ततः ॥ ११५ ॥

द्विपदं पूर्वकाले क्त्वा समासे क्यप् पदं द्विकम् ।
पौनःपुन्ये णम् पदं द्वि-श्च तदव्ययमेव च ॥ ११६ ॥

स्यादव्ययाद्विभक्तेर्लुक् सूत्रं सप्ताक्षरात्मकम् ।
दूराह्वाने टेः प्लुतो विचार्या पदमेककम् ॥ ११७ ॥

लोकाच्छेषस्य सिद्धिः स्यात् कृत्सूत्राणि भवन्ति च ।
चतुर्णवतिसङ्ख्यानि बद्धानि पद्यमालया ॥ ११८ ॥

संज्ञाप्रकरणं स्याच्च स्वरसन्धिस्ततः परम् ।
प्रकृतिभावसन्धिश्च व्यञ्जनाच्च विसर्गतः ॥ ११९ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नामप्रकरणं स्याच्च ततोऽपि युष्मदस्मदोः
कारकतद्धितस्त्रीश्च समासाख्यातकृत्ततः ॥ १२० ॥

अनेनाऽनुक्रमेणैवा-पठत् सूत्रं सरस्वती ।
ततःपरमृजुश्चक्रे श्रीमद्भिरनुभूतिभिः ॥ १२१ ॥

विद्वच्चिन्तामणिग्रन्थः कण्ठपाठे पठन्ति ये ।
तेषां वक्त्रे नरीनर्ति सर्वदा श्रीसरस्वती ॥ १२२ ॥

